नं: ४ - घ

काशिकावृत्ति टीका

पदमञ्जरी

पत्राणि १२४

नं० ४-घ
काशिकावृत्ति टीका
पदमञ्जरी
सप्तमोध्यायः
नं० ४
पत्राणि १२४=१२४

कारक

श्रीगणेशाय नमः ॥ ॥युवोरनाकौ॥ ॥शास्त्रस्य लाघवार्थं युवू प्रत्ययावुपदिष्टौ तयोरनेनानाकावादेशौ विधीयेते तत्र तत्र स्वनाकयोरेवोपदेशे
शास्त्रस्य गौरवं स्यात्। अर्थेह कस्मान्न भवति। उमिश्रणे। युतः। युतवान्। ऊदिति युवोर्ग्रहणात्। कथं। न्युपदिष्टकारेणानुनासिकरत्वं तत्र कः। एवम
पि यतः धुतवान् अप्राप्तिं प्राप्नोति। युधस्तनुदित्त्वकाशः। अथार्थवतो युवोः शब्दस्य ग्रहणं अनर्थकस्यायं तेन धातोस्तस्य न भविष्यति। अणि
युरित्यादावपि तकारस्यापि संज्ञकत्वादादेशाभावः। यदि तर्हि लिपुदादिषु द्कार उच्चारणकः। नंदनः कारकः। ऊर्णोरुचामि तिनुम् प्राप्नोति।
ऊर्णोतेः स्वलन्तस्य नुम्। न चैतौ स्वलन्तौ तत्र हि स्वल् ग्रहणं कर्तव्यं। नेत्याह। पदेतन्नपुंसकस्य झलचः इति झल्ग्रहणं तन्नपुंसकस्याभ्यपकृष्यते। ऊ
र्णोः इदं सर्वनामस्थाने धातोर्झलः युजेरसमासे। ततो नपुंसकस्य झलचः। नपुंसकस्येत्येव। तच्चावश्यं झल् ग्रहणमपकृष्ट
व्यं अन्यथा उगितोलिंगविशिष्टस्यापि नुमप्रसज्येत। गोमती भवतीति। इह तर्हि नंदना कारिका उगितश्चेति ङीप् प्राप्नोति। ज्ञापका सिद्धं यद

॥श्रीगणेशाय नमः॥ ॥युवोरनाकौ॥ ॥अंगस्येत्येव। युवुरित्येतयोः रूपविशेषणयोरनुनासिकयणोः प्रत्यययोर्ग्र
हणं तयोः स्थाने यथासंख्येनानक इत्येतावादेशौ भवतः। योरनः वोरकः। नंद्यादिभ्यो ल्युः। नंदनः रमणः। सायमादिभ्य
स्त्युतुलौ तुट् च। सायंतनः चिरंतनः। ण्वुल्तृचौ। कारकः। हारकः। वासुदेवार्जुनाभ्यां वुन्। वासुदेवकः। अर्जुनकः। अनुबन्ध

पंचविंशतिं करोति। शिल्पिनि ष्वुन्। ष्वुलो नुडिति। तर्हि ज्ञापयति न युवोरीकारो भवतीति। नैतदस्ति ज्ञापकं। षिल्करणं ङीषर्थं। रित्करणं
मनुपसर्जनार्थं। इतो ह्यनुपसर्जनान्ङीष् भवति। उगितः पुनरविशेषेण। तथा शान्तनपान्तन शब्दौ भौरादिषु ल्युट् तौ पठितौ। तत्र शान्तमि
त्यादाविति तरा। न घा शेषस्य न रस्य उगितश्चेत्युगिल्लक्षणो ह्रस्वविकल्पः प्राप्नोति। ननु च उगितश्च उगित्संशब्देन नयान शीर्विहिता
न्नास्तत्र ग्रहणं। नेत्याह। इह हि दोषः स्यात्। भोगवतीतरा गौरिमतीतरा शार्ङ्गरवादि ङीनन्तावेतौ। अत्र ह्रस्वविकल्पो न स्यात्। इष्यते चा
त्र विकल्पो भाष्यकारेण। तस्मान्नैवं शक्यं उदितोर्युवोर्ग्रहणमिति। न वेदेवं युतः युतवान् शं युरित्यत्रापि प्राप्नोति। तत्राह॥ ॥ ॥

॥छ छ॥ ॥छ छ॥ ॥छ॥ ॥

अनुनासिकयणोरिति। संतिष्ठियणः सानुनासिकाः निरनुनासिकाश्च तत्र येषामादेशः स्थाने तेन युयकारवकारावनुनासिकोपठितमोतेन
न काथनिष्टप्रसंगः। प्रत्ययणोरिति वस्तुकथनमेतन्न तत्वप्रसङ्गनिवृत्त्यर्थं। तथाविधस्यानुनासिकयणोः संभवाभावात् इत्युरिति। युजिमृङ्-
भ्यां युक्सुकाविति सूत्रे सह निर्दिष्टत्वात् दिष्टमुद्धृतं। प्रकृतेन्यत्र वनुमंगस्य योयुङ् कौ चंगस्य पुकृयणोरंगमिसे तद्भवतिनायोश्चेतद्भव-
ति प्रत्ययणोः नचैषप्रसय इति। आनर्थकाच्च युयुलोत्त्वनादेशो कृते पश्चात् तुजिमर्थवित्वप्रसयत्वंच। किमुच्यते नुनासिकत्वं नप्रतिज्ञा
यत इति न पुनर्न्यपश्चात इत्यत आह प्रतिज्ञानुनासिक्या इति। प्रतिज्ञया आनुनासिक्यं येषां तेन यथोक्तः। सर्वत्र पाठाभावात् तेनोपि वाप्य

अनुनासिकयणोरिति किं युणयियुमञ्जणयुः। भुजिमृङ्भ्यां युक्त्युकौ च। भुज्युः मृत्युः। एवमादीनां ह्रियणोः नुनासिकत्वं
न प्रतिज्ञायते। प्रतिज्ञानुनासिक्याः पाणिनीयाः। युवोरिति सूत्रनिर्देशो ह्रद्वैकवद्भावपक्षेपि समागमागमानुशासनमि
ति नुम्क्रियते नपुंसकलिंगतावा लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति न भवति। इतरेतरयोगपक्षे तु छान्दसो वर्णलोपो
द्रष्टव्यः। युवोश्चेद्वित्वनिर्देशो द्वित्वेपरणं तु प्रसज्यते। अथ वेदैकवद्भावः कथं पुंवद्भावे दृष्टं। द्वित्वे नैगमिको लोप एकत्वे नु
मनित्यता। अशिष्यत्वाद्धि लिंगस्य पुंस्त्वे वेह समाश्रितं॥ १ ॥ ७॥

ऽस्य संकीर्णत्वात्प्रतिज्ञासमधिगम्यमेवानुनासिकत्वमित्यर्थः। युवोरिति समाहारद्वन्द्वश्चेत्स नपुंसकमिति नपुंसकत्वे मतिश्रोत्रगुणाव
द्वितत्वद्भावेप्योनुमप्रसक्तिप्रतिषेधेद्युमितिविवचनाद्धि ईतीति गुणो बाधिताः इको चि विभक्ताविति नुमिसतियुवुन इति भवितव्यं। इतरेतर
योगद्वन्द्वे तु द्विवचनेयणादेशे वसति द्वयोर्वकारयोः श्रवणप्रसंगः स्यान्निवद्भावाद्धलि लोपो पिनास्ति तत्कथमयं निर्देश इत्याह युवो
रिति। नपुंसकलिंगताचेति। न भवतीति वक्ष्यमाणेन संबंधः। मध्ये हेतुः लिंगमशिष्यमिति। छान्दसो वर्णलोप इति। अकृत एव य
णादेशे उकारस्य लोपः कृतेवा तस्मिन्नन्तरस्य वकारस्य। अपर आह। कर्मधारयोयं। अवयवधर्मेणास मुदायस्य व्यपदेशः। युवश्चा
सौ मसुदायो युवुलक्षणो वुश्चासाविति। तत्र समुदायस्यैकत्विस्याभावाद्व यवयोरेवादेशाविति ॥ १ ॥ ७ ७॥ ॥ ७॥ ॥

॥आयनेय॥ ॥फकारादिष्वकार उच्चारणार्थः अंजनमात्रं स्थानित्वेनाश्रितं फलटखछघाभिः पनक्कनिर्दिशात्। एवं च नानुबंधकृत्यरिभाषा न प्रवर्त्तते
॥आढ्यकुलीन इति। अपूर्वपदादित्ति वचनात्कुलात्खः स्त्यनेन न स पूर्वपदादपि खो भवति। फक्कनीचैर्गतौ। ढौकृत्रौकृगत्यौ। इह प्रत्ययाद्युदात्तत्वं संज्ञा
संनियोगेन विधानादंतरंगं एते तु आयन्नादयो ऽनाधिकारे विधाना द्वहिरंगाः तत्र प्रथ्म यत्रस्वरार्थोनुबंधो नास्ति शिलायाढः इह द्वाच्छः स्यो देनत्राद्युदा
त्तत्वे तत्पश्चाद्भवंत एते आदेशाः स्वरकस्याचउच्चारणासंभवादनियतस्वराः स्युरित्याशंक्याह। आयन्नादय इत्यादि। अयमभिप्रायः। प्रत्ययादी

॥आयनेयीनीयियः फढखछघां प्रत्ययादीनां॥ ॥आयन् एय् ईन् ईय् इय् इत्येते आदेशा भवंति यथासंख्यं फढखछघ इत्येतेषां प्रत्य
यादीनां। फस्य आयन्नादेशो भवति। नडादिभ्यः फक्। नाडायनः। चारायणः। ढस्य एय् आदेशो भवति। स्त्रीभ्यो ढक्। सौपर्णेयः। वैनते
यः। खस्य ईन्नादेशो भवति। कुलात्खः। आढ्यकुलीनः। श्रोत्रियकुलीनः। छस्य ईय् आदेशो भवति। वृद्धाच्छः। गार्गीयः। वात्सीयः। घ
स्य इय् आदेशो भवति। क्षत्राद्घः। क्षत्रियः। प्रत्ययग्रहणं किं। फक्कति। ढौकते। खनति। छिनत्ति। घूर्णति। आदिग्रहणं किं। ऊरुदघ्नं
। जानुदघ्नं। एते आयन्नादयः प्रत्ययोपदेशकाल एव भवंति कृते षेषु प्रत्ययाद्युदात्तत्वं भवति। तथा च सति घच्छौ चेति घच्छ्योर्विल
क्षणमर्थवद्भवति। शुभेः ढेः। षण्णोढः। शुंठकः षंढ इत्येवमादीनामुणादयो बहुलमिति बहुलवचनादेवादेशा न भवंति॥ ॥

नां फकारादीनामंगसंबंधाभिचारात्प्रयोजनाभावादिहांगस्येति न संबध्यते तेन एते प्रत्यंतरंगाः तत्र परत्वादेतेषु कृतेषु प्रत्ययाद्युदात्तत्वमिति
॥अत्रैव ज्ञापकमाह तथा चेति। यदि प्रत्ययस्वरे कृते आयन्नादय आदेशाः स्युस्ततो घ शब्दा कारस्योदात्तत्वे कृते घकारसहलः स्वमनधर्मि
णः स्वे सन धर्मिणानुदात्तस्यादेशे कृते लोदात्तत्वं सिद्धमिति चिल्करणमनर्थकं स्यादिति भावः॥ ॥छ छ॥ ॥छछ॥ ॥
॥ॾ ॾ॥ ॥ॾ ॾ॥ ॥ॾ ॾ॥

इपाद्ङि॰ तिवावचनं ज्ञापकमिति। यदि धातुप्रत्ययानामप्यते आदेशाः स्युस्तर्हि तेऽच्छङि॰ सेव च्रुयात्। न च च्छङि॰ सतिवलादिलक्षणो इडि कृते अना
दित्वादियादेशो न स्यादिति वाच्यं। इदानीमेव स्युरुक्तमंतरंगा आदेशा इति। अपर आह यदि धातुप्रत्ययेष्वेतज्ज्ञापकं प्रातिपदिकप्रत्ययेष्वपि स्या
दंककुंडयामीयमुनं शास्तितत्र ततोपत्याचार्यो न प्रातिपदिकप्रत्ययानामिमे आदेशा इति। यदि स्युस्तु स्युनमेनविटध्यात्। एताविंतं स्वप्रत्य
याधातुप्रत्ययाः प्रातिपदिकप्रत्ययाश्चेति उभे तेवादेशास्तेवचना सर्वत्रैव स्युरिति। इत्संज्ञया भवितव्यमिति। न च वचनेनाप्यमप्यादित्संज्ञाया

अतेरीयङि॰ निवाईयङ्वचनं ज्ञापकं धातुविहितप्रत्ययानामादेशा न भवंतीति। एजेः खश्। पदरुजविशः स्पृशो घञिति येव
मादिषु तु इत्संज्ञया भवितव्यमित्यादेशो न भवति। तद्धितेषु खकारघकारयोरादेशवचनं सावकाशमिति इत्संज्ञां बाधितुं नोत्सह
ते। आयनीनोर्नेकारस्येत्संज्ञाप्रतिविधाने कर्तव्ये निष्कार्यं हि नत्र संभवति॥ ॥झोंतः॥ ॥प्रत्ययग्रहणमनुवर्त्तते आदिग्रह
णं निवृत्तं। प्रत्ययावयवस्य झकारस्य स्थाने अंत इत्ययमादेशो भवति। कुर्वंति सुन्वंति चिन्वंति लुनंति पुनंति। अधश्चोविजन्निष्वमा
णाः पतिभिः सहशयंते। जृविशिभ्यां झच्। जरंतः वेशंतः। प्रत्ययग्रहणेऽसति उंछितः उंछितुं उंछितव्यं। अस्मिन्नप्यंतादेशोऽ
ते प्रत्ययाद्युदात्तत्वं भवति। तथा च स्वरवश्चिंलकरणमर्थवद्भवति॥ २ ॥ ॥ ७ ७ ॥ ॥ ४ ७ ॥ ॥ ७ ॥ ॥

बाधनमित्याह तद्धितेषु हीति। प्रतिविधानं कर्त्तव्यमिति। प्रतिविधानं तु प्राचामवृद्धात्फिन्बहुलमिति फिनो निष्करणादित्संज्ञाया अभाव
इति। न च फे इत्युच्येत तत्र फिनः। फिञ्श्चिसामान्यग्रहणार्थं निष्करणं। वृद्धादित्यधिकाराद्धि फिञ एव तत्र ग्रहणं न फिनः॥ ॥झोंतः॥ ॥
आदिग्रहणं निवृत्तमिति। तदनुवृत्तौ हि शयांते इत्यत्र शीङो लेटि लेटोऽडाटाविति लावस्थायामेव प्राप्ते आटि सति झकारस्यानादित्वात्
स्यात्। कथं पुनः समासनिर्दिष्टानामेकदेशोऽनुवर्त्तते नैष दोषः। अनाश्रितार्थं शब्दमात्रं स्वरितत्ववशादनुवर्त्तत इति पक्षे यस्यैव स्वरित
त्वं प्रतिज्ञानं तस्यैवानुवृत्तिः स्यात्। अर्थाधिकारे तु समासार्थस्यैकत्वात्तस्यैवानुवृत्तिः स्याद्भवनक्वा। यद्वा प्रत्ययग्रहणं पूर्वसूत्रे पृथक्

॥अदभ्यस्तात्॥ ॥ददतीत्यादि। नक्षतीत्यादौ पत्रोपदेशानंतरमभ्यस्तसंज्ञा तत्राप्यनदर्थं निकरणाभावः प्रतीक्ष्यः। अन्यथा नित्यत्वाच्छपि कृते
तेन व्यवधानान्न स्यात् ततश्च ददतीत्यादावपि शपः श्लावभ्यस्तसंज्ञायामदादेशो भवति। नुमादेशेन तु बाध्यत इति। तस्यानवकाशत्वात्।
अत्राप्यादेशे कृते प्रत्ययाद्युदात्तत्वं भवतीति। उक्तस्येति भावः। इह हि अभ्यस्तानामादिरिति स्वरो भवति॥ ॥आत्मनेपदेष्वनतः॥ ॥
अनभ्यस्तार्थमिदं। चिन्वतामिति। लोट्। टेरेत्वं आमेतः। अपंत इति। ननु चात्रापि प्रागेव शपः पश्चाददादेशप्रसंगः अनतस्त्वस्तु वेभि
येन इत्यादि व्यवकाश इत्यत आह निरवकाशत्वादिति। भकारविशेषणं किमिति। श्रुतानामात्मनेपदानामधिकृतत्वमप्रत्ययस्य वा विशेषणे

॥अदभ्यस्तात्॥ ॥अभ्यस्तादंगादुत्तरस्य झस्य अत् इत्ययमादेशो भवति। ददति। दधति। जक्षति। जाग्रति।
अनु। अंतादेशापवादोयं जुसादेशेन तु बाध्यते। अददुः अदधुः अजक्षुः अजागरुः। अत्राप्यादेशे कृते प्रत्ययाद्युदात्तत्वं
भवति॥ ॥आत्मनेपदेष्वनतः॥ ॥आत्मनेपदेषु योऽकारस्तस्मादनकारान्तादंगादुत्तरस्य अदादेशो भवति। चिन्वते
चिन्वतां अचिन्वत। लुनते लुनतां अलुनत। आत्मनेपदेष्विति किं। चिन्वन्ति लुनन्ति। अनत इति किं। च्यवन्ते प्लवन्ते। निमि
त्वात्तत्र विकरणे कृते अंतादेशो न भवेत्तस्मिन्नित्यदादेशो न भवति। अनकारान्तेनांगेन झकारविशेषणं किं। इह मा भूत्।
अच्छ घस्रो जग्निच्छमानाः पतिभिस्सह शयानै॥ ॥शीङो रुट्॥ ॥शीङो अंगादुत्तरस्य झादेशस्यातो रुडागमो भवति।
शेरते। शेरतां। अशेरत॥ ॥

कोदोष इति प्रश्नः। शयांते इति। अत्रांगस्यानंतरमात्मनेपदस्याटस्तु झकारस्य तद्ग्रहणेन ग्रहणात्। झकारस्त्वाटा व्यवहितः अंतादेशत्वं
विशेषानुपादानात्तत्रापि भवति॥ ॥शीङो॥ ॥आदेशस्यात इति। ननु चनेहाङ्ग्रहणमस्ति। यद्यपि मण्डूकानंतादपि प्रथमानिर्दिष्टं षष्ठी
निर्दिष्टेन चेहार्थः। शीङः इत्येषा पंचमी आदि इति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति। शेरत इति। सार्वधातुकावयवस्य
झस्यादादेशः तदागमो रुट् तद्ग्रहणेन गृह्यते अवयवावयवस्य समुदायं प्रत्यवयवत्वं लोकेपि दृश्यते यथा देवदत्तस्यांगुलिरिति सार्वधातु
कस्याप्यवयवो रुडिति शीङः सार्वधातुके गुण इति गुणो भवति। किं पुनः कारणं रुडागमो मा आदेशस्यान्तो विधीयते न झकारस्यैव विधीयते

रा॰म॰
३

रुडयमिति । यदि तु झकारसंजनेन रुट् क्रियेत: क्रियेत शीङस्तस्य त्रगुणो न स्यात् निर्गतत्वात् तस्मात् परादिर्विक्रियते । यदि झकारस्यैव स्यात् ततो
यथा शयीरत इत्यत्राडागमव्यवहितत्वात् स्यादादेशो न भवति तथा शेरत इत्यत्रापि न स्यात् रुटा व्यवहितत्वात् । ननु च पुक्षमात्रव्यवधानं सिद्धि
सार्वधातुकमपित् इत्येवमनया व्यवधानात् झकारं तु मवद्धात्येव रुट् पुनर्झकारभक्तः सकथं तस्य व्यवधायकः । उच्यते । गृह्यमाणत्वात्तत्र झग्रहणो
न तथापि निर्दिश्यमानस्यादेशा भवन्तीति यदत्र निर्दिश्यते झ इति विशिष्टं रूपं न तत् तदनन्तरं पश्चादनन्तरो रेफसकारसमुदायो न स निर्दिश्यते
इति न स्यादेवादेशः । अयरत्मात् झस्यादेशो न स्यादिति कोऽर्थः । झस्य न स्यादित्यर्थः । तस्मान्न हि स्यात्तस्मादेः परस्येति रुट् एव स्यात् । न च रुटो वे

रुडयं परादिः क्रियते स यदि झकारस्यैव स्याद् तदादेशो न स्याद् तत एवायमादेशस्यागमो विधीयते ॥ ॥ वेत्तेर्विभाषा ॥ ॥
वेत्तेरंगादुत्तरस्य झादेशस्यातो विभाषा रुडागमो भवति । संविद्रते संविदते । संविद्रतां संविदतां । समविद्रत समविदत । वे
त्तेरिति लुग्विकरणस्य ग्रहणं किं । इह मा भूत् । विन्ते विंदाते विंदते ॥ ३ ॥ ३ ॥ ३ ॥ ३ ॥ ॥ ३ ॥ ॥

यत्र्येस्यात् झकारस्य अवरणार्थत्वात् । न च विंत्तां अनेकाल्त्वात् सर्वादेशः प्राप्नोति सर्वादेशो हि दोवेयत्स्यादिति चेत् । किं तु मे मा भूदादेशः ।
शीङ इत्यनुबंधोच्चारणं यङ्लुङ्निवृत्त्यर्थं । व्यतिशेष्यते । गुणोऽपि न भवति तत्राप्यनुबंधनिर्देशात् ॥ ॥ संविद्रत इति । समो गम्यृच्छीत्या
दिना आत्मनेपदं विंत इत्यादि । विद विचारणे । रुधादिरनुदात्तेत् । स ज्ञानलाभार्थयोस्तु विकरणाव्यवधानादेवाग्रहणं । अत्र च बहुवचनं प्रयु
दाहरणं तयो रूपस्यासौ विवरणार्थस्येदं बहुवचनेरूपमिति प्रदर्शनार्थं । विंदते इति रूपस्य लाभार्थे लोटादिके स्वरिते त्वात्मनेप
दे एकवचने शेमुचादीनामिति नुमापि कृते संभवात् ॥ किं च वेत्तेः । तिनिर्देशादेव यङ्लुकि न भवति । व्यतिवेविदत इति ॥ ३ ॥
॥ ७ ७ ॥ ॥ ७ ७ ॥ ॥

॥बहुलं॥ ॥बहुलवचनादसत्यपि भवतीति। एतदर्थमेव विभाषाग्रहणोऽप्रकृतेऽपि बहुलग्रहणं कृतं। अचष्टामिति। इति नोवेत्तिवाह॥ ॥
अतो भिस ऐस्॥ ॥अतिजरसैरिति। अत्रैव चैकारस्य श्रवणार्थमैसादेशः कृतः। हलोरिसादौ वेसादेशेऽपि ह स्यादूर्ध्वं सिद्धं अतो गुण इति
पादरूपं तु न भवति। यदि स्यादिदिसमेव विदध्यात्। परत्वादिति। एत्वस्यावकाशः वृक्षेषु ऐसोऽवकाशः कृत एत्वे। प्राप्ते त्वाद्युभयप्रसंगेय

॥बहुलं छन्दसि॥ ॥छन्दसि विषये बहुलं रुडागमो भवति। देवा अदुह्र। गन्धर्वाप्सरसो अदुह्र। दुहेर्लङ्। झस्यादादे
शे कृते रुट्। लोपस्त आत्मनेपदेष्विति तलोपः। न च भवति। अदुहत। बहुलवचनादन्यत्रापि भवति। अदृश्रमस्य
केतवः। अदृश्रो रिगुणः इति बहुलवचनादेव गुणो न भवति॥ ॥अतो भिस ऐस्॥ ॥अकारान्तादङ्गादुत्तरस्य भिस
ऐस् इत्ययमादेशो भवति। वृक्षैः। प्लक्षैः। अतिजरसैः। जरामतिक्रान्तैरिति प्रादिसमासे कृते ह्रस्वत्वे च भिस ऐसा
देशो भवति। एकदेशविकृतमनन्यवदिति जरशब्दस्य जरसादेशः। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्ये
ति चेयं परिभाषा अनित्या कष्टाय क्रमणे इति निर्देशात्। अत इति किं। अग्निभिः। तपरकरणं किं। खट्वाभिः। मालाभिः।
एत्वं भिसि परत्वाच्चेदत ऐस् कथं भविष्यति॥ ॥७॥ ॥

रत्वादेत्वप्रसंग इति चेत् कृतस्य सेः न ऐस् कथं भविष्यति। एत्वे कृते मुख्यमकारान्तत्वं न संभवतीति प्रश्नः। कृत एत्वे भौतपूर्व्यादिति। भूतपू
र्वस्य भावो भौतपूर्व्यं प्रतिकाभावाद् न पूर्वगतिरग्नीपन इति भावः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥ यम॰
॥३ ३॥ ॥३ ३॥ ॥
४

ऐस्त्वनित्यस्त्यपासतीति। एवं हि हृस्तैः स्वभावेन नित्यः कृताकृतप्रसंगित्वादेत्वं त्वैसि कृते न प्राप्नोतीत्यसत्यलादित्वात्। न च तत्र भूतपूर्वगतिः सु-
ख्याऽस्त्वैवसंभवात्। एतद्दोषपरिहारस्तु तस्मापि वादभावमनाश्रित्य कृते इष्टव्यं। तदाश्रयणे हि नाप्राप्ते एत्वस्यारंभादैस्त्वबाध इत्ययुक्तो विप्रति-
षेधः स्यात्॥ ॥नेदमदसोरकोः॥ ॥इदमदसोरिति भिसपेक्षया संबंधलक्षणा षष्ठी। एभिरिति। त्यदाद्यत्वं। हलि लोप इतीदम इद्भागस्य लोपः। अ-
मीभिरिति। ऐसि प्रतिषिद्धे बहुवचने झल्येदित्येत्वं। एत इदुत्वचन इत्यीत्वमत्वे। अकोरित्येतत् तदर्थकं। कथं। विशिष्टस्य साकोऽयं प्रतिषेधः

कृत एत्वे भौतपूर्व्यादैस्तु नित्यस्त्यपासति। अन इत्यधिकारो जसः शीइतिपावत्॥ ॥बहुलं छन्दसि॥ ॥छन्दसि
विषये बहुलं भिस ऐसादेशो भवति। अतइत्युक्तमनतोऽपि भवति नद्यैः। अतोऽपि न भवति देवेभिः सर्वेभिः सोत्कमि-
ति॥ ॥नेदमदसोरकोः॥ ॥इदम् अदस् इत्येतयोरककारयोर्भिस ऐसादेशो न भवति। एभिः। अमीभिः। अकोरि-
ति किं। इमकैः। अमुकैः। अकोरित्येतदेव प्रतिषेधवचनं ज्ञापकं तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति। इदमदसोः
काद्विति नोक्तं। विपरीतोऽपि नियमः संभाव्येत इदमदसोरेव कादिति॥ ॥४॥ ॥७ ७॥ १४॥ ॥

इदमदस इत्येतावाक कश्चित्कृते रूपमेवादेवन भविष्यतीति तत्राह अकोरित्येतदेवेति। ज्ञापनस्य प्रयोजनं सर्वके इत्यादौ सर्वनामकार्यप्रवृ-
त्तिः। इमौ द्वौ प्रतिषेधानुमेते द्वावपि शक्यावक्तुं कथं एवं हि वक्ष्यामि इदमदसोः कादिति। तन्नियमार्थं भविष्यति। इदमदसोः कादेव
नान्यत इति। नैतदस्ति। विपरीतोऽपि नियमः स्यात् इदमदसोरेव कादिति। ततश्च सर्वकैरित्यादौ न स्यात्। एभिरित्यादौ च स्यादेव।
तन्मध्यपरिभाषा च न ज्ञापिता स्यात्। केचित्तु कृत्वा वेवं पठन्ति इदमामः देकादिति नोक्तं विपरीतोऽपि नियमः स्यादिदमदसोरेव का-
दिनीति॥ ४॥ ॥७॥ ॥

७का०प८१

५

॥राङः सिङ्सां॥ ॥अतिजरसिनेत्यादि। समासेद्वन्द्वत्वेकृते इनादेशः ततः सं निपातपरिभाषयाअनित्यत्वाज्जरसादेशः। एवम
तिजरसादित्यत्रापादादेशेकृतेजरसादेशः। ननु च ह्रस्वस्य ह्वोरेवानादित्वात्पूर्वमेवादेशाभ्यां जरसादेशः प्राप्नोति सहि नित्यः पश्चात्त
त्वकृतेतदन्तत्वादेवेनादादेशयोरन्तावेद्वतिजरसात्अतिजरसइतिमवितव्यं नैषदोषः। एवं हि इनादेशस्यादादेशस्य चविधानमन
र्थं नादेशादादेशश्च विधेयश्च स्यात्कृतपसिद्धिः इह तावद्धसेरीतित्वेयोगविभागः करिष्यते बहुलवचनेभ्यस्ते नात्रोसि च। तत्र आ
द्धि च। आद्विचपरतएत्वं भवति तत्र स्यानिवद्भावात्त्यप्द्वेपरतएत्वं हक्षेणानेर्वशस्कां इहत्यनेनेतिहलिलोपइतिचद्रूपलोपेप
ति एत्वेतिप्राप्नोति। हलिलोपइत्यपनीयहलिलोपइतिसूत्रंकरिष्यते तत्र नकारस्याश्रुतत्वाल्लोपाभावः। नसशकोहलिलोपे

॥राङः सिङ्स्यासिनात्स्याः॥ ॥अकारान्तादङ्गादुत्तरेषांराङः सिङ्सङ्सेजेषां पष्ठ्यासंख्यं इनक्आत्स्य इत्ये
तेआदेशा भवन्ति। ये इत्येतस्य इनः। वृक्षेणप्लक्षेण। ङसिइत्येतस्य आत्। वृक्षात्प्लक्षात्। ङसइत्येतस्य स्य।
वृक्षस्यप्लक्षस्य। अतिजरसिनात्अतिजरसादितिकेचिदिच्छन्ति॥ ॥७ ७॥ ॥७ ७॥ ॥

वक्तुं। इहहिनस्यात्। अपाविष्टाजनयन्। अयेति। इदमस्तुतृतीयैकवचनस्य सुपांसुलुगित्यादिनायादेशः तस्यास्थलादित्वादिङ्
पलोपोनस्यात् तस्माद्धलिलोपएवकर्तव्यः। ततश्चानेनेतिनसिद्ध्यति। एवं तर्हि नाप्यकइतिद्विनकारकोयनिर्देशः। तत्रादेशस्ये
वंधीपदान्तत्वाल्लुप्तः। नश्च आपूर्वनाप्रामत्रपरतइद्धो। नादेशइतिसत्रापीश्रयणादिद्रूपलोपप्रवादोनशङ्क्यः नादेशएवभवि
ष्यति। पक्षेवमादेशनालोपस्यासिद्धत्वाद्राजेसादावित्ददीर्घप्रसङ्गः आनात्यत्इतिनैषदोषः। सुपांसुलुगितिलुङ्किकृतेन
लुमतांगस्येतिप्रतिषेधः। वृक्षादित्यत्रापिसवर्णदीर्घत्वेनैवसिद्धम् अकारोच्चारणसामर्थ्यादितोगुणोपरहूपेनभविष्यति। त
देवमिनादेशस्यादादेशस्यच विधानसामर्थ्यात्पूर्वमिनादादेशौपश्चाज्जरसादेशइत्येषामभिप्रायः॥ ॥७॥ ॥

रा०म०

५

यथा हीसादिभाष्ये हि पूर्वोक्तमक्रियाश्च यत्नोन नादेशो ऽत्रादेश स्था पितः यदि चैतदूपद्वयमिष्टं स्यात् ततयोरादेशयोः प्रसाक्षा
नमनुपपन्नं स्यात्। तत्र संनिपातपरिभाषया जरसादेशाभावात् अतिजरै अतिजरैरिति भाष्यकारस्यामिमेतमिति केचित्। प्रागेवजर
सादेशे अतिजरसात् अतिजरसः इत्यभिप्रेतमिति मन्ये। ङेर्यः॥ ङे इति चतुर्थ्येकवचनस्य ग्रहणमिति। तस्य हि ङे इति रूपं प्रतिपदोक्तं सप्तम्येक
वचनस्य चेङ्‌ङ्गीतिप्रत्याहारात् कोपघयि ङेरिति विभक्तं तमुपात्तं तस्मोभयोरपि लाक्षणिकं तथापि प्रसङ्गात् सर्वस्य भाग स्यला
क्षणिकत्वप्रतिषेधे कृत्वापेक्ष्य परिभाषा महति। यद्येवं ङे इत्यत्र प्रत्ययान्तरे सप्तम्येव मेव प्रसंगः। तस्मात् अन्यान मेवात्र शरण

यथा तु भाष्ये तथा नेत दिष्यत इति लक्ष्यते॥ ॥ङेर्यः॥ ॥ङे इति चतुर्थ्येकवचनस्य ग्रहणं अकारान्तादङ्गादुत्तर
स्य ङे इत्येतस्य य इत्ययमादेशो भवति। वृक्षाय प्लक्षाय। संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति परिभाषा
नित्यात्तेन दीर्घो भवति॥ ॥सर्वनाम्नः स्मै॥ ॥अकारान्तात् सर्वनाम्नो ङादुत्तरस्य ङे इत्येतस्य स्मै इत्ययमादेशो भव
ति। सर्वस्मै। विश्वस्मै। यस्मै। तस्मै। अतः इत्येव। भवते। अथोत्र स्मैरन्त्यादेशः शित्कृत एकादेशः प्राप्नोति स्मैभाव
श्चान्तरङ्गत्वादेकादेशात् पूर्वं स्मैभावः क्रियते पश्चादेकादेश इति॥ ५ ॥ ॥श्री॥ ॥श्री॥ ॥

लिंगं च तस्मै प्रभवति तदस्मै दीयते तस्मै हितेनदर्स्य ग्रहणमिति कीदृश्यां यादेसादि हृष्याये ति सुपि चेति दीर्घः कथं पुनरकार
संनिपातकृतोयमादेशस्तद्विघातनिमित्तं भवत्यत आह संनिपातलक्षणा इति। अनित्यत्वं तस्याः कष्टाय क्रमणे इति निर्देशा
द्वसीयते॥ ॥सर्वनाम्नः॥ ॥भवत इति। द्विपर्यन्ता स्यदादय इति वचनात् मत्रस्यदापन्या भावादनकारीतत्वं अन्त्यादेशः
शित्कृत इति। अम् अन्त्यादेशोत्वत्रास्मै इत्यानुपूर्व्यामितिरुं कथं नात्राकृते स्मैभावे हलादि विभक्तिः हलादौ चेद् रूपलोपः। नचा
कृते इदूपलोपे एकादेशः प्राप्नोतीति। न चाकृतप्रसंगः नित्ये नेदूपलोपेन बाधितत्वात्। एकादेशः प्राप्नोतीति। नित्यला
त्। वाक्यसंस्कारपक्षेस्त्वेतचोद्यं। तस्मादर्थप्रतिपादनाय लोके प्रयुज्यते तद्वच शास्त्रे मस्तान्वाख्यायते। अन्तरङ्गत्वादिति।
एकपदाश्रयत्वादन्तरंगत्वं। पदद्वयाश्रयत्वादेकादेशो बहिरङ्गः॥ ५ ॥

अम·पद·१
६

॥ ग पूर्वादिभ्यः॥ ॥पूर्वादिभ्यः सूत्रपाठपठितगणपाठपठितास्य सर्वनाम्नः इति वेहानुवर्त्तते तत्रासति नच ग्रहणेऽङ-सिङ्योर्येन सर्वनाम संज्ञा स गणपाठ एव कर्त्तव्य इति न च ग्रहणं। इहज सिङ-सिङीनां शी स्मात् स्मिनः। पूर्वादिभ्यो नवभ्यो वा। ओङ- आपः शी। नपुंसकाच्चेति सूत्रद्व सः कर्त्तव्यः। एवं जसि विभाषार्थो निरर्थीकोऽसूत्राणि नकर्त्तव्यानि। तथा तु न कृतमित्येव॥ ॥जसः शी॥ ॥दीर्घोच्चारणमुत्तरार्थमिति। इह तु तत्स्थाधिकारात् तुल्यो न भवितव्यमिति द्वित्वे पि सिद्धं। नच सर्वेषु त्रिणि इत्यत्र षत्वं तु कोऽसिद्ध इत्येकादेशस्यासिद्धत्वात् द्वयोः प्रापणेनि मित्तुकः प्रसंगः। तत्र हि पदांतपदाद्योर्यद्येकादेशस्तस्यैवासिद्धत्वं। ॥ओङ आपः॥ ॥ओङ इति निर्देशांङ्कि पमाणमनुकादप्रमा

॥ङसिङ्योः स्मात्स्मिनौ॥ ॥अकारांतात्सर्वनाम्नोगणादुत्तरयोर्ङसि ङि इत्येतयोः स्मात् स्मिन् इत्येतावादेशौ भवतः। ङसि इत्येत स्मात् ङि इत्येतस्य स्मिन्। सर्वस्मात् विश्वस्मात्। सर्वस्मिन् विश्वस्मिन्। अत इत्येवमवतश्च भवति। सर्वनाम्न इत्येवा वृक्षात् वृक्षे ॥ ॥पूर्वादिभ्यो नवभ्यो वा॥ ॥पूर्वादिभ्यो नवभ्यः सर्वनामभ्य उत्तरयोर्ङसि ङि इत्येतयोर्वा स्मात् स्मिन् इत्येतावादेशौ भवतः॥ पूर्वस्मात् पूर्वात् पूर्वस्मिन् पूर्वे। परस्मात् परात् परस्मिन् परे। अवरस्मात् अवरात् अवरस्मिन् अवरे। दक्षिणस्मात् दक्षिणा त् दक्षिणे। उत्तरस्मात् उत्तरस्मिन् उत्तरे। अपरस्मात् अपरात् अपरस्मिन् अपरे। अधरस्मात् अधरात् अधरस्मिन् अधरे। स्व स्मात् स्वात् स्वस्मिन् स्वे। अंतरस्मात् अंतरात् अंतरस्मिन् अंतरे। नवभ्य इति किं त्यस्मात् त्यस्मिन्॥ ॥जसः शी॥ ॥अकारां तात् सर्वनाम्नो गणादुत्तरस्य जसः शी इत्ययमादेशो भवति। सर्वे विश्वे। येते। के। दीर्घोच्चारणमुत्तरार्थं त्रपुणी जतुनी॥ ॥ओङ आपः॥ ॥आबंतादंगादुत्तरस्य ओङः शी इत्ययमादेशो भवति। खट्वे तिष्ठतः खट्वे पश्य। बहुराजे। कारीषगंधे। ओङो

रोपश्लिष्ठौ ङि· द्वी तौ ङि· चास्माकं नास्तिकोऽपं प्रकारः। सामान्यार्थ॥

स्पितिा ओकारोयमिति। कोयं प्रकारः कुत्सितोयं सूत्रप्रणयनप्रकारः सिद्धस्य ह्यनुवादत्वप्रयोजनं तेषां यथाङे र्यु इति। अयं तु न क्वापि सिद्धः इति परिहारः इति सामान्यार्थ इति। औत इत्युच्यमाने प्रथमाद्विवचनस्यैव स्यात् निरनुबंधकत्वात् तन्न सानुबंधकस्यौ ङः। पद्यपि ङकारः प्रत्या हारार्थत्वात् सानुबंधकस्याप्यस्य यानुबंधत्वमप्यविरुद्धमर्थी अपि हेतवो भवन्तीति। तद्यथा आम्राश्च सिक्ताः पितरश्च प्रीणिता इति। औत इत्युच्यमाने प्रथमाद्विवचनस्यैव स्यात्। तस्यानुयोरपि सामान्यग्रहणार्थो ङकारानुबंधनिर्देशः। न च सतोनुवादोनुपपन्न इत्याशेषस्तत्र प्रयोजनाभिधानमसंगतं। नैष दोषः। औटौ शौ ङि· तावेति विधिनाकपमस्यादेवादनुमास्यते तस्येदं प्रयोजनाभिधा

॥ ७॥
सारस्वतव्याकरणटीका
पम०
६

ानस्य चेति। तस्य ङकारानुबंधस्यासंजनेऽस्मिन्नेवं विज्ञायमाने ङित्कार्यं गात्रयस्येतन्ने एवं वा दिनस्तव श्यांशी स्वेपरतः प्रसक्तं। प्रसज्जतु
नाम तु तत्राह स दोष इति। दोष इत्यनेन सामानाधिकरण्यात् स इति पुल्लिंगनिर्देशः। परिहरति ङित्व इति। वर्णमात्रनिर्देशमिति विवक्षितं तत्र
भंगभयात्तस्यानेमात्रशब्दः प्रयुक्तः। पाठापरस्त्वत्र ङितीति यदनुवर्त्तनं मत्वर्थबहुव्रीहिः ङ इत्यस्येति किं तर्हि कर्मधारयः ङ् श्चासाविश्चेति। ततः
किमित्यत आह वर्णेयित्स्यादिति। यस्मिन्विधिस्तदादावल्ग्रहणे। अयं तावान् ङित्वमुपेत्य परिहार उक्तः ङित्वमेव तु नास्तीत्याह वर्णश्चा

तस्य चासंजनेऽस्मिन् ङित्कार्यं निश्यां प्रसक्तं स दोषः। ङित्वे विधाद्वर्णनिर्देशमात्रं वर्णे यत्स्यात्तत्र
विधानं तदादौ। वर्णश्चार्यते न ङित्वे पदोषो निर्देशोऽयं पूर्वसूत्रेण वा स्यात्॥ ६ ॥श्री४॥ ॥

यमिति। चशब्दो वार्थे वर्णो वायमित्येवं पाठः। ओङितीति वर्णो वायमुणादौ न प्रत्ययः। ङकारस्तु सुखमुखार्थो यथा ऋकारोऽविस
त्रदकारः। अंगाक्षिप्रमस्य प्रत्ययस्य तेन विशेषणाद ओकारांतस्य प्रत्ययस्येत्यर्थः। वर्णरूपतया चौकारस्य ग्रहणेऽसति द्वयोरप्योकारयोर्ग्रह
णं भवति। प्रत्ययविषयत्वादननुबंधकपरिभाषायाः। ङित्वे दोष इति। ङित्वे सति यो दोषः सोऽपि न भवति ङित्वस्येवाभावादित्यर्थः
। पूर्वेण वा परिहारेण स्यान्वयः। परिहारांतरमाह निर्देशोऽयमिति। पूर्वाचार्याणां हि सूत्रे दृश्यते दिवचने ओङिति यच्चैतेन तदाश्रये
णायं निर्देशः। तेन द्वयोरपि ग्रहणं भवति। न च ङित्कार्यप्रसंगः नहि पूर्वाचार्यानुबंधैरिह कार्याणि क्रियन्ते॥ ६ ॥ ७ ॥

॥जश्शसोः शिः॥ ॥कुंडानीति। जातिशब्दोऽप्ययं यदार्थप्रकरणादिनाज्ञातसमासारसूत्तापाते कस्यांअजतोवर्त्ततेतदाह जातिविवयएकवचनोभ
वतीतिसंख्यैकवचनादिति इत्यस्य भवति। अर्थप्रकरणाद्यभावे तु तत्र प्रसुप्तत्वं तसं ख्यैकवचनादिति किमर्थं द्वंद्वहातीति॥ ॥अष्टाभ्यः॥ ॥
कृताकारोऽष्टन् शब्दोऽग्रह्यत इति। कृताकारस्यानुकरणमष्टाशब्दोननु विभक्तौ लक्षणावशादाल क्तन मिस्यर्थः। कृताकारस्य ग्रहणं किमिति।
आलवतोनुकरणे किमिन्नाश्रित मिस्यर्थः। पदान्तं भवति तदेवयष्ट्या एषादित्युत्तरे। अष्टेति। कथं पुनरत्रात्वाभावः पावतानाहि। तद्धि धौ
विकल्पः संनिहितः इत्यत आह। तदेवेति। इहाष्टनइति कृतसंपष्ठ्याष्टन आविभक्ताविसत्र। एवं सिद्धे अष्टाभ्य इति निर्देशात्कृतात्वस्यानुक

नपुंसकाच्च॥ ॥नपुंसकलिंगात् अंगादुत्तरस्य औजः शीत्ययमादेशो भवति। कुंडे इति। ततः कुंडे यशपादधिनी मधुनी जतुनी
त्रपुणी॥ ॥जश्शसोः शिः॥ ॥नपुंसकलिंगादंगादुत्तरयोर्जस्शसोः इत्येतयोः शिरित्ययमादेशो भवति। कुंडानि तिष्ठन्ति
कुंडानि पश्य। दधीनि मधूनि त्रपूणि जतूनि। जश्शसहचरितस्य सुपः शसो ग्रहणादिह न भवति। कुंडशो ददातिवनशः
पश्यति॥ ॥अष्टाभ्य औश्॥ ॥अष्टाभ्य इति कृताकारोऽष्टन् शब्दो गृह्यते तस्मादुत्तरयोर्जस्शसोरौश् इत्ययमा
देशो भवति। अष्टौ तिष्ठन्ति अष्टौ पश्य। कृताकारग्रहणं किं अष्ट तिष्ठन्ति अष्ट पश्य। एतदेव कृतात्वस्य ग्रहणं ज्ञापकम
ष्टन आविभक्ताविसात्वविकल्पस्य। षड्भ्यो लुगित्यस्यापवादोऽनेनाष्टौ तस्मिन्निति रमारभ्यते। यस्तु सुपोऽधातुप्राति
पदिके सोरिति तस्मिन्नाते चाप्राप्ते चेति तेन बाध्यते अष्टपुत्रः अष्टभार्यः॥ ॥

णमिति तावल्लिश्वितं तस्यैवैतत्प्रयोजनं पदान्तं भवति तदेव यष्ट्या एषादिति। पदिचनित्समात्वं स्यात् कृतात्वस्यानुकरणमनर्थकं
स्यात् स्याव सीभावादिति भावः। ननु काष्टनो दीर्घादिति दीर्घग्रहणेनापसम र्थो ज्ञापितः। तद्धि ज्ञापकमिदं वा को वात्र विशेषः। इहेता
वद्वक्तव्यं। षड्भ्यो लुगित्यस्यापवादः इति। अस्यैवेत्यवधारणं इष्टव्यं। कास्यामाह ना प्राप्ते हीति। अयं हि लुगं वा कोऽसे
मासे च सर्वत्र प्राप्नोति। तस्मिन्नाप्ते चाप्राप्ते चेति। स हि समास एव प्राप्नोतिनतु वाक्ये। अष्टपुत्र इति। अतेरगान यिरिधीन्वहिसंो
लुग्वाधत इति वचनाद्याकाव स्थायामेव प्राप्तोऽप्योऽष्टानक्रियते। औश एकवाक्यानि वद्वा वाल्लुक्॥ ॥६२ ६॥ ६ ॥

नद्यंतग्रहणमत्रेष्यत इति। अंगाधिकारोत्तरस्य तत्तु नारवद् तस्य चेति वचनात्॥ यद्येवं यत्राष्टशब्दार्थ उपसर्जनं तत्रापि प्राप्नोत्यत आह प्रियाष्ट्न इत्यत्रेति। तथापि पुनरष्टात्वं न भवति तथा तद्धिधावेव वक्ष्यते॥ ॥षड्भ्यो लुक्॥ ॥षट्प्रधानादिति। षट्संज्ञकानामर्थः प्रधानं यत्र तस्मादित्यर्थः। प्रियषष इति। अन्यपदार्थप्रधानो यं बहुव्रीहिः। सर्वनामसंख्ययोरुपसंख्यानमिति निषेधः पूर्वनिपाते प्राप्ते प्रियस्येति प्रियशब्दस्य पूर्वनिपातः॥ ॥स्वमोर्नपुंसकात्॥ ॥सुरिति प्रथमैकवचनस्य ग्रहणं न तु सप्तमीबहुवचनस्य अमा एकवचने न साहचर्यात्। न ब्राह्मण

नद्यंतग्रहणमत्रेष्यते परमाष्टौ उत्तमाष्टौ। प्रियाष्टा नद्यस्य आत्वाभावादौत्वं न भवति॥ ॥षड्भ्यो लुक्॥ ॥षट्संज्ञकेभ्य उत्तरयोर्जश्शसोर्लुग्भवति। षट् तिष्ठन्ति षट् पश्य। समनवदश। षट्प्रधानान्नद्यंतादपि लुग्भवति परमषट् उत्तमषट्। परमपंच। यत्र तूपसर्जनं षट् तत्र न भवति प्रियषषः प्रियपंचानः॥ ॥स्वमोर्नपुंसकात्॥ ॥नपुंसकादंगादुत्तरयोः सु अम् इत्येतयोर्लुग्भवति। दधि तिष्ठति दधि पश्य। मधु तिष्ठति मधु पश्य। त्रपु जतु॥ न ब्राह्मणकुलमित्यत्र लुका त्यदाद्यत्वं बाध्यते एवं विप्रतिषेधेन नित्यत्वाद्वा। लुको हि निमित्तमतोमिति लक्षणांतरेण विहन्यते न पुनस्त्यदाद्यत्वेन वा यस्य च लक्षणांतरेण निमित्तं विहन्यते न तदनित्यं भवति॥ ७ ॥ ॥श्रीरामचंद्राय नमः॥ ४ ॥

कुलमित्यत्र परत्वात्त्यदाद्यत्वे कृते लुङ् न प्राप्नोतीत्यतोमित्यस्याभावेन बाधितत्वात्। न स्मात्त्यदादिभ्यश्चेति कल्प्यमत आह न ब्राह्मणकुलमित्यत्रेति। नित्यत्वाद्वेति। लुका त्यदाद्यत्वं बाध्यत इत्यनुषंगः। कथं पुनर्लुको नित्यत्वं यावतास्यदाद्यत्वे कृते अतोमित्यपवादविधानात्सोप्यनित्य एवात आह लुको हीति। यदि त्यतोमित्येनल्लस्यात्कारांतमर्थांगं लुको निमित्तं स्यादेव ततः किमित्यत आह यस्येति। त्यदाद्यत्वे तु लुक् कृते नैव प्राप्नोति न लुमतांगस्येति निषेधात्। यद्येवं तदापि लक्षणांतरेणैव बाध्यते नाभावत्वस्य प्रतिषेधः क

॥ गा अतोम्॥ गा अत्रामितिपदच्छेदे न तु मिति। तथा हि सति नित्वाघयाप्यमतइत्येव ब्रूयात्। किमर्थं पुनरत्र विधीयते न मकार एवोच्येत। इति
चेत्कस्य नेपाद्येः परत्वे सकारस्य मकारे कृते अमस्यमकारस्य संयोगान्तलोपे नैव सिद्धमिष्टं दीर्घप्रसंगस्तु सुपि चेति दीर्घः प्राप्नोति। न च
दीर्घविधाने संनिपातपरिभाषा प्रवर्त्तते दृष्टापेत्वादेव पिप्रसंगात्। तस्मादमेव विधेयः। अपर आह। आम्विधानसामर्थ्यादतिजरसमि
त्यत्र जरसादेशो भवतीति। तर्हि सांनिपातपरिभाषया जरसादेशस्याप्रसंगात्। अम्विधानं तु दीर्घबाधनेन चरितार्थमिति॥ ॥अड्
डतरादिभ्यः॥ ॥अद्डादेशो भवतीति। विवक्षितादेशरूपप्रतिपादनाय प्लुतत्वं न कृतं। कथं पुनर्ज्ञायते डित्यमादेश इति। यदि हि डित्व
स्याडुतरादिभ्यः पंचम्यादित्येव ब्रूयात्। किंपुनः कारणं स्यादेव दीर्घनिवृत्तिः प्रयोजनमुक्तं तेन त्वमोः स्यादेदृत्विति। एवं तर्हीति। पूर्वसूत्र

॥अतोम्॥ ॥अकारान्तान्नपुंसकलिंगादुत्तरयोः स्वमोरमित्ययमादेशो भवति। कुंडं तिष्ठति कुंडं पश्य। वनं तिष्ठतीति व
नं पश्य। मकारः कस्मान्न क्रियते दीर्घत्वं प्राप्नोति॥ ॥अद्डुतरादिभ्यः पंचभ्यः॥ ॥डतरादिभ्यः पंचभ्यो नपुंसकेभ्य उत्तरयोः
स्वमोरद्ड् आदेशो भवति। कतरत्तिष्ठति कतरत्पश्य। कतमत्तिष्ठति कतमत्पश्य। इतरत् अन्यत् अन्यतरत्। पंचभ्य इति किं नेमं
तिष्ठति नेमं पश्य। डित्करणं किं कतरज्जिष्ठती स्यात्र पूर्वसवर्णे दीर्घो माभूत्। इह तु कतरत्पश्येति स्थानिवद्भावादमि पूर्वत्वेना
प्तिसिद्धमिति। एवं तर्हि दकारादेश एव कस्मान्न विधीयते हे कतरदिति संबुद्धिलोपो माभूत्। अथ ज्ञप्त्यदमोदोषो निहत्ये डत
रादिषु। अड्डित्वादुतरादीनां न लोपो न च दीर्घता॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री२॥ ॥छ॥

विहितममनुवर्त्य डतरादिभ्य इति पंचम्याः षष्ठीप्रकल्प्यतत्येवामदकारो विधास्यत इति चोद्यार्थः। हे कतरदित्यत्र संबुद्धिलोपो मा भूदिति। अ
यं च दोषः पूर्वस्मिन्नपि पक्षे समानः। ननु च संबुद्धिलोपे हल्ङ्याब्भ्य इत्यतो ग्रहणमनुवर्त्तयिष्यते एङ्ह्रस्वादेः परस्य त्वमो ग्रकारस्य दकारे कृ
ते मकारस्य संयोगान्तलोपः तस्यासिद्धत्वान्नायमप्रसंगः। एवमदादेशो नाशंकः। पृथग्रहणमनुवर्त्तते हे कुंडेत्यमोऽपि न स्यादिति दोषः
तदिदमुक्तमप्यदमोदोष इति। संबुद्धिलोपे अप्रसंगे लुप्यते अमो न स्यादिति दोषः। अथ निवृत्तमपृक्तग्रहणं ततो निहत्ये डत
रादिषु दोषः। हे कतरदित्यादौ लोपः स्यादिति। तो डित्वाददड् आदेशविधानान्नस्य वाडित्वान्न संबुद्धिलोपः नापि पूर्वसवर्णदीर्घत्वमित्यर्थः॥
यदि पुनः पूर्वसूत्रविहितममनुवर्त्य तस्यैवादादेशो विधीयते तदा डित्वमकर्त्तुं॥

नेतराः ॥ ॥अतोमित्यस्यानंतरमेवेति। अमादेशएवाद्वन्द्वादेशस्यापवादो भविष्यति ततश्च नेति न वक्तव्यं भवतीति भावः॥ ॥
युष्मदस्मद्भ्यां॥ ॥शिलःशं सर्वादेशार्थमिति। आमयादेः परस्यैव स्यात्। ननु शाकारस्याकारवचने प्रयोजनाभावादाघनुसंहा
रेणाभित्रे लोकस्येति सकारस्याकारे सति अतो गुणादिति पररूपेणैव सिद्धमत आह। आमयथा हीति। आदेशइति यपदेशः आदेशः अप
देशः। पयादेशस्य प्रयोजनं नास्तीति भावस्तेन स्येवस्यादित्येव शब्दार्थः। किंतु नादेशव्यपदेशेन प्रयोजनेय तत्राप्यादेशेवस्यात तत्रा

नेतराच्छंदसि॥ ॥इतरशब्दात्तु तरयोः स्वमोश्छंदसि विषये अद्ड्डादेशो न भवति। मतमितरमंडं न जायते। वार्जघ्न
मितरच्छंदसीति किं इतरत्काष्ठं इतरत्कुड्यं। अतोमित्यस्यानंतरमितराच्छंदसीति वक्तव्ये नेतराद् इति वचनं योगविभा
गार्थं। एकतराद्धि छंदसि भाषायां च प्रतिषेध इष्यते। एकतरं तिष्ठति एकतरं पश्येति॥ ॥युष्मदस्मद्भ्यां ङसोश्
॥ ॥युष्मद् अस्मद् इत्येताभ्यामुत्तरस्य ङसः अश् इत्ययमादेशो भवति। तव स्वं मम स्वं। शिलःशं सर्वादेशार्थं। अ
मयाद्यादेशव्यपदेशप्रलब्धस्यार्थमादेशेन स्यात् ततश्च योचीसे तन्न स्यात्॥ ८ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥

दानतश्चेति। स्वर्थेचः पठितः तत्तोपादेशव्यपदेशाद्योचीति पलंन स्यात् पलाभावः प्रायाजनमादेशव्यपदेशस्य स्यादित्यर्थः॥ यो
चीत्यत्र युष्मदस्मदोरनादेश इति वर्तते ननु चानादेशोपाविभक्तिरित्येवं तत्र विज्ञायते न हि तदादिविधिरस्तीयतो नादेशादावि
ति विज्ञायेत ततश्च सत्यप्यादेशादित्वे विभक्तेरनादेशत्वात्स्यादेव यत्वमिति स्यर्थमेवाकारस्याकारविधानं। एवं मन्यते। सर्वे सर्व
पदादेशा इति न्यायेनादि विकारष्ठो यामि भक्तेरेवादेशो विधीयत इति विभक्तिरेवादेश इति। सर्वे सर्वपदादेशा इत्यत्र पदशब्देन सुप्ति
ङ् तमुच्यते किं तर्हि पद्यते गम्यते नेनार्थ इति पदं ततश्च पदवत्ति स्यत्र यथाति शद्वस्य तु शब्दो भवति तद्वदत्रापि ङः सोसेव विधीयत

ङे प्रथमयोरम्॥ ॥ङे इत्यविभक्तिको निर्देशः इति। प्रथमयोरिति प्रथमाद्वितीययोर्ग्रहणमिति वक्ष्यति न तत्र समासे सति बहुवचनप्रसं
गः इति भावः। साधान्यलक्षणाप्रथमार्थस्येहासंभवात्संनिवेशविशेषापेक्षया प्रथमस्य ग्रहणमिति तावन्निश्चितं। तिङ् प्रथमयोस्तु
युष्मदस्मद्भ्यामसंभव एव। तत्र प्रसयोर्ग्रहणं विभक्त्योर्वेति संशयः। यदि स्त्रीलिंगनिर्देशस्ततो विभक्त्योर्ग्रहणं पुलिंगनिर्देशे तु प्रत्यययोः।
तत्र निर्णयमाह प्रथमयोश्च विभक्त्योरिति। एतदेव स्पष्टयति प्रथमाद्वितीययोरिति। कथं पुनः प्रथमाशब्देन द्वितीयो लभ्यते साहचर्या

॥ङे प्रथमयोरम्॥ ॥ङे इत्यविभक्तिकोऽयं निर्देशः ङे इत्येतस्य प्रथमयोश्च विभक्त्योः प्रथमाद्विती
ययोर्युष्मदस्मद्भ्यामुत्तरयोः अम् इत्ययमादेशो भवति। तुभ्यं दीयते। मह्यं दीयते। प्रथमयोः। त्वं
अहं युवां आवां यूयं वयं त्वां मां युवां आवां॥ ॥श्रीः॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥

त्। ननु समकक्षत्वप्रयुक्तः शब्दो मुख्यो वृत्तिर्वा भवतु न जघन्यवृत्तिर्वा न पुनरुभयवृत्तिः सत्यं। प्रथमाद्वितीयासमुदाये जघन्यवृत्तिरेवा
यमुद्भूतावयवभेदेश्च समुदायशक्तिद्विवचनं। कथं पुनर्ज्ञायते विभक्त्योर्ग्रहणमिति द्वितीयायांचे त्वात्वविधानात्। नन्वादेशार्थ
मुच्यते अनादेशे युष्मदस्मदोरस्मादेशार्थसेव सिद्धत्वात्। यदि चात्र विभक्त्योर्ग्रहणं स्यादेवमस्यादेशार्थतो पपद्यते। ननु बपोवीति
यत्वबाधनार्थं तत्स्यात् यद्येनावत्प्रयोजनं स्याद्यत्वमेवायं विशिष्य ब्रूयात् योऽच्यपीति। अवि बिति प्रस्तावरेनाप्यकरत्निकता। यत

शसोन॥ ॥नत्वविभक्तिको निर्दिष्टः तथाच पूर्वसूत्रेणाप्राप्तस्याप्यनमः प्रतिषेध इति भाष्येणोक्तं। कः पुनः प्रतिषेधे सति दोषः यावताऽ
सिप्रतिषिद्धे पोवा। नियते प्राप्ते द्वितीयायां वेसात्वे कृते प्रथमयोः पूर्वसवर्णदीर्घत्वे कृते तस्माच्छसोनः पुंसीति नत्वेच युष्मानिति सिद्धये
व। सत्यं पुंसि सिद्ध्यति स्त्रीनपुंसकयोस्तु न सिद्ध्यति नत्वे तद्दर्शितं युष्मान्ब्राह्मणीः इत्यादि। अलिंगे वा युष्मदस्मदी इति। लिंगानुशासने
तथापाठात्। उदाहरणे तादेः पाठस्येत्यकारस्य नकारे सकारस्य संयोगान्तलोपः॥ ॥भ्यसोभ्यम्॥ ॥एत्वं प्राप्नोतीति। सुपिचेति दी

शसोन॥ ॥युष्मदस्मद्भ्यामुत्तरस्य शसो नकारस्यादेशो भवति। युष्मान्ब्राह्मणान् अस्मान्ब्राह्मणान्। युष्मान्ब्राह्म
णीः अस्मान्ब्राह्मणीः। युष्मान्ब्राह्मणकुलानि अस्मान्ब्राह्मणकुलानि। तस्माच्छसोनः पुंसीति सिद्धे स्त्रीनपुंसकार्थं
विवचनं। अलिंगे वा युष्मदस्मदी॥ ॥भ्यसोभ्यम्॥ ॥युष्मदस्मद्भ्यामुत्तरस्य भ्यसः भ्यमादेशो भवति। युष्मभ्यं दीयते। अस्म
भ्यं दीयते। भ्यमादेशे कृते शेषे लोपे च बहुवचने झल्येदिस्येत्वं प्राप्नोति न दृष्टं। अत्र पुनर्दृष्टान्तादविधिनिष्ठितस्येति वचना
त्व भवति। केचित्पुनरभ्यमादेशमेत्वस्यानिवृत्त्यर्थं कुर्वन्ति। येषां तु शेषे लोपष्टिलोपस्तेषामयमभ्यमादेशः उ एव। उदात्त
निवृत्तिरस्यादेरेव भवति॥ ॥पंचम्याअत्॥ ॥पंचम्या भ्यसो युष्मदस्मद्भ्यामुत्तरस्य अदित्ययमादेशो भवति। युष्म
द्गच्छति। अस्मद्गच्छति॥ ॥एकवचनस्य च॥ ॥युष्मदस्मद्भ्यामुत्तरस्य पंचम्या एकवचनस्य अदित्ययमादेशो भवति। त्व
द्गच्छति। मद्गच्छति॥ ६ ॥श्रीः॥ ॥छं॥ ॥छं॥ ॥

र्घस्याप्युपलक्षणमेतत्। अंगवृत्तेरित्यादि। अस्यार्थः पूर्वमेव समाम्नातः। केचिदित्यादि। येषां शेषे लोपोऽन्त्यस्य लोपः तेषामतो गुणोऽप
रस्य पत्वमेकादेशः स्वरश्च। एत्वनिवृत्त्यर्थमिति। अत्रापि दीर्घस्याप्युपलक्षणं। एत्वनिवृत्त्या चाकारोच्चारणस्यार्थवत्त्वात्सवर्णदी
र्घत्वं न भवति। येषां त्विति। अंतलोपपक्षे मतभेदः। भ्यमादेशो भ्यम आदेश इति। टिलोपपक्षे त्वयं भ्यमादेशः अभ्यमित्याहकारासि
द्धेः नन्वेवं स्वरे दोषः। अनुदात्तस्य च यत्रोदात्तलोप इत्यत्र कर्यात्वेनोधज्ञोंत उदात्तस्त्वं नोदात्तग्रहणमनुवर्त्तते तत्र भ्यमो तो
दात्तत्वं प्राप्नोत्यत आह उदात्तनिवृत्तिस्वरश्चेति। न तत्रांतग्रहणमनुवर्त्तते उच्चारणक्रमे प्रत्ययस्यावादेरेवोदात्तत्वं भवतीत्यर्थः

६

७का॰प॰१
१०

॥ साम आकं ॥ ॥ सामिति षष्ठीबहुवचनमागतसुट्कं गृह्यत इति । अंगसंज्ञानिमित्तस्याम्स्यासंभवात् ॥ ॥ अथ किमर्थमागतसुट्को गृ-
ह्यत इति । यद्यपि षष्ठीबहुवचनमागतसुट्कं गृह्यत इति प्रकृतमिह तु प्रसंगापेक्षया पुल्लिंगनिर्देशः नपुंसकलिंगमेव वा पठितव्यं । तत्र
न प्रयोजनप्रधानः प्रश्नः किं तर्हि युष्मदस्मद्भ्यां परस्यैवं विधस्यासंभवप्रधानः अत एवाह न ह्यादेशविधानकाले सुड् विद्यत इति । सुड्विधा-
नाज्जसेरसुमित्यत आदिरित्यनुवर्त्तते अकारान्तत्वं च युष्मदस्मदोः शेषे लोप इत्यंत्यस्य लोपे भवति कश्च शेष आदेशः अनादेशे यत्वात्
योर्विधानात् । आदेशत्वं चाकमादेशे स्यादिति भवति । न चास्य दीर्घत्वेनाकारान्तत्वं । सदा दीर्घत्वं प्रतिनिर्दिष्टपर्यंतास्य हादय इति स्मरणात् । तस्मा-

॥ साम आकं ॥ ॥ सामिति षष्ठीबहुवचनमागतसुट्कं गृह्यते । युष्मदस्मद्भ्यामुत्तरस्य साम आकमित्ययमादेशो भवति ।
युष्माकं अस्माकं । अथ किमर्थमागतसुट्कं गृह्यते न ह्यादेशविधानकाले सुड्विद्यते । तस्यैव तु भाविनः सुटो निवृत्त्यर्थं । आ-
देशे हि कृते शेषे लोपे च युष्मदस्मदोरकारान्तत्वात्सुट् प्राप्नोति । सत्यां निमित्ते न भूतत्वान्निवर्त्तते । दीर्घोच्चारणं सवर्णदीर्घार्थं । अ-
कमित्युच्यमाने ककारस्य करणमेव च निवृत्त्यर्थमिति ततो गुणोपररूपं स्यात् ॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥

ह्यादेशविधानकाले सुडागमो विद्यते । उत्तरकालं त्वादेशविधानकाले सन्न एव सुडुपादानं अथापि तस्योपादाने प्रयोजनमस्ति साहतस्यैव स्थितिः । य-
थ सुट्को गृह्येत ततः पूर्वोक्तेन न्यायेन पश्चाद्भवतः सुटः केन निवृत्तिः स्यात् ॥ अतर्हित्वादिति । तेन सहस्थानित्वे नोपादानसामर्थ्यादिति भावः ।
एतच्च पाक्षिकं प्रयोजनं कतरस्मिन्पक्षे । यदा शेषे लोपोऽन्त्यलोपः । यदा तु टिलोपः तदायश्चात्रापि सुटः प्रसंगाभावान्नैतत्प्रयोजनं । दीर्घोच्चार-
णमिसादि । अन्यथा तो गुणोपररूपत्वं स्यात् । न च काराेच्चारणसामर्थ्यान्न भविष्यति । अन्यथा कमेव विदध्यादित आह । कमितीति ॥ ॥छ॥ ॥

॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥

राम॰
१०

आतऔणलः॥ ॥पपाविवत्सादौ णलित्यस्थिते युगपत्त्रीणि कार्याणि प्राप्नुवंति। द्विर्वचनं सवर्णदीर्घत्वमेकादेशश्चौत्वमिति तत्र येन क्रमे
णैतानि कार्याणि निवर्त्यन्त इति दर्शयति अत्रेति। लिट्परत्वं तु नोपयुज्यते इति सर्वथा त्वौत्वं त्वासिद्धं। उक्तक्रमे हेतुमाहैकादेश इति। परिपूर्वमेकादेशः स्था
नवत्पूर्वस्याभावादौत्वं न स्यादिति नवकाशं तत्। परत्वादेकादेश इति। अत्र हि द्विरेकादेशस्तस्य स्थानिवद्भावाद् द्विर्वचनं। स्थानिवद्भावस्तु द्विर्वचने चौ
ति तत्र प्रचीतिन स्थानिवद्भावस्य निमित्तं निर्दिष्टः किंतर्हि जादेशस्य द्विर्वचन निमित्ते चिणे जादेश इति। तेन संप्रत्यच् परत्वाभावेपि स्थानिवद्भा

॥ ॥आतऔणलः॥ ॥आकारांताद्धातोरुत्तरस्य णलऔकार आदेशो भवति। पपौ। तस्थौ। जग्लौ।
मम्लौ। अत्र औत्वमेकादेशः औत्त्वेन स्यात् स्थानिवद्भावाद् द्विर्वचनमित्यनेन क्रमेण कार्याणि क्रियंते॥
एकादेशादनवकाशत्वादौत्वं द्विर्वचनादपि परत्वादेकादेश इति॥ ॥१०॥ श्री॥ ॥श्री॥

वो भवत्येव। औकारौकारयोर्लाघवे विशेषाभावात्प्रयोगसमवाय्यौकार एव विहितः। अपरस्त्वाह विपिति कश्चिदाकार औकारस्तस्योच्चारणे प्र
यत्नगौरवं भवति न द्विधानं दधि द्विस्पर्धे। ददरिद्रौ। अत्र दरिद्राते आर्द्धधातुके लोपो वक्तव्य इत्याकारलोपे प्यौकारस्य श्रवणं भवति। यद्यपि सिद्ध
श्रवणस्य विधावितिवचनात् लिटि विवक्षित एवाकारलोपे सत्यौत्वस्याप्रसंगः। यद्यपि वकारस्य नेकाज्ग्रहणं चुलुंपाद्यर्थमित्याभिसत्तिणल
एवासंभवः। तथाप्यौत्वविधानसामर्थ्याद्धूयमप्येतत्र भवति॥ ॥१०॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥

॥तुह्योस्तातङ्॥ ॥जीवतात्भवानिति। अत्र स्थानिवद्भावेन तातङो हिग्रहणेन ग्रहणात् तातो हेरिति लुक् प्राप्नोति। नैष दोषः। ङ्कारलस्योहेर्द्विरित
तु वर्त्तमाने च पुनस्तातो हेरिति हिग्रहणं हेरेव यो हि तस्य यथा स्यात् तथा विवक्षावे न यो हि तस्य मा भूदित्येवमर्थं। ङित्करणं मित्यादि। यद्यपि सर्वा
देशस्तातङ् गुणवृद्धिप्रतिषेधार्थत्वमनिश्चितं तथापि सर्वादेशत्वेऽपि ङित्त्वस्य प्रयोजनं तातङि संभवति। अनङादिषु नैवं सर्वादेशत्वे
प्रयोजनं संभवतीति तेषां धर्मार्थं ङित्वेषु ङिच्चेत्येतत् सहसा प्रवर्त्तते। तातङि तु प्रयोजनान्तरस्य संभावनया क्रियान्यपि विलम्बो भवति। तेनास्मि
न्विषये ङ्सर्वादेशार्थयोस्तुल्यकालप्रवृत्तिरित्यपवादे सति ङिच्चेत्येतद्बाधितं नैकाल्शित्सर्वस्येत्येतदेव परत्वात्प्रवर्त्तते इति भावः। एतच्च
ङिच्चेत्यत्र सम्यगुपपादितं। तत्र ब्रूतादित्यादौ गुणप्रतिषेधः। स्तृष्टादित्यत्र वृद्धिप्रतिषेधः। ङित्वाच्चेति। ननु च ङित्कार्यं भावं तु स्थानि

॥तुह्योस्तातङ्ङाशिष्यन्यतरस्यां॥ ॥तुह्योरिति। तेन प्रोक्ताशिषि विषये तातङादेशो भवत्यन्यतरस्यां। जीवताद्भवान्। जी
वतु भवान्। जीवतात्त्वं जीव त्वं। ङित्करणं गुणवृद्धिप्रतिषेधार्थं। मृष्टात् ब्रूतात्। सर्वादेशस्तातङ् भवति। ङित्वाच्चाप
स्थानिवद्भावाद्धात्वं प्राप्नोतीति तन्निवर्त्तते। ङिच्चापि न भवतीति। तेन ब्रूताद्भवानिति ब्रुव ईडिति ईण् न भवति। आशिषी
ति किं। अयं मंडः छत्तु भवान् गच्छतु। तातङि ङित्वं संक्रमकृतं स्यादृ ह्रस्वविधिश्च न स्वतत्थान॥ ॥श्री॥ ॥श्री॥

वद्भावप्राप्तासिद्धत्वासिद्धकार्यमपि को विरोधः। तत्राह ङिच्चापि न भवतीति वचनमिदं सार्वधातुकमपिदित्यत्र योगविभागेन कल्पितं ब्रु
व ईडिति। उपलक्षणमेतत्। तपदाङ्ग च्छ गत्वा। तरणाहस्त्र्य भवति। तातङि ङित्वमित्यादि श्लोकद्वयं व्याख्यायते। तातङि अवास्थितं ङित्वं सं
क्रमकृतं स्यान्न संक्रमो नाम गुणवृद्धिप्रतिषेधः। अहीं धीलिङ्। गुणवृद्धिप्रतिषेधकृङ्गविवृतुमर्हति। अस्तु विधिङित्वं। अस्तु विधिहे
तुत्वादर्थविधिर्ङित्वं करणमसाधनतो वा विधिशब्दः असंभव्ययथा स्यादित्येवमर्थं चेत् ङित्वमित्यर्थः॥ निराकरोति न च वत्तथानाचशब्दो वक्ष्य
माणे प्रतिषेधेन संबध्यते। तत्र ङित्वं न च स्यात् इति नैव कृतं मां। एतदुक्तं भवति स्थानं न रन्तिस्त्रोस्तातङाशिषीति कृतं मां। एषितो वा। एवं सिद्धे ङित्कर
णं गुणवृद्धिप्रतिषेधार्थमिति निश्चीयते। न च सर्वादेशत्वमन्तरेणात न प्रतिषेधार्थत्वं ङित्वस्य यद्यपि सर्वादेशस्तातङ् भवति

ननु चांत्यविधिश्चास्तु अत्र यत्रैव कृतं ङित्वमिति न्यायेन गुणवृद्धिप्रतिषेधार्थं चास्तु ङित्करणसामर्थ्यादित्याशंकापरिहारांतरमाह॥

हेरधिकार इति। अतो हेरित्यत्र लोपविधौ कुत्सलभ्यो हेर्द्धिरित्यतो हेरित्यधिकारे सस्येव यो यं हेरित्यधिकारः तं ज्ञापकमाह सूत्रकारस्तस्य हेतुत्व
योजनं हिरेव यो हिस्तस्य यथा स्यात् स्थानिवद्भावेन यो हिस्तस्य मा भूदिति तच्च सर्वादेशत्वेन सुपपद्यते। न तु हिरेव यो हिस्तस्य यथा स्याद्धिकृतो
यो हिस्तस्य मा भूदित्येतस्मादेशत्वे पि तातङ् हो हेरित्यधिकार उपपद्यत इत्याशंक्य साक्षात् परिहारमाह तातङो ङित्वसामर्थ्यादिति। ङित्वसामर्थ्या
ल्किलायमंत्यविधिः स्यात् तच्च सामर्थ्यं नास्ति सर्वादेशत्वेपि प्रयोजनसंभवात्। ततश्च पूर्वोक्तया रीत्या विप्रतिषेधात् सर्वादेश एव तातङ्भवति।

हेरधिकारो हेरधिकारो लोपविधौ तु ज्ञापकमाह। तातङो ङित्वसामर्थ्यान्नायमंत्यविधिः स्यात्तः। नन्तद्दा। नडादीनां तेन नतें
स्य विकारस्तः॥ ॥विदेः शतुर्वसुः॥ ॥विद ज्ञाने इत्येतस्माद्धातोः परस्य शतुर्वसुरादेशो भवति। विद्वान् विद्वांसौ विद्वांसः
।केचिदत्र नरसांग्रहणमत्रानुवर्त्तयंति तेन विदन् विदंतौ विदंतः। स्थानिवद्भावादुगित्कार्यं सिद्धं वसोःकारकरणं वसोः सं
प्रसारणमित्यत्र क्वसोरपि सामान्यग्रहणार्थं। एकानुबंधकग्रहणे न द्व्यनुबंधकस्येत्येतदपि न भवति। तथा सत्युकारकर
णमनर्थकं स्यात्॥ ॥११॥ ॥श्रीराम४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥

अनड्साविर्त्यादीनामनङ्गादीनां तु नैवं ङित्वसामर्थ्याभावः। तेन तेंस्य विकारस्तज्ज्ञाताः॥ ॥विदेः शतुर्वसुः॥ ॥विद ज्ञान इति। सत्ताविचा
रणार्थयोरात्मनेपदित्वेन शतुरसंभवः। लाभार्थस्य भूभयपदित्वेन शतुः संभवेपि तुदादित्वाद्धिकरणेन व्यवधानमिति ज्ञानार्थस्यैव लु
ग्विकरणस्य परस्मैपदिनो ग्रहणमिति भावः। क्वसोरपि सामान्यग्रहणार्थमिति। अन्यथा वसः संप्रसारणमित्युच्यमाने निरनुबंधकत्वा
द्वस्यैव ग्रहणं स्यात्। नन्वेवमप्येकानुबंधकत्वाद्वस्यैव ग्रहणं स्यात्तत्राह एकानुबंधकग्रहण इति॥ ११ ॥ ॥श्री४॥ ॥४४॥

॥समासेनञ्पूर्वे॥ ॥पूर्वशब्दोवयववचनः अनञ्पूर्वोवयवोयत्रसमासेसोनञ्पूर्वः। प्रकृत्येति। समानकर्तृकयोः पूर्वकालइतिक्त्वा। कु
गतिप्रादयइतिसमासः। ल्यपिकृतेह्रस्वस्यतुक्। पार्श्वतः कृत्वेति। आद्यादिभ्यस्तसिः। स्वाङ्गेतस्प्रत्ययेकृभ्वोरितिक्त्वा। तृ
तीयाप्रभृतीन्यन्यतरस्यांक्त्वाचेतिसमासः। नानाकृत्यद्विधाकृत्येति। नाधार्थप्रत्ययेच्व्यर्थइतिक्त्वा। पूर्ववत्समासः। कृत्वाहृत्वेति।
हृत्वेत्येतस्मुदाहरणं। अत्रकृत्वाशब्दोनञ्सदृशः पूर्वोस्तिसमुदायस्तुसमासोनभवतिपरमकृत्वेति। सन्महत्परमेत्यादिनासमासः। तु
मर्थाधिकाराद्वाविक्त्वाप्रत्ययः। यावन्मपिक्रियायाएवविशेषणमितिसामानाधिकरण्यं। कथंपुनरिदंप्रत्युदाहरणंयावतानाभवत्येवाय
मनञ्पूर्वः समासइत्यतआह अनञितिहीति। अनञ्इतियर्युदासोयं। तत्रनञिवयुक्तमन्यसदृशेनञ्सदृशमव्ययेचपरमादिकमनञ्

समासेनञ्पूर्वेक्त्वोल्यप्॥ ॥समासेनञ्पूर्वेक्त्वाइत्येतस्यल्यबित्ययमादेशोभवति। प्रकृत्यप्रहृत्य। पार्श्वतःकृत्य
नानाकृत्य। द्विधाकृत्य। समासइतिकिं। कृत्वाहृत्वा। अनञ्पूर्वइतिकिं। अकृत्वाअहृत्वा। परमकृत्वाउत्तमकृत्वा। अनञि
तिहिनञोन्यन्नञ्सदृशमप्यपर्युदासगृह्यतेतेननञ्अनव्ययंचानञ्नभवति। स्नात्वाकालकादिषुमयूरव्यंसकादि
षुनिपातनाल्ल्यबादेशोनभवति। अथवासमासइतिनिर्द्धारणसप्तमीतेनक्त्वान्तः समासएवनिर्द्धार्यते॥ श्री॥

भवति। असेहादनमयत्वाच्चस्नात्वाकालकइत्यादिष्विति। आदिशब्देनपीत्वास्थिरकइत्येवमादेर्ग्रहणं। पत्रोत्तरपदेक्रियानोपादीते
यतेतत्राध्याहृतक्रियापेक्षः क्त्वाप्रत्ययः। सापेक्षत्वेपिनिपातनात्समासः। निपातनाल्ल्यबादेशोनभवतीति। नग्राकारणिकः समास
एवतत्रनिपात्यतेकिंतर्हिपरलक्षणंनास्तितत्सर्वमितिभावः। निर्द्धारणेसप्तमीतिजात्यावेकवचनंअत्ययोवा। समासएवनिर्द्धार्यतइति।
निर्द्धारणंतुल्यजातीयापेक्षत्वात्। कथंपुनः समासः क्त्वान्तोगावताप्रत्ययग्रहणोपस्मात्सविहितस्तदादेस्तदन्तस्यग्रहणंनचस
मासात्क्त्वाविहितः। अथत्कृद्ग्रहणेगतिकारकपूर्वस्यग्रहणात्समासस्यक्त्वान्तता एवमपिप्रकृत्यपार्श्वतःकृत्येत्यादावेवस्यात् उच्चैः
कृत्येत्येवमादौतुनस्यात्। आगतिलादकारकत्वाच्चेत्याशंक्याह॥ ॥श्री॥ ॥श्री॥ ॥ ॥ ॥

सचेति। तत्र निर्दिश्यमानस्यादेशा भवंतीति क्त्वामात्रस्यैव ल्यब्भवति। ननु प्रत्ययविषये पूर्वेणापरिभाषाद्वये न तदंतविधिरप्रवस्था। न मुद्धये न वि
धिस्तदंतस्येत्यनेन तत्राह तथा चेति· कथं पुनरेतज्ज्ञापकमित्याह गतिकारकपूर्वस्यापीति· कथं नास्ति प्रसंग इत्याह नञ्गतिरिति· अदोज
ग्धिर्ल्यप्ति किती सत्रयदुक्तं जग्धो मि द्धमं न रंगत्वादित्याह तस्मा श्यति प्रधाय प्रस्थायेवमादिष्विति· के पुनरंतरंगा विधयः हित्वदत्वात्वे
त्वदीर्घत्वशइटः हित्वं दधातेर्हिः हित्वा प्रधाय दत्वं दोदद्घोः दत्वा प्रदाय· आत्वं जनसनखनां सञ्झलोः खात्वा प्रखन्य इत्वं घतिस्यतिमा
स्थामित्ति किति स्थित्वा प्रस्थाय ईत्वं घुमास्थागापाजहातिसां हलि पीत्वा प्रपाय दीर्घत्वं अनुनासिकस्य क्विझलोः क्ङिति शांत्वा प्रशाम्य श

सवयेन विधिस्तदंतस्येत्यनेन तदंतविधिनाग्रह्यते ननु कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति तथा वा नञ्पू
र्वश्चस्तुच्यते। गतिकारकपूर्वस्यैव तु ग्रहणे नञ्पूर्वस्य प्रसंग एव नास्ति नञ्न गतिर्न च कारकमिति। प्रधाय प्रस्थायेत्येवमा
दिषु हि प्रभृतीनंतरंगान पि विधीन्बहिरंगो ल्यब्बाधत इति ज्ञापितं॥ ॥क्त्वापि छंदसि॥ ॥ समासेनञ्पूर्वे क्त्वः क्त्वा
इत्ययमादेशो भवति अपि शब्दाल्ल्यबपि भवति छंदसि विषये· कृष्णं वासो यजमानं परिधापयित्वा। प्रत्यंच मर्कं प्रत्य
र्पयित्वा। ल्यबपि भवति उद्धृत्य जानुजुहोति॥ १२ ॥ ॥छ॥ ॥

इद्धोः शाइनुनासिके च छ्वोः शूठ् पृष्ट्वा प्रपृच्छ्य घूत्वा प्रदीव्य इदं देवित्वा प्रतिदीव्य अत्रेटि सति नक्त्वा सेडिति कित्वप्रतिषेधात् गुणः स्यात् पूर्वग्रहणं
किं अनत्री स्वेवोच्यमाने बहुव्रीहिः स्यात्· अविद्यमाना नञ्यस्मिन्त्सावनञिति तथा बहुव्रीहौ ष्यत्रापि प्रतिषेधः स्यात्। पूर्वग्रहणे
तु सति तस्यानेपत्तदेशावषवचनत्वान्नायं दोषः। लिङ्करणप्रचिकीर्षेत्यत्र प्रत्ययाः सर्वे सत्त्वर्थे। प्रकृत्येत्यादौ तु धातुस्वरेणैव सिद्धे
पि लिङ्करणं तु गर्थं॥ ॥क्त्वापि छंदसि॥ ॥ अपि शब्दाल्ल्यबपीति। स च समासे ऽसमासे च भवति। अप्राप्ति विषये ल्यपः प्रापणार्थत्वाद
पि शब्दस्य। अन्यथा वा छंदसीत्येव वाच्यं स्यात्। तथा च छंदो विधानमनुविदधानाः कल्पसूत्रकारा अपि प्रयुंजते आज्ये नाक्षिणी अञ्जयित्वा

॥ ॥ क्त्वा ॥ ॥ ५ ॥ ॥

॥सुपांसुलुक्॥ ॥सुशब्दस्यादेशाउप्रमानेऽप्यन्येसुपोनप्राप्नुवंतीति तस्मात्सुग्रहणमपनीयसुपांग्रहणंकर्त्तव्यमित्याह सुपांसुपइति॥ति
ङांतिङ इति ङ इति। एतच्चसर्वंबहुलमितिसिद्धं। सुपांसुपइत्ययमितरेष्वेवप्रपंचः। तक्षंती॥ति। तक्षत्सुवंतीतिप्राप्तेइतिनुसुक्तः पाठः। आ
र्द्रेचर्मन्निति। ननुचपूर्वसवर्णेनाप्येतत्सिद्धं कथं। चर्मन् इ इति स्थिते इकारस्यपूर्वसवर्णोनकारः तत्रपरतः स्वादिष्विति पदसंज्ञायां
सत्यांपूर्वस्यनकारस्यलोपः। तत्रायमप्यर्थः। नङिसंबुद्ध्योरित्यत्र ङिग्रहणंनकर्त्तव्यंभवति। अप्रातिपदिकत्वादेवविभक्तिनकारस्य
लोपाप्रसंगात् नपूर्वस्यतुनकारस्यैषएवलोपः। नैतदस्ति। अत्रहिपूर्वसवर्णेभवन्नांतर्यतो निरनुनासिकस्य निरनुनासिकोऽद्

सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः॥ ॥छंदसिविषयेसुपांस्थानेसुलुक्पूर्वसवर्णआआत्शेया
डाड्यायाच्आल इत्येतेआदेशाभवंति। सु। ऋजवःसंतुपंथाः। पंथानइतिप्राप्ते। सुपांसुपोभवंतीतिवक्तव्यं।
धुरिदक्षिण्यायाः। दक्षिण्यायाः। दक्षिणायामितिप्राप्ते। तिङांचतिङोभवंतीति। वक्तव्यं। चषालंयेअश्वयूपाय
तक्षति। तक्षंतीतिप्राप्ते। लुक्। आर्द्रेचर्मन्। लोहितेचर्मन्। चर्मणीतिप्राप्ते। हविर्धानेयत्सुन्वंतितत्सामिधे
नीरन्वाह। यस्मिन्सुन्वंतितस्मिन्सामिधेनीरितिप्राप्ते। पूर्वसवर्ण॥ ॥

काराएषस्यात्। अस्तुसंयोगांतलोपोभविष्यति। नात्रसंयोगांतलोपःप्राप्नोति स्वादिष्विति पदसंज्ञायांसत्यांपूर्वनकारस्यलोपेस
ति असंयोगांतत्वात्। नलोपोहिसंयोगांतलोपेसिद्धः। एवंतर्हिनङिसंबुद्ध्योरित्यत्रङिग्रहणंकरिष्यते तत्रनलोपाभावेसंयोगां
तलोपः तदेवमस्यासिद्धत्वादुदाहरणांतरमाह हविर्धानेयत्सुन्वंतीति। घत इतिस्थितेअत्रपरेपूर्वसवर्णोदकारः स्यात्स
दाघत्वेसतिस्यान्निवङावाक्षिप्त्यावः प्राप्नोतितस्मादत्रलुगेवकर्त्तव्यः। अनेकाल्शित्सर्वस्येतिसर्वस्यपूर्वसवर्णोपूर्वभाग
स्यश्रवणप्रसंगः तस्मादत्रापिलुगेवकर्त्तव्यः॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥छ॥

धीतीत्यादि। धीतिमतिसुष्टुतिशब्देभ्यस्तृतीयैकवचनस्य पूर्वसवर्ण ईकारः। सवर्णदीर्घत्वं नत्ता ब्राह्मणादिति। तच्छब्दाद्ब्राह्मणशब्दाच्च श
स्म्याद्यादेशः। न विभक्तौ तुस्मा इति इत्संज्ञाप्रतिषेधः। यादेव विभक्तान् त्वामहान्त मिति बहुवचः। एयं वयमिति प्राप्त इति। प्रमादपाठोयं। तथा
हि नपुंसके वाजबंधव इत्यत्र मंत्रे त्र्मक्षाश्वमेधनाम्नो एतो दानेस्तूयते। अस्यायेन बहुवचनं। वाजमित्यन्नानाम अन्नप्रदानेन सर्वेषां बंधव
स्तेषां संबोधने हे वाजबंधवः। युष्मे युष्मासु अधीत्यस्यानेन संबंधः सच समप्यर्थानुवादीनि निन्तुश्वनंदनशीलोपि मर्त्यार्थः युष्मा

धीतीमतीसुष्टुती। धीत्या मत्या सुष्टुत्येति प्राप्ते। आ। उभा यन्तारा। उभौ यंतारावितिप्राप्ते। आत्। न ता ब्राह्मणान्निंदामि। न
तान् ब्राह्मणानिति प्राप्ते। शे। नयुष्मे वाजबंधवः। अस्मे इंद्राबृहस्पती। युयं वयमिति प्राप्ते। यूयादेशो वयादेशश्च छांदसत्वा
न्न भवति। या। उरूया धृष्णुया। उरुणा धृष्णुनेति प्राप्ते। डा। नाभा पृथिव्या। नाभाविति प्राप्ते। ड्या। अनुष्ठ्यो आवयतात्।
अनुष्टुभेति प्राप्ते। याच्। साधुया। साध्विति सोर्लुकि प्राप्ते। आल्। वसंतायजेत। वसंते इति प्राप्ते। इया। उर्वियाज्ञीकारेण मु
पसंख्यानं कर्त्तव्यं। इया। उर्विया परिज्मानं। दार्विया परिज्मानं। उरुणा दारुणेति प्राप्ते। डियाच्। सुक्षेत्रिया सुगात्रुया। सुक्षे
त्रिणेति प्राप्ते। ईकारः। दृतिं न शुष्कं सरसी शयानं। सरसीति शयानमिति प्राप्ते। आङ्याजयाराणामुपसंख्यानं। आ डू। प्रका
बाहवा। प्रबाहुनेति प्राप्ते। आगनाच्। स्वप्नया। स्वप्नेनेति प्राप्ते। अपारः सनः सिंधुमिव नावया। नावेति प्राप्ते। अपा शिति
रेफउपोत्तमं दित्तीति उपोत्तमस्योदात्तार्थः॥१३॥ ॥छ॥ ॥

सुअवघांतधारयतिनाव धारयति अवघाभावादित्यर्थः। अस्मे इंद्राबृहस्पती इत्यत्रापि रयिंधत्तमिति क्रियापदस्यातिमन्नदानार्थः तस्माद्यु
ष्मासु अस्मास्वमिति प्रयुक्तः पाठः। यूयादेशस्यादपि नपठितत्वं। अनुष्टुभे तिमाप्त इति। अक्षिगुमे षेतुना अनुष्ठ्यो आवयतादिति। अनु
पूर्वीं तिष्ठतेरणतश्चोपसर्गइत्युङ्। अनुष्ठा नमनुष्ठातयानुष्ठ्या। प्रबाहवेति। घेर्ङितीति गुणः। ननु ङित्वे विधानार्थमन्तिर्देशमात्रं वर्णा
यस्मान्न चविधानं दाशविमुक्तं। सर्वाङि· त्करणसामर्थ्यान्न गुणः। प्रबाहुनेति प्राप्त इति। बाहुनेति तु प्रयुक्तः पाठः। प्रशान्द्रस्याल्वा
तेन संबंधात्। ज्ञपाचोङ्कारः सुपि चेति दीर्घनिवृत्त्यर्थः १३

७ का० प० १

१५

।।अमो मश्।। ।।अमिति मिबादेशो गृह्यते तदुक्तं। द्वितीयैकवचनस्य ग्रहणं न भवति। छन्दसि दृष्टानुविधानाद्ध्रस्वमात्रोच्चारणे बहुलत्वेन ति
ङो निर्देशात्। वधीमिति। हन्तेर्लुङ्। लुङि चेति वधादेशः। लेः सिच् इट् सिपो मश्भावः तस्य मश्यकार उच्चारणार्थः। अस्तिसिचोऽपृक्त इती
ट् इट ईटीति सिचो लोपः। सवर्णदीर्घत्वं। शित्करणं सर्वादेशार्थमिति। अन्यथा ह्यलोऽन्त्यस्येति मकारस्य स्यात्। मकारस्य मकारवचने
प्रयोजनाभावात् सर्वादेशो भविष्यति तत्राह मकारस्यापीति। यथा मोऽस्ति स मः क्वापि स्यात्रेति भावः। पंचमीनिर्देशाभावादादेः प

अमो मश्।। ।।अमिति मिबादेशो गृह्यते तस्य छन्दसि विषये मश् इत्ययमादेशो भवति। वधीं वृत्रं
क्रमीं वृक्षस्य शाखां। अवधिषं अक्रमिषमिति प्राप्ते। लुङि बहुलं छन्दस्यमाङ्योगेऽपीत्यडागमाभावः
।शित्करणं सर्वादेशार्थं। मकारस्यापि मकारकरणमनुस्वारनिवृत्त्यर्थं स्यात्।। ।।लोपस्त आत्मने
पदेषु।। ।।आत्मनेपदेषु यस्तकारस्तस्य छन्दसि विषये लोपो भवति। देवा अदुह्र। गंधर्वाप्सरसो
अदुह्र। अदुहत इति प्राप्ते।। ।।७।। ।।

रस्येत्येतन्न भवति। अथोच्यते ह्रिमकारकोऽयं निर्देशः करिष्यते तत्रैकस्य संयोगान्तलोपे पि वधीमित्यादि सिद्धमिति। एवमपि लाघवे
नास्ति विशेषः। किंच संयोगान्तलोपस्यासिद्धत्वादिट्लक्षणईटी न स्यात्। एवं तर्हि यकारादिः करिष्यते किं यकारेण श्रूयते एव लिलु
प्तनिर्दिष्टो यकारः नात्र किंचित्प्रमाणमस्ति तस्माच्छित्करणं।। ।।लोपस्त आत्मनेपदेषु।। ।।अदुह्रेति। दुहेर्लङ् झस्यादादेशः
बहुलं छन्दसीति रुट्। तकारस्य लोपे द्वयो रकारयो रोरि गुरोः पररूपत्वे।। ।।७।। ।।७।। ।।७ ७।। ।।७।। ।।

।।प्र०
१५

॥शये इति॥शेतरस्यत्रतलोपे कृते ऽधादेशः। दुहामितिं॥लोटू देरेतं आमेता तलोपः। अधात्यधिकारादिति॥एवं च्याम नेपदे षिति क्व नेतस्येवप्रयोगः॥ ॥यजध्वैनं॥ ॥वकारस्य यकार इति। बहुवास्तु वकारस्येवाधीयते तत्र मलोपमात्रं निपात्यं॥ ॥तस्य तात॥ ॥ लोण मध्यमपुरुष बहुवचन स्येति। प्रथमपुरुषैकवचनस्य तु ग्रहणं न भवति छंदसि दृष्टानुविधानात् पूर्वेत्तिराभ्यां बहुवचना भ्यां वा साहचर्यात्। कृणुतादिति। कृविहिंसाकरणयोः धिन्विकृण्योरुच्चेत्युप्रत्ययः वकारस्य चाकारः अतो लोपः॥ ॥तप्तनप्॥

दक्षिणतः शये।शेतर इति प्राप्ते। दुहामश्विभ्यां पयः। दुग्धामिति प्राप्ते। अधात्यधिकारान्नच भवति। ततएवात्मानमाह तं कुर्हते। आत्मनेपदेषु षिति किं। उत्तो दुहं तिकलशं चतुर्बिलं॥ ॥धमो धात्॥ ॥छंदसि विषये ध्मादिस्य धमादेशो भवति। अंतरेवोष्माणं वारय धात्। वारय धमितिं प्राप्ते॥ ॥यजध्वैनमिति च॥ ॥यजध्वमित्येतस्य एनमित्येतस्मि स्नमो मकारलोपो निपात्यते वकारस्य च यकारः छंदसि विषये। यजध्वैनं प्रियमेधाः। यजध्वमेनमिति प्राप्ते॥ ॥ तस्य तात॥ ॥तशब्दस्य लोण्मध्यमपुरुषबहुवचनस्य स्थाने तादित्ययमादेशो भवति। गात्रंगात्रमस्यानूनं कृणुतात्। कृणुतेति प्राप्ते। ऊवध्यं गोहं पार्थिवं खनतात्। खनतेति प्राप्ते। अस्माकं सः संसृजतात्। संसृजतेति प्राप्ते। सूर्यं च सुगमयतात्। गमयतेति प्राप्ते॥ ॥तप्तनप्तनथनाश्च॥ ॥छंदसि विषये तस्य स्थाने तप्तनप्तन थन इत्येते आदेशा भवंति। तनप्। शृणोत ग्रावाणः॥ शृणुतेति प्राप्ते। सुनोत सोमं। सुनुतेति प्राप्ते। तन प्। सं वरत्रा दधातन। धत्तेति प्राप्ते। तन। जुजुष्टन। जुषतेति प्राप्ते। छांदसः श्लुः। थन। यदिष्ठन। यदिच्छतेति प्राप्ते। पिलकर्णाम

॥श्रृणोतेति। श्नुः श्नेति श्नुप्रत्ययः श्रुभावश्च। पितेसति ङित्वाभावाद्गुणः। दधातनेति। अत्रापि ङित्वाभावात् श्नाभ्यस्तयो रित्याकारलोपाभावः। जुजुष्टनेति। मत्स्यपेन यरस्मै पदं तुदादित्वाच्छः। तस्य बहुलं छंदसीति। श्लुः द्विर्वचनं। जुषेरनुदात्तित्वा ज्जुषध्वमिति प्राप्ते इति तु पुजः। परः। यदिष्ठ तेति प्राप्ते इति। बहूचाः को वः स्तोमं राधतीत्यस्यामृचि यतिष्ठनेति पठंति। यति स्थनेति यद्कालेतत्रास्ते रूपं १४ ॥ ॥

७का·प८·१
१५

इदंतो मसि ॥ ॥ मसीत्यविभक्तिको निर्देशः। इकारस्तूच्चारणार्थः। अंतशब्दोऽवयववचनः। इत् अंतो यस्य स इदंतः। तपरकरणमसंदेहार्थं यदि तु स्युच्च
अमाने संदेहः स्यात् किं यकारांत इदंत इदंतो वेति। तत्र यदि कारोपमर्दे नेकारांतमभिप्रेतं स्यात् ममदः इति एव गा स्यात् न स्यादेव स्थितं एवं मकारस्य का
रउपजनः अंतग्रहणाच्च नन्दृहणान एतेनैतत्स्वदिलाद्दर्शनमलिंगस्याभावे यस्मिन्नर्थे दर्शनमोपेमं पच्यते तदिदं मुक्तं मसः मकारांतस्य स्यात्।

इदंतो मसि ॥ ॥ छंदसि विषये मसित्ययं शब्द इकारांतो भवति। मसः सकारांतस्य इडागमो भवति छंदसि। सघनस्यांतो भवति तद्ग्रहणे
न गृह्यत इत्यर्थः। पुनस्त्वा दीपयामसि। उद्दीपयाम इति प्राप्ते। शलभं भंजयामसि। भंजयाम इति प्राप्ते। त्वयि रात्रिं वसामसि। वसाम इति प्राप्ते॥
॥ क्त्वो यक् ॥ ॥ क्त्वा इत्येतस्य यगागमो भवति छंदसि विषये। दत्वाय। दत्वेति प्राप्ते। क्त्वापि छंदसीत्यस्यानंतरमिदं कस्मान्नोच्यते समा
स इति तत्रानुवर्त्तेत। ॥ इष्ट्वीनमिति च ॥ ॥ इष्ट्वीनमित्ययं शब्दो निपात्यते छंदसि विषये। यजेः क्त्वाप्रत्ययांतस्य ईनमादेशोंतस्य नि
पात्यते। इष्ट्वीनं देवान्। इष्ट्वा देवानिति प्राप्ते। पीत्वीनं सोमं। सोमं पीत्वेत्यपीष्यते॥ ॥ स्नात्व्यादयश्च ॥ ॥ स्नात्वीत्येवमादयः शब्दा
श्छंदसि विषये निपात्यंते। स्नात्वी मलादिव। स्नात्वेति प्राप्ते। पीत्वी सोमस्य वावृधे। पीत्वेति प्राप्ते। प्रकारार्थे यमादिशब्दः॥ ॥ आज्ज
सेरसुक् ॥ ॥ अवर्णांतादंगादुत्तरस्य जसेरसुगागमो भवति छंदसि विषये। ब्राह्मणासः पितरः सोम्यासः। ब्राह्मणाः सोम्या इति प्राप्ते।

।एवं च मम इति तिवक्तव्यं प्रत्याहारसंदेहप्रसंदेहप्रसंगात्तथानोक्तं॥ ॥ क्त्वो यक् ॥ ॥ दत्वायेति। दोदद्घोः। सोभागममस्येद त्वाय दत्वाय सम्यं द्रविणो
हमद्रमित्यादिमंत्रगतमुदाहरणं। दत्वाय सविता धियमिति क्वचित् पठ्यते। तत्रैतेन्निरीपकास्त्वायेति पठंति। क्त्वापि छंदसीत्यादि। एवं हि पुनः क्त्वाग्र
हणं न कर्त्तव्यं भवति॥ ॥ आत् ॥ ॥ जसेरिति पूर्वाचार्यानुरोधेन निर्देशः। ब्राह्मणास इति। असुकि कृते जसः सकारस्य अवर्णा असुकः सका
रस्य विसर्जनीयः॥ ॥७ ७॥ ॥७॥ ॥

पाम०
१५

।येपूर्वीसवृत्त्यादिदीर्घः। उपरामहति। अपरस्त्वाह स्यादेतत् काम्यच्छौसः। यदि पुनरयं पूर्वं तिः क्रियेत अस्य न स्यसुगिति। नैवं शक्यं अतो गुणेयात् परत्वं हि
स्यात्। अकारोच्चारणं तत्र तत्र दध्यस्यतीत्यादौ श्रवणार्थं स्यात्। सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमिति परिहारः। यद्यप्येतत्सर्वनामसंज्ञायाः पूर्वादिभ्यो नवभ्यो वेति विकल्प
नादेव सिद्धं उभयासोज्ञानवेदः स्यामेसत्र नुडाभावप्रसंगः। अत्र हि प्रथमचरमेति विकल्पे बाधित्वा सर्वादिषु पाठान्नित्या संज्ञा भवति सा हि नतङ्गा
।। ।।अश्वक्षीर।। ।।अश्वस्यतीति। असुकोऽकारः पूर्वत्र ब्राह्मणाम्बदित्यादौ चरितार्थः स्यात् तो गुणा इति पररूपत्वं प्रवर्तते तिनः कारइति क्रियमाणे सूपसंख्या

।येपूर्वासोऽपउपरामहत्स्यत्र परत्वादसुकि कृते पुनः प्रसंगविज्ञानाच्छीभावः प्राप्नोति सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधि
तमेवेति न भवति।। ।।अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि।। ।।छन्दसीत्यतः प्रभृति निवृत्तं। अश्वक्षीरवृषलवण
इत्येतेषामंगानामात्मप्रीतिविषये क्यचि परतोऽसुगागमो भवति। अश्वस्यति वडवा। क्षीरस्यति माणवकः। वृषस्यति गोः।
लवणस्यत्युष्ट्रः। आत्मप्रीताविति किं। अश्वीयति। क्षीरीयति। वृषीयति। लवणीयति। अश्ववृषयोर्मैथुनेच्छायामिति व
क्तव्यं। क्षीरलवणयोर्लालसायामिति वक्तव्यं। अत्रेतत् ख्यातिरेको लालसा। अपरस्त्वाह सर्वप्रातिपदिकेभ्यो लालसायाम
सुग्वक्तव्यः। दध्यस्यति मध्वस्यतीत्येवमर्थमिति। सुगपि वक्तव्यः। दधिस्यति मधुस्यति।। ।।१५।। ।।श्री४।। ।।

कारः। मैथुनेच्छायामिति। अश्ववृषयेच्छायदा मैथुनार्थाभवति न त्वारोहणाद्यर्थाः तदैवासुग्भवतीति। मैथुनेच्छापरत्वात्स्वप्रयोगस्याश्ववृ
षोपादानमतंत्रमिति मनुष्यादिविषयेऽपि प्रयुज्यत इति। गोमोऽहं वृषस्यन्तीमिति। लक्ष्यातिरेक इति। अभ्यवनिहीर्षातिरेकः। क्षीरलवणविषयः
लक्षातिरेकोपदाभ्यवहारार्थः। ननु होमाद्यर्थस्तदेतत्सर्वार्थः। सर्वप्रातिपदिकेभ्य इति। नाहर्शः एषा चतुर्थी सर्वप्रातिपदिकार्थे सर्वेषां प्रातिपदि
कानामित्यर्थः।। १५ ।। ।।

७का·प१०१

१६

॥आमि सर्वनाम्नः॥ ॥इमे वह्व्यः आमः उ· सआोसुआम उ· राम न धात्री ष्यः किमेत्रि ङ· अयधातो सुद्धमप्रकर्षेकाम प्रत्ययादाम मंत्रे लिटितेषु
कस्येरमामो ग्रहणमिसाह आमिति षष्ठी बहुवचनं गृह्यत इति। तस्याहि परत्वादिति। सुयेनु रेश्च षष्ठीबहुवचनमवकाशः आट्प्रभृतीनां चतुर्ण्
कवचनाद्दि उ· एमउभय प्रसंगे परत्वादाडागमो भवति नेयुक्तं तेषम कृतिनायाश्रयणात् सुपो न भवतः। यश्च द्वादाप्रुरिति। किमेत्रि उ·ष्प
यधातोर्म्निलेष· चस्त्वर्थो। तुरेव वा पठितव्यः। आमश्च लिटीति लिटि परतो यत् आम् कास्प्रत्ययो दिति विहित इत्यर्थः॥ न तौ सर्वनाम्नः परौ इत्

॥आमि सर्वनाम्नः सुट्॥ ॥आदिति वर्त्तते। अवर्णान्तात् सर्वनाम्न उत्तरस्याम सुडागमो भवति। सर्वेषां। येषां। के
षां तेषां। आदित्येव। भवतां। आमीति षष्ठी बहुवचनं गृह्यते न ङे राम्न धात्री भ्यः इति न स्पपरत्वात् ह्याट् स्यादेव
वं ति यश्च धातो मुराम श्च लिटि न तौ सर्वनाम्नः परौ स्तः सानुबंधकस्येति वा न गृह्येते। आमीति सप्तमी निर्देशे
उत्तरार्थः। इह तु सर्वनाम्न इति पंचमी निर्देशात्तस्मादित्युत्तरस्येति षष्ठी प्रकल्पिता भवति॥ ॥श्री०॥ ॥

इति· तेनात्र तावत्तयोरग्रहणं यस्य चात्र ग्रहणं तस्यैवोत्तरत्राप्यधिकार इति नु द्वियाव पितयोरग्रहणमिति भावः। आचारक्विबंतानां सर्वधित्वा
भावात्सर्वनाम्नो लिधामो संभवः। यत्तु भस्यतेरिह सामान्यग्रहणोस्मतिय थासंभवं प्रकारेकार्य प्रतिपत्तिः ततश्च तयो रपि नुट्प्रसंग इति तत्प्रति
परिहारांतरमाह· सानुबंधकावितिः सामान्यग्रहणे तु सतिय चेति तराम्मिस् त्रपस्येति लोपं बाधित्वा परत्वान्नुट्स्यात्। कार्याणां चिकीर्षितमि
त्यत्र तु नित्यत्वाद्याम् अंतेस्यादेशेः तो लोपेच कृते कृत्वाभागन्यास्तिनुटः प्रसंगः। उत्तरार्थमिति। त्रेस्त्रयः। सामिय इतीप आसम। इहा
तिति। पंचमी निर्देशात्त्वादित्यनुवृत्तेन सामानाधिकरण्यात् अवसीयते एव सीयते एवं च कृत्वा हलि सर्वेषामिति निर्देश उपपत्तिः॥ ॥छ॥

राम०

१६

।।त्रेस्त्रयः।। ।।त्रेरिति षष्ठी न पंचमी। तिसृणां त्रयाणामिति निर्द्देशात्।। ।।ह्रस्वनद्यापः।। ।।पंचमी ह्रस्वनद्याप इति नामीति लिंगात्। अन्यथा आमि
ति जस्य नामो न ह्यलि संभवः।। ।।षट्चतुर्भ्यश्च।। ।।पंचानामिति। नुटि कृते नोपधाया इति दीर्घः। नलोपः प्रातिपदिकांतस्य। षण्णामिति। प्रलो
नष्टोनं इति षकारस्य डकारः परोऽनुनासिक इति डकारस्य णकारः। ष्टुत्वं। अथ षष्ठी नाम इति रेफस्य प्रक्षेपः तेन रेफांताया अपि संज्ञा कस्मान्न
विहिता एवं सत्यत्र च तुर्भ्यः ग्रहणं न कर्त्तव्यं भवति तत्र याः षट्त्रिचतुर्भ्यो हलादिरित्यत्रापीत्यत आह रेफांताया इति। बहुवचननिर्द्देशादिति। शब्दस्या

।।त्रेस्त्रयः।। ।।त्रिइत्येतस्यामि परतस्त्रयइत्ययमादेशो भवति। त्रयाणां। त्रीणामित्यपि छंदसि दृश्यते। त्रीणामपि समुद्रा
णां युगांते सुसमागमः।। ह्रस्वनद्यापो नुट्।। ।।ह्रस्वांतान्नद्यंतादाबंताच्चांगादुत्तरस्यामो नुडागमो भवति। वृक्षाणां लक्ष्
णां। अग्नीनां वायूनां कर्तॄणां हर्तॄणां हर्तॄणां। नद्यंतात्। कुमारीणां गौरीणां शार्ङ्गरवीणां। लक्ष्मीणां ब्रह्मबंधूनां। आबं
तात्। खट्वानां शालानां बहुराजानां कारीषगंधानां।। ।।षट्चतुर्भ्यश्च।। ।।षट्संज्ञकेभ्यश्चतुःशब्दाच्चोत्तरस्यामो नुडा
गमो नुडागमो भवति। पंचानां सप्तानां नवानां षण्णां चतुर्णां। रेफांतायाः संख्यायाः षट्संज्ञा न विहिता षड्भ्यो लुगित्यादि
ति। बहुवचननिर्द्देशादत्र संख्याप्रधानस्य ग्रहणं भवति परमषण्णां परमचतुर्णां। उपसर्जनीभूतायां तु संख्यायां न भवति। प्रिय
षणां प्रियपंचां। प्रियचतुरां १६ ।।श्री।। ।।

धान्ये हीतरेतरयोगे द्विवचनेन भाव्यं समाहारद्वंद्वे त्वेकवचनेन भाव्यं अर्थप्राधान्ये तु षट्संज्ञका एव प्रत्येकं बहवर्थाश्चतुरशब्दश्चेत्युपपद्यतेव
हुवचनं। अत्रामः परत्वं शब्दद्वारकं परमं षण्णामित्यत्रापि षडर्थप्राधान्यात्तत एव परः आम् भवति बहुव्रीहौ त्वन्यपदार्थस्य प्राधान्यात्त
षडर्थापेक्षं परत्वमिति न भवति। प्रियपंचामिति। अल्लोपे कृते चुत्वं न कारः।। १६ ।। ।।श्री।। ।।श्री।। ।।श्री।।

॥श्रीग्रामण्योः॥ ॥नित्यार्थं वचनमिति। अन्यथा भाषायामिव विकल्पः स्यात्। छंदसि तु उवङ् दृश्यते तस्य च लक्षणमस्ति कोयं विकल्पप्रसंग
इति विंस्यमेतत्। सुतरां श्रुतेश्च ग्रामण्यश्चेति। नेदं कर्मधारयस्य वाक्यं किं तर्हि बहुवचनांतयोर्यदेतरेतरयोगे द्वंद्वस्तदा नुड्विधेः प्रयोजनं। यदैक
वचनांतयोः समाहारद्वंद्वं कृत्वा एकशेषः क्रियते तदा ह्रस्वांतत्वादेव नुट् सिद्ध इति न प्रयोजनमिति दर्शयति। एवं च ते शब्दो न पठितव्यः। अ
त्रापि नुडेव चेद्दृश्यते तस्य च निर्वाहो भिन्नेतरेतरयोगद्वंद्वेन करिष्यते तदैवमिदं सूत्रं भाष्ये प्रत्याख्यातं॥ ॥गोःपादांते॥ ॥छंदसीत्यधिका

॥श्रीग्रामण्योश्छंदसि॥ ॥श्रीग्रामणी इत्येतयोः उत्तरस्यामश्छंदसि विषये नुडागमो भवति। श्रीणामुदारो धरुणो रयीणां।
अपि तत्र सूतग्रामणीनां। श्रीशब्दस्य वामीति विकल्पेन नदीसंज्ञा। नित्यार्थं वचनं॥ सूतग्रामणीनामिति यदा सूताश्च ते ग्रा
मण्यश्चेति सूतग्रामण्यो भवंति तदर्थमिदं वचनं। यदा तु सूतश्च ग्रामणीश्च सूतग्रामण्यौ सूतग्रामण्यौ च सूतग्रामण्यौ च सूत
ग्रामण्यौ च सूतग्रामणीनां तदा ह्रस्वांतत्वादेव सिद्धं तस्मान्नारंभणीयं॥ ॥गोःपादांते॥ ॥गोरित्येतस्मात् ऋक्पादांते वर्तमाना
त्परस्यामो नुडागमो भवति। विद्मा हि त्वा सत्पतिं शूर गोनां। पादांत इति किं गवां गोत्रमुदसृजो यदंगिरः। सर्वविधयश्छंदसि विकल्प्यं
त इति पादांतेपि क्वचिन्न भवति। हंतारं शत्रूणां कृधि विराजं गोपतिं गवां॥ ॥इदितो नुम् धातोः॥ ॥इदितो धातोर्नुमागमो भव
ति। कुडि कुंडिता। हुडि हुंडिता। कुडा कुंडा। नुमागमो यं धातूपदेशावस्थायामेव भवति कुंडा कुंडेति गुरोश्च हल इति अप्रत्ययोप
यास्यात्। तथा हि धिवि विदृणाकोरोश्चेति प्रत्ययविधावेव नुमनुषक्तयोर्ग्रहणमिति। ॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥

राद्धक्पादस्यैव ग्रहणं न श्लोकपादस्येत्याहु ऋक्पादांत इति॥ ॥इदितो नुम्॥ ॥कुडि दाहे हुडि संघाते। अंगाधिकारान्नुमयं प्रत्यये परतो भ
वेत्। कुंडेत्यादौ तत्र श्रक्ति न स्यात्ताकारो गुरोर्हल इत्याशंक्याह नुमागमोयमिति। अत्र प्रमाणमाह तथा हीति। कथं पुनरेतज्ज्ञापकं यावता
इकश्तिपौ धातुनिर्देशे वक्तव्याविति इक्प्रत्यये कृते अंगसंज्ञायां सत्यां नुमागमस्य प्रसिद्धैवेति लक्षणवशादेव नुमनुषक्तयोर्ग्रहणं कर्तव्यं। ए
वं सत्यनेनापि मिका निर्देशः किं तर्हि अंगनुकेनेकारेण तत्राप्राप्तो नुमिति। नात्र किंचित्प्रमाणमस्तीत्याशंक्याह॥ ॥श्री४॥ ॥७॥ ॥

धातुग्रहणं चेति। धातुत्वमेवापेक्षितं न त्वङ्गत्वमित्येवमर्थं धातुग्रहणं नात्र किंचित्प्रयोजनमस्तीति भावः। ननु च भेत्तास्म भेत्सीदित्यत्रापि धा
तोरत्ता सिसिचोरिदिति नोनुम् निवृत्त्यर्थं धातुग्रहणं स्यादत आह नासिसिचोरिति। ननु चामंस्त मादौ आत्मनेपदं इति न मपि स्त्रसिन्नं तस्यानिटित्वा
मिति लोपो माभूदित्येवं सिचीति कार्यं स्यादित्यत आह अमंस्तेत्यादाविति। यथाह नःसिति जितिकित्वविधानमस्य लिंगं तथा तत्रैव प्रतिपा
दितं। नामेस्तृहीं इत्यत्र णामंतेसादौ आत्मनेपदैकवचने स्यादुपदेशे कृते इति लोपे च मनेन आर इति स्थिते नकारस्योपधालोपो माभूदित्येवमर्थं
स्यादत आह मंतेस्त्रेति। नकारलोपो न भवतीत्यनुषंगः जयादिस्थस्तु आभीयमासिद्धत्वमनित्यमाश्रित्य नामेरिरित्युणामनुनासिकलोप

धातुग्रहणं चेह क्रियते तद्धातुसंज्ञाप्रवृत्तिकाल एवनुमथा स्यादिति· नासिसिचोरिदित्कार्यं नाह्नीत्युच्चारणा
र्थो निरनुनासिक इकारः पठ्यते· अमंस्तेत्यादौ हि हनःसिजितिकित्त्वविधानसामर्थ्याल्लकारलोपो न भवति· मं
तेस्तत्राप्यसिद्धवदत्राभादिति रिलोपस्यासिद्धत्वात्· छेत्ता भेत्तेति इरितां समुदायस्येत्संज्ञेति इदित्वं नास्ति· अ
वशेऽपि इत्संज्ञायां सत्संयोगःपाठान्तरेऽप्यतो न ग्रहणमनुवर्त्यपि तत्र्यं नेदितो धातवो इत्युच्यते॥ ॥शेमुचादीनां १७

प्रतिषेधार्थमित्युक्तो चतत्त्वमते धातुग्रहणं नास्तीति इत्यर्थं कर्तव्यमिति उपदेशे नुम् भवतीत्यत्र यत्नांतरमाश्रयेयम्॥ इह मिदिर प्रभृतिषु इकार
उपदेशेऽननुनासिक इदितो नेत्संज्ञारोपस्यापि हलंत्यमिति तत्र नेदिता नुम् प्राप्नोतीत्यत आह भेत्तेति। इरितामिति। इरितामिर उपसंख्यानमिति उप
संख्यानिकी समुदायस्येत्संज्ञा न प्रत्येकं सौत्रीतत आनिदितां नुम् न भवतीत्यर्थः। नन्वेवमपि स्वरितेत्त्वनिबंधनमात्मनेपदं न प्राप्नोति भि
दिरप्रभृतिषु तस्मात्प्रत्येकपक्षे परिहारो वाच्य इति मत्वा प्रत्येकपक्षे परिहारमाह अवयवयोऽपीति। अपर आह इरितइति नायं बहुव्रीहिः
किं तर्हि कर्मधारयः न तत्र वर्णग्रहणमिदं भवति तत्र यदंतविधिनेत्संज्ञकेकारांतस्य धातोर्नुमिति अत्र येदितो धातवो नुम नुषक्ता एवके
स्मान्नपठिताः एवं हीदं न कर्तव्यं भवति। नुमग्रहणं तावदिन्नरार्थं कर्तव्यं इदितो च भूयत्वात्प्रत्येकं नकारोच्चारणादिदमेव सूत्रे लघीयः १७

॥शे मुचादीनां॥ ॥मुचादयो मुच्ल मोक्षणादयस्तृम्फन्तास्तुदादिषु गणपठिता द्रष्टव्याः॥ के पुनस्तृम्फादय इति। अवस्थावाचिना आदिशब्देन निरनुषङ्गाणामपि ग्रहणं प्रसङ्गात्। तृम्फः। प्रकारवाची आदिशब्दः प्रकारश्च सादृश्यं तच्च नकारानुषक्तत्वेन। तृम्पादिसानुषङ्गाणां पुनर्नुम्विधिः फलेनैव सति प्रसङ्गे नकारस्यानुस्वारपरसवर्णयोः कृतयोर्निकारमकारयोः॥ अनुवादाप्रसङ्ग इत्यलमाह्नेषामिति। अथास्मिन्नुमोपि लोपः कस्मान्न भवतीत्यत्राह श्वेति। विधानसामर्थ्यादिति। अयं च मुचादिषु श्वलोपाभावस्य हेतुः। तृम्फादिषु तु परस्य नकारलोपस्य चित्त्वेन लुङ्‌सापेक्षासिद्धत्वाद् वा पूर्वस्य नकारस्य लोपाभावः सिद्धः। अथ मुचादिषु वक्तव्यात् व्याख्यातः स्यात् तत्राह एवेति। अयमभिप्रायः। सानुषङ्गाणां निरनुषङ्गाणां तत्रार्थ

॥शे मुचादीनां॥ ॥शे प्रत्यये परतो मुचादीनां नुमागमो भवति· मुंचति लुंपति विंदति लिंपति सिंचति निकृंतति खिंदति पिंशति· शे इति किं· मोक्ता मोक्तुं· मुचादीनामिति किं· तुदति नुदति· शे तृंफादीनामुपसंख्यानं· के पुनस्तृंफादयः· तृप तृंफ तृप्तौ· दृप दृंफ उत्क्लेशे· गुफ गुंफ ग्रंथे· उभ उंभ पूरणे· शुभ शुंभ शोभार्थे· इत्यत्र ये सानुषंगाः पठ्यंते तेषामनिदितां हल उपधायाः क्ङितीति नकारलोपे कृते नुम् विधीयते स च विधानसामर्थ्यान्न लुप्यते· तृंफति दृंफति गुंफति उंभति शुंभति· ये तु निरनुषंगास्तेषां तृपति दृपति गुफति उभति शुभति इत्येव भवति॥ ॥मस्जिनशोर्झलि॥ ॥मस्जिनशि इत्येतयोर्झलादौ प्रत्यये नुमागमो भवति· मङ्क्ता मङ्क्तुं मङ्क्तव्यं· नंष्टा नंष्टुं नंष्टव्यं· झलीति किं· मज्जनं नशनं· मस्जेरंत्यात्पूर्वो नुममिच्छंत्यनुषंगसंयोगादि
वानिवृत्त्यानुषंगलोपार्थं॥ ॥७१॥ ॥४॥ ॥३॥ ॥

निर्देशः तत्र यदि सर्वे मुचादिषु पठ्येरन् निरनुषङ्गाणामपि नुम्प्रसङ्गः सानुषङ्गाणां निष्फलत्वात् पृथक् निर्देशेन गौरवप्रसङ्ग इति॥ ॥मस्जिनशोः॥ ॥मङ्क्तेति टुमस्जो शुद्धौ तस्य एकाच इतीट्प्रतिषेधः। अन्त्यात्पूर्वो नुम्। स्कोः संयोगाद्योरन्ते चेति सलोपः। कुत्वं अनुस्वारपरसवर्णौ। नंष्टेति। रधादिभ्यश्चेतीड्भावे पक्षे नुम्। मज्जनमिति। जकारे परतः सकारस्य श्चुत्वे जश्त्वे च सति तेन श्चुत्वस्यासिद्धत्वात् सकारस्य जश्त्वं जकारः। मस्जेरित्यादि। पदं सादृश्यं परस्यान्त्यादन्तर्मनानां समुदाय संयोगसंज्ञेति सकारस्य संयोगादिलोपो न स्यात् अन्यापि नयोः पृथक् संयोगसंज्ञा मा भूत् सलोपः स्यादेवमपि तस्य लोपस्यासिद्धत्वात् नकार उपधा न भवतीति नलोपो न स्यात् तस्मात् जकारात्पूर्वः सकारयोर्मध्ये नुमेषितव्यः॥ ॥

॥ रधिजभोः॥ ॥रधादिः सामर्थ्यात्पञ्चम्योः जभजृभीगात्रविनामे इहास्य नुमो ऽवकाशो रन्धनं रन्धयतुरित्यादि। अत उपधाया वृद्धेरवकाशः पाचकः रंधक
ती त्यादावुभयप्रसंगे परत्वाद्वृद्धिः प्राप्नोति तत्राह परापि सती ति। वृद्धिस्तु नुमि कृते न प्राप्नोति अकारस्यानुपधात्वादित्यनित्यास्द्धेति। रधादिभ्य
श्चेति पक्षे इडभावः सम्बस्त छोर्धोध इति जश्त्वम् एस्य धत्वम्। इह जभेरचि। रधो लिटि चेति रीति सूत्रन्यासः कर्तव्यः तथा तु न कृतमित्येव॥ ॥नेघलिटि॥
॥नुमि कृते इत्यादि। ननु चेरिसति नुमाभवितव्यं प्रागेव चेटः कित्वं प्राप्नोति न चालिटीत्यस्यैवाप्यर्थः पल्यर्थवत्वात्। एवं नर्हि ध्यातोरिति नुदर जेर्हयदेशाए

॥ ॥रधिजभोरचि॥ ॥रधजभर्सेतयोरजादौ प्रत्यये परतो नुमागमो भवति रंधयति रंधकः साधुरंधी रंधरंधं रंधोवर्त्तते जं
भयति जंभकः साधुजंभी जंभं जंभं जंभो वर्त्तते। पराप्यसती वृद्धिर्नित्यत्वान्नुमा वाध्यते अवीति किं रद्धा जब्धं॥ ॥नेघलिटि
रधेः॥ ॥रधादावलिटि प्रत्यये परतो रधेर्नुमागमो न भवति रधिता रधितारं रधितुं रधितव्यं। इटीति किं रंधकः। अलिटीति किं र
रंधिव रंधिम। नुमि कृते संयोगान्तत्वात् कित्वं नास्तीति नकारलोपो न भवति। अथ कस्मात् कथं भविन्नरंधे रेधिवानिति। क
थं एत्वाभ्यासलोपयोः कृतयोरिडागमः तत्र कृते नुमागमः तस्यौपदेशिकत्वाभावाद् अन्यो लोपः अथ इटि लिटीत्येवं नियमः
कस्मान्न क्रियते लिट्येव इति नात्रेति विपरीतमप्यवधारणं संभाव्येत इधेवलिटि नान्यत्रेति तथाहि रंधेस्तत्र न स्यात् र
द्धेति। रधग्रहणं इत्यत्र नुम्स्यादेव॥ १८ ॥ ॥छ॥

वनुम भवति। अचीत्येषा तु विषयसप्तमी। अर्थे ति। येषां छान्दसः कसुस्तेषामेष विचारो नास्ति छन्दसि दृष्टानुविधानात्। एत्वाभ्यासलोपयोः कृ
तयोरिति। वस्वेकाजाद्घसामित्यत्र कृतद्विर्वचनानामेकाचां ग्रहणादेवमुक्तं। तत्र कृते नुमागमः इति। अचीति वचनात्। तस्येत्यादि। यद्यपि रंधिवे
त्यादिवत् कसावप्यातिदेशिकं कित्वं नास्ति तथाप्यौपदेशिकं कित्वमस्ति इति न लोपो भवतीत्यर्थः अपेत्यादि। एवं सति नेघलिटीति सावधिप्र
तिषेधो न वक्तव्यो भवत इति भावः। विपरीतमवधारणं संभाव्येतेति। एवकारे तु क्रियमाणे न लाघवे विशेषः॥ ॥ १८ ॥ ॥छ॥ ॥

रभेरशब्लिटोः॥ ॥रभराभसे अनुदात्तेत्॥ ॥लभेश्च॥ ॥डुलभष् प्राप्तौ॥ अनुदात्तेत्॥ लंभो वर्त्तत इति। उपसर्गादिवचलघञोरितिवत्समाहारद्वन्द्वात्पाठो यं। खलो घञ् चेति चकारात्कृत्याः पदमिति वक्तव्यप्रत्ययः। लोके। योगविभाग उत्तरार्थ इति। उत्तरो विधिर्लभेर्यथा स्यात् रभेर्मा भूत्। किं च शब्लिटोर्यथा स्यात् शप्लिटोरसार्थश्च॥ ॥आङो यि॥ ॥अत्र धातोरित्यनुवृत्तेरुपदेशावस्थायामेव नुमा भवितव्यं। तस्माद्यीति विषयसप्तमी स्याद्यकारादौ प्रत्यये विषयइति। प्राशंसादिनाविषयसप्तम्या अयमाशस्फलं दर्शयति। तत्रोत्सादिः। रूपे तु नास्ति विशेषः। एकप्रत्यये यि इष्टप्रत्यये यि इष्टस्याने वभवि

रभेरशब्लिटोः॥ ॥रभेर्धातोरशब्लिटोर्जित्यजादौ प्रत्यये परतो नुमागमो भवति। आरंभयति। आरंभकः। साध्वारंभी। आरंभमारंभं आरंभो वर्त्तते। अशब्लिटोरिति किं। आरभते। आरेभे। अचीत्येव। आरब्धा॥ ॥लभेश्च॥ ॥लभेश्च धातोरशब्लिटोरजादौ प्रत्यये परतो नुमागमो भवति। लंभयति। लंभकः। साधुलंभी। लंभंलंभं। लंभो वर्त्तते। अशब्लिटोरित्येव। आलभते। आलेभे। अचीत्येव। लब्धा। पृथग्योगकरणमुत्तरार्थं॥ ॥आङो यि॥ ॥आङ उत्तरस्य लभेर्यकारादौ प्रत्ययविषये नुमागमो भवति। आलंभ्या गौः। आलंभ्या वडवा। प्राक्प्रत्ययोत्पत्तेर्नुमि कृते विहतमनुपधत्वमिति। आहलोऽर्यदिति एयत्प्रत्ययः। तत्र कृते तत्पदप्रकृतिस्वरत्वोऽनन्तस्वरत्वेऽनंतस्वरितत्वं भवति। यति तु पुनः कृते तत्पदाद्युदात्तत्वं स्यात्। आङ इति किं। लभ्यः। अनुपधत्वाद्यत्प्रत्ययांतमेतत्। यीति किं। आलब्धा। कथमग्निष्टोमे आलभ्यत इति। सर्वे विधयश्छन्दसि विकल्प्यंत इति। अथवा आलभ्यत इति नुमि कृते नुषंगलोपः क्रियते॥ ॥उपात्प्रशंसायां॥ ॥उप उत्तरस्य लभेः प्रशंसायां गम्यमानायां यकारादौ प्रत्ययविषये नुमागमो भवति। उपलंभ्या भवता विद्या। उपलंभ्यानि धनानि। राजतः प्रत्ययांतत्वात्तस्वरितत्वमेव। प्रशंसायामिति किं। उपलभ्यमस्माद्वृषलात्किंचित्। पोरदुपधत्वाद्यत्प्रत्ययांतमेतत्॥ ॥

न यान्ति लेश्चमिसाति विहतनिमित्तत्वात्। यति पुनः कृते तत्पदाद्युदात्तत्वं स्यादिति। पतोनावद् सुत्तरपदाद्युदात्तत्वात्। आलभ्यत इति यक्। अनुषंगलोपः क्रियत इति। एतेन पक्षद्वये व्याख्यातौ। जेनपी ति सामान्येनोक्ता वर्णरिपदेवो दाहृत इति भावः॥ ॥उपात्प्रशंसायां॥ ॥अत्रापि देवधात्वर्थः॥ प्रशंसा तु गम्यमानतया विशेषणमतो यस्य संप्राप्तिर्यतो वा प्राप्तिः प्रशंसाहेतुर्भवति तत्रोदाहरणं विपर्यये तु प्रत्युदाहरणं॥॥

॥ उपसर्गात्खल्घञोः ॥ ॥ सिद्धे सतीति लभेश्चेत्यनेनोपसर्गादेवेति । विपरीतस्तु नियमो न भवति उपसर्गात्खल्घञोरेवेति । गृधिवंच्योः प्रलंभ-
न इति निर्देशात् ॥ ॥ न सुदुर्भ्याम् ॥ ॥ केवलशब्दः शब्दोपात्तादन्यस्य सजातीयस्याभावमाचष्टे यथा हि । केवलाभ्यामिहैताभ्यां प्रवेष्टव्यमितीरिते ।
अन्यस्य पुरुषस्यैव प्रवेशः प्रतिषिध्यते । न शुक्लादेस्तथेहापि परस्परसहिता विमौ एकाकिनौ विज्ञानाय सहितौ चापि केवलौ । सुदुर्लभं सुलभं दुर्लभं
अतिसुलभमित्युदाहरणानि सुलाभो दुर्लाभ इति भावे घञ् कर्मणि तु खल् भवति । यद्वा सुः क्षेपे यथा सुषिक्तं नामेति । दुर्निन्दायां यथा दुर्ब्राह्मण इति ।

॥ उपसर्गात्खल्घञोः ॥ ॥ खल्घञोः प्रत्यययोः लभेरुपसर्गादुत्तरस्य नुमागमो भवति । ईषत्प्रलंभः सुप्रलंभः दुष्प्रलंभः । घ-
ञ् प्रलंभः विलंभः सिद्धे सत्यारंभो नियमार्थः उपसर्गादेव खल्घञोर्लभेर्नुम् भवति अन्यत्र न भवति ईषल्लभः लाभो वर्तते ॥ ॥
न सुदुर्भ्यां केवलाभ्याम् ॥ ॥ सुदुरित्येताभ्यामन्योपसर्गरहिताभ्यामुपसृष्टस्य लभेः खल्घञोः परतो नुमागमो न भवति । सुलभः दुर्ल-
भः सुलाभः दुर्लाभः केवलाभ्यामिति किं सुप्रलंभं । सुदुर्भ्यामिति तृतीयां मत्वा केवलग्रहणं क्रियते पंचम्यां हि व्यवहितत्वादेवात्राप्रसं-
गः । अतिसुलभ इत्यत्र कर्मप्रवचनीयत्वात्ततः केवल एव सुदुर्भ्यामुपसर्गादिति प्रतिषेधो भवति । यद्वा त्विति शब्देन कर्मप्रवचनीय-
त्वदानुषङ्ग एव अतिसुलंभ इति । पंचमीनिर्देशपक्षेऽप्येवमर्थे केवलग्रहणं कर्तव्यमेव ॥ १९ ॥ श्री ॥ ४ ॥ ॥ श्री ॥ ४ ॥ ॥

तेन कृच्छ्राकृच्छ्रार्थाभावात्खलभावः । तृतीयां मत्वेति । तृतीयापक्षे त्विदं प्रत्युदाहरणमित्यर्थः ॥ अथ पंचमीपक्षे कस्मान्न प्रत्युदाहरणमित्याह पंच-
म्याहीति । मन्ववकदाचिदप्यसुलंभमिति प्रत्युदाहरणं । उक्तं हि भाष्ये नैषोऽस्ति प्रयोग इति । अतिसुलभमित्यत्रेति । उपसर्गादित्यनुवृत्तेरुपसर्गयोः
सुदुरोरिह ग्रहणमिति भावः । अतिरतिक्रमणे चेत्यतः कर्मप्रवचनीयसंज्ञा तया चोपसर्गसंज्ञा बाध्यते एकसंज्ञाधिकारात् ॥ पंचमीनिर्देश-
पक्षेऽपीति । एवं च सर्वथा केवलग्रहणस्य कर्तव्यत्वात् क्रमव्यतिक्रमे कारणाभावात्स्वयं तृतीयाश्रयणेन प्रत्युदाहरणं दर्शितं ॥ १९ ॥ ४ ॥

॥विभाषाचिण्णमुलोः॥ ॥तेनानुपसृष्टस्यविकल्पइति। तथाचवार्त्तिकं। चिण्णमुलोरनुपसर्गस्येति॥ ॥उगिदचां॥ ॥धातुवर्जितानामिति। नेदमधातोरित्यस्यार्थप्रदर्शनं तस्यासमपरत्वात्तस्मादंचतिग्रहणं नियमार्थमितियद्वक्ष्यते तत्सिद्धएनायमर्थः प्रदर्शितः। अधातोरित्यस्य त्वर्थप्रदर्शने उगितामंगानामंचतेश्चाधातोश्चोगितो नुम्भवतीति प्रदर्शनीयं। अंचतेश्चेति। अज्ञितिप्रत्याहारग्रहणं तु न भवति न पुंसकस्य झलचइतिपुनरचग्रहणात् तत्र हि प्रत्याहारस्यैव ग्रहणं नांचतेः झलंतत्वात् भवानिति। अत्वसंतस्येचेति दीर्घः। श्रेयानिति। सांतम

॥विभाषाचिण्णमुलोः॥ ॥चिण्णमुलइत्येतयोर्लभेर्विभाषानुम्भवति· अलाभि अलंभि· लंभंलंभंलाभंलाभं इयंव्यवस्थितविभाषा तेनानुपसृष्टस्यविकल्पः उपसृष्टस्य तु नित्यं नुम्भवति· प्रालंभि· प्रलंभंप्रलंभं॥ ॥उगिदचां सर्वनामस्थानेधातोः४॥ ॥उगितामंगानां धातुवर्जितानामंचतेश्च सर्वनामस्थाने परतो नुमागमो भवति। भवतु। भवान्भवंतौभवंतः॥ इयसुन्। श्रेयान्श्रेयांसौश्रेयांसः॥ शतृ। पचन्पचंतौपचंतः। अंचतेः। प्राङ्प्रांचौप्रांचः। उगिदचामितिकिं। दृषत्दृषदौदृषदः। सर्वनामस्थानइतिकिं। भवतः पश्य श्रेयसः पश्य। अंचतिग्रहणं नियमार्थं अंचतेरेव धातोरन्यस्यमाभूत्। उखास्रत्पर्णध्वत्॥ ॥श्री४॥ ० ॥श्री१॥ ० ॥श्री४॥ ० ॥श्री४॥ ० ॥श्री४०॥

इतइत्यादिनादीर्घः सूत्रावयवे कृतं लिंगं समुदायस्यापि विशेषकं भवतीत्यसोगित्वं प्राङिति। अत्विगित्यादिना क्विन्। सुः हल्ङ्याद्भिः संयोगांतलोपौ। क्विन्प्रत्ययस्य कुरितिकुत्वं नकारस्य ङकारः। अंचतिग्रहणं नियमार्थमिति। नह्यधातोरितिप्रतिषेधप्राप्तेर्विध्यर्थमेतद्भवति एवं च धातोरितिन वक्तव्यं नियमादेवसिद्धेः। उखास्रदिति। वसुस्रंसिध्वंस्वनडुहांदइति दत्वं॥ ॥श्री४॥ ॥७॥ ॥७॥ ॥
॥श्री४॥ ॥श्री४॥ ॥४॥ ॥

।अधातोरितिकिमिति। अंचतिग्रहणान्नियमादेव धातोर्न भविष्यतीति प्रश्नः। अधातुभूतपूर्वस्यापीति। यस्य कदाचिद्धातुत्वं दृष्टं तस्य
संप्रतिधातुत्वे सत्यपि यथा स्यादित्यर्थः। गोमन्तमिच्छति। सुप आत्मनः क्यच्। अविद्यमानः प्रत्ययो प्रत्ययः सपुनः क्विप्। अतो लोपः। यस्येति
भावेतियलोपः। नुम्। गोमान्। कथं पुनरत्र दीर्घत्वं णावतालसंतस्याधातोरित्युच्यते। नैष दोषः। अधातोरितितत्र विभज्य तेनसामर्थ्या

।अधातोरितिकिं अधातुभूतपूर्वस्यापि यथा स्यात् गोमंतमिच्छतिगोमत्यति गोमत्यतेरप्रत्ययः गोमान्। अत्र
हि धातुत्वादंचतिग्रहणान्न स्यात्॥ ॥युजेरसमासे॥ ॥युजेरसमासे सर्वनामस्थाने परतो नुमागमो भवति।
युङ्। युञ्जौ युञ्जः। असमास इति किं अश्वयुक् अश्वयुजौ अश्वयुजः। युजेरितीकारनिर्देशाद्युजसमाधाविति
स्य ग्रहणं न भवति। युञ्जं समाधानानुबंधयः॥ ॥२०॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

दसंतस्यैव प्रतिषेधः नात्वंतस्य। अत एवात्र इन्नो असंतस्यैव प्रत्युदाहृतनुपमस्त॥ ॥युजेरसमासे॥ ॥युङ् युञ्जौ युञ्ज इति। पूर्ववद्विक्वि
न्नादि। अश्वयुगिति। सत्सूद्विषेत्यादिना क्विप्। एतदेवासमासवचनं ज्ञापकं तस्यच नदुत्तरपदस्य च ग्रहणं भवतीति। युजेरीतीकारनि
र्देशादिति। नायमिकाधातुनिर्देशः। किं तर्हि धातुपाठ एवाचस्येकारस्यानुकरणमिति भावः। युजमिति। संपदादित्वाद्भावे क्विप्। २०॥

७का०प०१

२१

॥नपुंसकस्य॥ ॥त्रपूणीतियद्यप्यत्रेकोचिविभक्तावित्येवनुम् सिद्धस्तथाप्यनितिप्रत्याहारग्रहणस्यानर्थक्यात्तदनेनैवनुम्भवति
कः पुनरत्रविशेषस्तेनवानुमित्यस्यनेननवानलुकश्चिद्धिदोषः न्यायस्तुप्रदर्शितः यद्येवंमाकारि। प्रत्याहारग्रहणंअकारएवग्रहणंतोसलस्येति।
कः पुनरेवंलाघवेविशेषः। किंचात्रप्रत्याहारग्रहणाउगिदचांमित्यत्रापिचनेग्रहणंनप्रत्याहारस्येत्युक्तंतदपिविघटितंस्यात्। बहुपुरीति।
बहुपुरोस्येषामितिबहुव्रीहावृक्पूरब्धूः पथामानक्षेरितिसमासान्तः प्राप्तः समासान्तविधेरनित्यत्वान्नभवति। विमलाद्योर्येषुतानिवि
मलदिवि। ऊहमन्त्रश्रणस्यनुमोवकाशोयत्रदुगिन्नपुंसकंसर्वाभिप्रेतम्। उगिल्लक्षणस्यावकाशः यत्रदुगिदनपुंसकंगोमानयवमानित्
गितोझलन्तस्यनपुंसकस्योभयप्रसंगेपरत्वादनेनैवनुम्भवति। अस्तु। कृतेपुनः प्रसंगविज्ञानादुगिल्लक्षणोपिनुम्प्राप्नोति। कथंपुन

॥ ॥नपुंसकस्यझलचः॥ ॥नपुंसकस्यझलन्तस्याजन्तस्यचसर्वनामस्थानेपरतोनुमागमोभवति। उदश्विं
ति। शकृंति। यशांसि। अजन्तस्यकुण्डानिवनानि। त्रपूणिजतूनि। नपुंसकस्येतिकिं। अग्निचित् ब्राह्मणाः। झलचइ
तिकिं। बहुपुरिबहुधुरि विमलदिविअहानिचत्वारि॥ ॥७॥ ॥७ ७॥ ॥७ ७॥ ॥

रेकमंत्यमचमपेक्ष्यानेकस्यपरत्वंसंभवति। नानामसंभूतत्वयोगेविधानकालेतुसंभवतियथापद्वतीतिलटः शपश्चातत्रतुदन्तीमन्त्रप
रस्यनकारस्यानुस्वारपरसवर्णयोर्द्वयोर्नकारयोः अवणाप्नोतिनमंजनपरस्यैकस्यानेकस्यवानुत्पन्नजातीयस्यमंजनस्यश्रव
णंप्रतिविशेषोस्ति। ऊर्ह्यतर्हिकृषंतिरुषंतीत्यत्रपाद्यस्यनुमोनुस्वारपरसवर्णयोः पूर्वपाप्तलपरत्वादनुस्वारपरसवर्णौनस्तस्य कुधाङ्कु
म्भावायेमीतिणत्वंप्राप्नोति। यदापुनरेकोनुम्तदान्तस्यानुस्वारश्चप्राप्नोतिणत्वंवतत्रणत्वस्यासिद्धत्वादनुस्वारेकृतेपरसवर्णः तस्या
सिद्धत्वापत्वाभावः सिद्धः नस्माउगिल्लक्षणस्यप्रतिषेधोवक्तव्यइत्याशंकाह॥ ॥७ ७॥ ॥७ ७॥ ॥

राम०

२१

उगितो झलन्तस्येति। सकृदुति स्मायोश्वाश्रीयतइत्येव कारेणादर्शयति। अनेनैवेति। अंसास्त्वंइति। रेफजकारस्यपोर्मध्यइत्यर्थः॥ ॥इकोचि
॥ ॥इक इति किमिति। पूर्वत्र पदग्रहणांतदिहैव कर्तव्यं नपुंसकस्य झलः अचोचीतितेन हलंतस्य न भविष्यति संख्यक्षरांतेतुनपुंसकेनास्तीने
तिप्रश्नः। अत एवादंतं प्रत्युदाहरतिनहलंतं। अचितिकिमितित्रपुण्यामिसाद्रीहलाद्रौसत्यपिनुमिस्यादित्यपि तिपदसंज्ञायांमत्संनलोपः प्राति
पदिकांतस्येतिलोपेनैवासिद्धमिष्टमितिप्रश्नः। इतरो पिविहितामिप्रायमाह इमरार्थमिति। आस्थि दधिसक्थ्यक्ष्णामनङुदात्त इतियथास्यात् हला
दाबस्थिभ्यामित्यादौ मा भूत्। पुनश्चोदयतियद्येवमिति। परिहरति इहत्विति। हेत्रयोइत्यत्रप्रागेवगुणान्नुमः प्रसंगः गुणोकृते निगंतत्वादप्रसं

उगितो झलंतस्य नपुंसकस्य परत्वादनेनैव नुम् भवति श्रेयांसि भूयांसि कुर्वंति कृषंति ब्राह्मणकुलानि। बहूर्जिप्रतिषेधो वक्त
व्यः। बहूर्जि ब्राह्मणकुलानि। अंत्यात्पूर्वं नुममेके इच्छंति बहूंर्जि ब्राह्मणकुलानि॥ ॥इकोचि विभक्तौ॥ ॥इगंतस्यांगस्य
नपुंसकस्याजादौ विभक्तौ परतो नुमागमो भवति। त्रपुणी जतुनी तुंबुरुणी। त्रपुणे जतुने तुंबुरुणे। इक इति किं। कुंडे पी
ठे। अचीति किं। उजर्णार्थं। यद्येवं तत्रैव कर्तव्यं। इहतु करणाद्रेतत्प्रयोजनं हे त्रपो इत्यत्र नुम्मा भूत्। नङिसंबुद्ध्योरितिनका
रलोपप्रतिषेधः स्यात्। ननु चन लुमतांगस्येतिप्रत्ययलक्षणप्रतिषेधाद्विभक्तिरेव नास्ति। एतदेवतर्हि ग्रहणंज्ञापकं
प्रत्ययलक्षणप्रतिषेधोत्र न भवतीति तथा च संबुद्धिगुणः क्रियते। विभक्ताविति किं तौंबुरवंचूर्णं॥ २१ ॥ ७१॥ ॥

गः स्यादेतत्। अस्त्वत्र नुम् हस्वमो र्नपुंसकादिति सोर्लुकि सुबंतं पदमिति पदसंज्ञायां नलोपो भविष्यतीति तत्राह नङिसंबुद्ध्योरिति। ननु
चेत्यादि। एवकारो भिन्नक्रमः प्रतिषेधेन संबध्यमानः औपचारिकमपि विभक्तेरस्तित्वं प्रतिषेधति। द्विविधं विभक्तेरस्तित्वं मुख्यमौपचारि
कं च मुख्यं श्रूयमाणायाः इतरल्लुप्तायाः प्रत्ययलक्षणेन। तदिह लुप्तत्वान्मुख्यं नावन्नास्ति। प्रत्ययलक्षणप्रतिषेधेनौपचारिकमपि नास्ती
ति। तत्र विभक्तावुच्यमानो नुम् कः प्रसंगो यत्सर्वथैवासत्यां विभक्तौ स्यात् नैव प्राप्नोतीतितार्थो ग्रहणेन। एतदेवेत्यादि। अन्यथा ग्रहणं
कुर्यात् कृतं तु ज्ञापयति अत्रांगे तेनपुंसके संबुद्धिविषये प्रत्ययलक्षणप्रतिषेधो न भवतीति। तथा चेत्यादिना ज्ञापकस्य प्रयोजनं दर्शयति।
संबुद्धौ चेति वर्तमाने ह्रस्वस्य गुण इति विहितो गुणः संबुद्धिगुणः। तौंबुरवमिति। विकारेऽण्॥ २१ ॥ श्री ४॥ ॥श्री ४॥ ॥

॥२कोचीसादि॥ ॥अचीलु अनेमंजनादौमात्रत्रपुभ्यांत्रपुभिः अस्तुलोपः अस्त्वत्र नुमनलोपः प्रातिपदिकांतस्येतिन लोपो भवि
ष्यति। स्वरः कथं। पंचत्रपुभ्यां पंचत्रपुभिः इगंतउत्तरपदे द्विगोपूर्वपदंप्रकृत्याभवतीत्येषस्वरोनप्राप्नोतिनुमिसत्यनिगंतत्वात् नलोपेपि
कृतेस्वरविधौतस्यासिद्धत्वादिगंतत्वमेव॥ स्वरोवैश्रूयमाणोपीति विशब्दोः श्रूयमाणे श्रूयमाणो पि वेनकारेस्वरो भवतिपंचत्रपुणोपं
चत्रपुणः सलुप्तेकिंनभविष्यति। यत्रशास्त्रवशेनसंभवोनास्ति तत्रकिंनभविष्यतिभविष्यत्येव॥ किंपुनः कारणं श्रूयमाणोपिनुमि
स्वरोभवति। संघातभक्तोसौनोत्सहतउत्तरपदेइगंततां विहंतुं। यदिवांतरंगः स्वरः प्रागेवविभक्त्युत्पत्तेर्भविष्यति। अत्रतर्हि अतिरभ्यां अ

॥२कोचिमंजनेमात्रदस्तुलोपः स्वरः कथं। स्वरोवैश्रूयमाणोपिलुप्तेकिंनभ
विष्यति॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

तिरभिः इतिअतिरिभ्यामितिस्थितेनुमिकृतेतेनव्यवधानाद्रायोहलीत्याकारोनप्राप्नोतिनलोपेपिकृतेसुब्विधौतस्यासिद्धत्वाद्व्यवधानमे
वसंघातभक्तोनुमतमेवनमयदृश्यानदेशे दंतु अवदृष्टात्सेव॥ अथार्थंगाधिकारेतस्यचतदुत्तरपदस्यचेतिदेशे दंतस्यांगस्यात्वविधाना
न्नास्तिनुमोंगस्यव्यवधानंतथापिनिर्दिश्यमानस्यादेशाभवंतीति रैशब्दस्यव्यवधानामेवअथाप्यंगस्यात्वमेवमपिनुमएवात्वंप्राप्नो
तितत्रपूर्वविप्रतिषेधातिअतिरभ्यामितिस्यात्॥ तथाप्रियपतिसृभ्यां ब्राह्मणकुलाभ्यामित्यत्रप्रियत्रिभ्यामिति। स्थितेतिसृभावोनस्यात्तन
माव्यवधानात्॥ नलोपेपिकृतेइत्यादि पूर्ववत् नैषदोषः॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥

शपात्वंतिसभावश्चस्वधानाल्नुमाऽपि भवतः। ब्रवधानादिति कर्मणि ल्यब्लोपे पंचमी नुमा व्यवधानं प्राप्ताविभक्तस्त्वर्थः विभक्तिविधा नदृशायांयदानंतर्यंतत्त्वत्राश्रीयते नलादेशविधानदृशायामिति भावः नुमाऽपीसत्रसंहितायामविवक्षितत्वात्सवर्णदीर्घत्वं न कृतं अन्येमच्छेहिशदं पठंति अपिशब्देनैतत्सूचयति प्रकारांतरेणाप्यात्वतिसभावोपि अतस्तिनत्वं च· अतिरिम्णोरति स्थितेनुमात्वयोरुभयो रप्यनित्यत्वयोः परत्वादात्वं एवं तिस्रभावः तत्र सकृत् इति न्यायात् अपरेणानुमभावः। सत्यपि वा नुमिनकश्चिद्दोषः। एवं तर्हि नुमुरो विप्रतिषेधार्थं प्रत्यग्रहणं कृतं· उभयनघापोतुट् रुत्यावकाशः अग्नीनां चाप्नानुमोवकाशः त्रपुणो जतुनेत्रप्रणां जतूनां मिल्सत्रोभयप्रसंगे पूर्वविप्रतिषेधेन नुड्भवति तेनामानि दीर्घो यथास्यात्। इति· सच विप्रतिषेधो· ग्रहणेसत्युपपद्यते द्वयोस्त्वनित्यत्वेन तुल्यबलत्वात्· असति हि त्वग्रहणे कृताकृतप्रसंगित्वान्नित्यत्वान्नुमेव स्यात्· एतदपि प्रयोजनं दूषयति· नद्धाऽरति· क्रियमाणेऽथ ग्रहणे नुड्त्रवाच्यः वचनेनैव साध्यो

॥ एषात्वंतिसभावश्च व्यवधानान्नुमाऽपि॥ नुद्धाम्युक्तस्त्वर्थं तु रहकिंचित्प्रयो

इति॥ २२ ॥ ॥श्रीकृष्णायनमः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

धापरत्वान्नुमेवस्यात्· तत्रश्चायग्रहणं कर्तव्यम् एवं विप्रतिषेधश्च न कर्तव्य इति यल्लघु यमाऽपरणीयं तत्राग्राहणामकृत्वाप्येवं तु उर्थायत्नः कर्तव्य इत्यर्थः इदं तर्हि प्रयोजनं तेनैव यत्नेन नुट् तत्रैवानजादौ नुमभूत् अस्तु लोपो भविष्यति न लोपस्यासिद्धत्वादनजंतत्वान्नामीति दीर्घत्वं न स्यात्· मा भूदेवं नोपधायाः इत्येवं भविष्यति इह तर्हि मुचीनां इन्हन्पूषार्यम्णां शौ सौ चेति नियमाद्दीर्घत्वं नस्यात्। प्रतिपदोक्तस्येन सत्त्वग्रहणं लाक्षणिकस्याचं एवं प्रत्याख्याते· ग्रहणे प्रयोजनमाह उत्तरार्थमिति। नुडिव्यस्त्वर्थं। एषु तत्रत्रासप्रयोजनं नतु हिति त्रैव कर्तव्यमत आह इह किंचिदिति। नुड्यत्यपरणकृतः इको सवर्णेशाकल्यस्येति प्रकृतिभावविधानात्। त्रयोरत्सत्रतु संबुद्धौ शाकल्यस्येतावनार्ष इति प्रगृह्यत्वादेशाभावः। केचिदत्र हे त्रपो हे त्रपु इति द्वैरूप्यमिच्छंति। मत्वपलक्षण प्रतिषेधस्यानित्यत्वं ज्ञाप्यते न त्वस्मिन्विषये सर्वथैवाभाव इति वदंतः। तथा च भाष्ये हे त्रपु हे त्रपो इति रूपमुदाहृतं। अन्ये तु हे त्रक्षितिप्रामे हे त्रपो इति भवतीति भाष्यं व्याचक्षाणा नित्यमेव गुणमिच्छं

॥तृतीयादिषु॥ ॥नपुंसकस्येति यत्षष्ठ्यन्तं प्रकृतं तदिह भाषितपुंस्कमित्यनेन संबन्धात्प्रथमान्तं संपद्यते पुंवदिति पुंशब्देन तुल्यमित्यर्थः।
केन पुनः प्रकारेण पुंशब्देन तुल्यं वर्तत इत्यपेक्षायामाह यथेति। नुम्ह्रस्वयोरभावः पुंवद्भावेऽस्ति स द्वारेण यत्साधनं तदिहातिदिश्यते अन्यथा
कस्यचित्तृतीयादिषु पुंशब्देन सादृश्यस्यासंभवात्तेनो घिन्नुम्ह्रस्वयोः प्रतिषेधो न संपद्यते। नन्वेवमपि सकृतत्वान्नुमस्त्वभावातिदेशो
ऽस्तु ह्रस्वस्य। न तत्र ह्रस्वस्यावस्थितत्वात्तदाश्रयाणां गुणानामभावे नुडीत्वानां प्रतिषेधो वक्तव्यः। गुणा। घेर्ङितीत्यग्रामण्ये कुलाया ना

॥तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य॥ ॥तृतीयादिषु विभक्तिषु अजादिषु भाषितपुंस्कं नपुंसकलिङ्गमिगन्तं गाल
वस्याचार्यस्य मतेन पुंवद्भवति। यथा पुंसि ह्रस्वो नुम्न भवति एवमत्रापि न भवतीत्यर्थः। ग्रामण्या ब्राह्मणाः। ग्रामणिना ब्राह्मण
कुलं। ग्रामण्या ब्राह्मणकुलेन ग्रामणिना ब्राह्मणकुलेन। ग्रामण्ये ब्राह्मणकुलाय ग्रामणिने ब्राह्मणकुलाय। ग्रामण्यो
ब्राह्मणकुलात् ग्रामणिनो ब्राह्मणकुलात्। ग्रामणिनो ब्राह्मणकुलात्। ग्रामण्यो ब्राह्मणकुलस्य ग्रामणिनो ब्राह्मणकु
लस्य। ग्रामण्योर्ब्राह्मणकुलयोः ग्रामणिनोर्ब्राह्मणकुलयोः। ग्रामण्यां ब्राह्मणकुलानां। नुमचिरेति पूर्वविप्रतिषेधेन नुट्। ग्रा
मणीनां ब्राह्मणकुलानां। ग्रामण्यां ब्राह्मणकुले ग्रामणिनि ब्राह्मणकुले। शुचिर्ब्राह्मणः। शुचि ब्राह्मणकुलं। शुचये ब्राह्म
णकुलाय शुचिने ब्राह्मणकुलाय। शुचेर्ब्राह्मणकुलात् शुचिनो ब्राह्मणकुलात्। शुचेर्ब्राह्मणकुलस्य शुचिनो ब्राह्मण
कुलस्य। शुच्योर्ब्राह्मणकुलयोः शुचिनोर्ब्राह्मणकुलयोः। शुचौ ब्राह्मणकुले शुचये ब्राह्मणकुलाय शुचिने। नि ब्राह्मणकु
ले। तृतीयादिष्विति किं। ग्रामणिनी ब्राह्मणकुले। भाषितपुंस्कमिति किं। त्रपुणे जतुने। इह कस्मान्न भवति पीलुर्वृक्षः॥ ॥

मारा ग्रामण्ये ना स्त्रियां ग्रामण्या कुलेन नुट् ह्रस्वनद्यापो नुट् ग्रामण्यां कुलानां। ओत्वा। ओतत्र च घेः ग्रामण्यां कुले नैष दोषः। अतिदेशसा
मर्थ्याद्भावाभावोऽप्यतिदिश्यते अन्यथा प्रतिषेधमेव गालवस्य विदध्यात्। ग्रामणीर्ब्राह्मण इति। भाषितपुंस्कप्रदर्शनमेतत्। ग्रामणि ब्राह्म
णकुलमिति। नपुंसके ह्रस्वत्वं भवति अतस्तदाभावोऽतिदिश्यत इत्यनेन दर्शितं। परिशिष्टमुदाहरणं। शुचि ब्राह्मणकुलमिति प्रक्रमाभेदाय
दर्शितं। प्रत्युदाहरणेषु यथायोगं नित्यमेव नुम्ह्रस्वौ भवतः॥ ॥

पीलुकस्वमिति। विकारे ओऽञः फले लुक्। समानायामाकृतावित्यस्यैव विवरणं तुल्ये प्रवृत्तिनिमित्त इति। यद्योगाद्द्रव्ये शब्दनिवेशस्तत्प्र
वृत्तिनिमित्तं श्यामत्वपाचकत्वादि। अस्त्वेवं प्रकृते किमायातं तत्राह इहात्विति। पुंसि शब्दस्य या प्रवृत्तिस्तत्र वृक्षावान्तरजातिर्निमित्तमित्यर्थः। फ
लाकृतिर्नपुंसक इति। प्रवृत्तिनिमित्तं। शब्दस्येत्यनुषंगः। फलावान्तरजातिः। नेत्र यद्यपि पीलोः फलमिति वृक्षस्त्री वृक्षावान्तरजाति

पीलु फलं पीलुनेफलायेति। समानायामाकृतौ यद्भाषितपुंस्कं तुल्ये प्रवृत्तिनिमित्ते तस्य पुंवद्भावः। इह तु वृक्षा
कृतिः पुंसि शब्दस्य प्रवृत्तिनिमित्तं फलाकृतिर्नपुंसके। तदेतदेवं कथं भवति भाषितपुंस्कमिति भाषितः पु
मान्यस्मिन्नर्थे तुल्ये प्रवृत्तिनिमित्ते स भाषितपुंस्कः शब्देनोभते तद्योगादभिधीयमपि पन्नपुंसकं तदपि भा
षितपुंस्कं तस्य प्रतिपादकं पच्छब्दरूपं तदपि भाषितपुंस्कमिति। इकः ह्रस्वे वा। कीलालपा ब्राह्मणाः कीलालपं
ब्राह्मणकुलं कीलालपेन ब्राह्मणकुलेन। आवीसेव ग्रामणिप्यं ब्राह्मणकुलम्पा २३ ॥ ॥

एवं गीकृता तथापि न सा फले प्रवृत्तिनिमित्तं किं तर्हि फलावान्तरजातिरेव निमित्तं ततस्तदेतदेवमित्यादि। स्त्रियाः पुंवदित्य
त्रेन द्वयाख्यातं जलस्त्रावधार्यं। कीलालपेनेति। ह्रस्वस्य निवृत्तावातो धातोरिति लोपः स्यात्॥ ॥२३॥ ॥श्री४॥ ॥

॥अस्थिदधि॥ ॥अनङो ङित्तीयोकारस्त्राणार्थः। ङकारोन्तादेशार्थः। अस्थ्यादयो नविषयस्यानिसंतस्येत्याद्युदात्ताः। शेषमनुदात्तं तत्रांतर्य
तोनुदात्तस्यादेशे प्राप्ते उदात्तवचनं अस्थ्नेत्यादावल्लोपोनः इत्यकारलोपे अनुदात्तस्य च यत्रोदात्तलोप इति विभक्तेरुदात्तत्वार्थं। विभाषा ङिश्यो
रित्यल्लोपाभावपक्षे त्वकारस्योदात्तस्य श्रवणं भवति अस्थनीति। तथा छंदस्यपि दृश्यत इत्यत्र इंद्रो दधीचो अस्थभिरिति। एतैरस्थ्यादिभिरित्या
दि। तत्रांगाधिकारेण संबंधात्तु नपुंसकस्य चेति तदंतस्यैव ग्रहणं भवति तथा नपुंसकस्येत्यनुवृत्तं श्रुतत्वादस्थ्यादीनां विशेषणं न प्रकृतस्यांगस्येति

॥अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः॥ ॥अस्थिदधिसक्थिअक्षि इत्येतेषां नपुंसकानां तृतीयादिष्वजादिषु विभक्तिषु अ
नङित्ययमादेशो भवति स चोदात्तः। अस्थ्ना। अस्थ्ने। दध्ना। दध्ने। सक्थ्ना। सक्थ्ने। अक्ष्णा। अक्ष्णे। अस्थ्यादयः शब्दा आद्युदा
त्तास्तेषामन्त्यादेशः स्थानिवद्भावादनुदात्तः स्यादित्युदात्तवचनं। तत्र भसंज्ञायामल्लोपे कृते उदात्तनिवृत्तिस्वरेण विभक्तिरु
दात्ता भवति। एतैरस्थ्यादिभिर्नपुंसकैरनपुंसकस्यापि तदंतग्रहणमिष्यते। प्रियास्थ्ना। प्रियास्थ्ने। प्रियदध्ना। प्रियदध्ने। प्रिय
सक्थ्ना। प्रियसक्थ्ने। प्रियाक्ष्णा। प्रियाक्ष्णे। तृतीयादिष्वेव अस्थिनी। अचीत्येव अस्थिभ्यां अस्थिभिः॥ ॥छंदस्यपि दृश्यते
॥ ॥छंदस्यप्यस्थ्यादीनामनङ् दृश्यते। यतो विहितस्ततोन्यत्रापि अचीत्युक्तमनजादावपि दृश्यते। इंद्रो दधीचो अस्थभिः।
भद्रं पश्येमाक्षभिः। तृतीयादिष्वित्युक्तमतृतीयादिष्वपि भवति। अस्थान्युत्कृत्य यजति। विभक्तावित्युक्तमविभक्तावपि दृश्यते
अक्षण्वता लांगलेन। अस्थन्वंतं यदनस्था बिभर्ति॥ ॥७॥

नानपुंसकस्यापि तदंतस्य ग्रहणं। किमर्थं पुनरस्थ्यादयो नपुंसकत्वेन विशेष्यंते यदृच्छाशब्दानां पुल्लिंगानां मा भूत् दधिना पिकाख्येन दधिनेति। न
तदस्ति प्रयोजनं। अभिव्यक्तपदार्था ये स्वतंत्रा लोकविश्रुताः। शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु। एवं तर्हि नपुंसकस्येत्यनुवृत्तं स्यात्तस्य
प्रदर्शनमात्रं कृतं एतैरस्थ्यादिभिर्नपुंसकैरिति॥ ॥छंदसि॥ ॥छंदसीत्येव सिद्धेऽपि दृश्यत इत्येतत्सर्वोपाधिव्यभिचारार्थं अन्यथा असामर्थ्यात्
क्वचिदेव व्यभिचारः शंक्येत तदिदमुक्तं यत्र विहितस्ततोन्यत्रापि दृश्यत इति। अस्थन्वंतमिति। अनङि कृते अनो नुडिति मतुपो नुट्। अनङो नका

॥ ईच् द्विवचने ॥ ॥ अक्षी इति । अक्षि औ इति स्थिते औङः शीभावः पूर्वस्य ईकारः तत्र प्रथमयोः पूर्वसवर्ण इति दीर्घस्य दीर्घाज्जसि चेति निषे
प्रतिषेधे प्राप्ते वा छंदसीति पक्षे पूर्वसवर्णदीर्घत्वं । ननु चास्मिन्वचने पूर्वसवर्णदीर्घत्वेनैव सिद्धं नात्र पूर्वसवर्णदीर्घत्वं प्राप्नोति यस्ता
नुमा बाध्यते । एवं तर्हि छंदसि नपुंसकस्य पुंवद्भावो वक्तव्यः मघोनस्ताउपमातरस्येव माघर्यं ते न पुंवद्भावेन नुमि सिद्धे शीभावे चापतिसव

॥ ईच् द्विवचने ॥ ॥ द्विवचने परतः छंदसि विषये अस्थ्यादीनामीकारादेशो भवति स चोदात्तो भवति । अक्षी
ते इंद्र पिंगले कपेरिव । अक्षीभ्यां ते नासिकाभ्यां । अक्षी इत्यत्र नुम् परत्वादीकारेण बाध्यते तत्र कृते सकृत्प्रवृत्तौ विप्रति
षेधे यद्बाधितं तद्बाधितमेवेति नुम् न क्रियते । नाभ्यस्ताच्छतुः ॥ अभ्यस्तादंगादुत्तरस्य शतुर्नुम् न भवति ।
ददत् । ददतौ । ददतः । दधत् । दधतौ । दधतः । जक्षत् जक्षतौ जक्षतः । जाग्रत् जाग्रतौ जाग्रतः । शतुरनंतर ईकारो
न विहित इति अव्यवहितस्यापि प्रतिषेधो विज्ञायते ॥ ॥ वा नपुंसकस्य ॥ अभ्यस्तादंगादुत्तरो यः शतृप्रत्ययस्तदंतस्य
नपुंसकस्य वा नुम् भवति । ददति कुलानि ददंति कुलानि । जाग्रति जाग्रंति । जक्षति जक्षंति ॥ ॥ ७४ ॥ ॥

र्णदीर्घत्वेन सिद्धमक्षी इति । सत्यं स्वरस्तु न सिध्यति अक्षिशब्दस्य नित्विषयस्य निर्मितस्यैवाद्युदात्तत्वात् । न च पुंवद्भावेन स्वरस्याप्यभा
वातिदेश इष्यते तस्मात्स्वरार्थमपीकार एव विधेयः ॥ ॥ नाभ्यस्तात् ॥ ॥ ददतीति ॥ ॥ अभ्यस्तयोरातः शतुरस्याकारलोपः । जक्षदि
त्यादौ जक्षित्यादयः षडित्यभ्यस्तसंज्ञा । कथं पुनश्चतुर्भिर्योगैरव्यवहितस्य नुमः प्रतिषेधः प्राप्नोति तानुमित्याह शतुरनंतरो न वि
हित इति । अनंतर ईकारः शत्रंतस्य न विहितः एवं तर्हि अनंतर इति यावद्विहितमसेषणो नुमि पर्यवसानं ॥ ॥ २४ ॥ ॥ छ ॥ ॥

आच्छीनद्योः॥ ॥अवर्णान्तादङ्गादुत्तरस्य शतुरिति। सूत्राक्षरैस्तावदयमेवार्थः प्रतीयते इत्येवं व्याख्यातं न पुनरयं व्यवस्थितः सूत्रार्थः दूषणा
स्य वक्ष्यमाणत्वात् तस्मान्नाप्रदर्शितविषयं दूषणांशकं वक्तुमिति विषयप्रदर्शनपरमिदं द्रष्टव्यं। याती कुले इति। नपुंसकाच्चेत्योङः शीभावः। या
ती ब्राह्मणीति। उगितश्चेति ङीप्। करिष्यन्तीति। लृट्। लृटः सद्वा। स्यतासी लृलुटोः स्य इति। अत्र चेत्यादि चोद्यं। अन्तरङ्गत्वं पुनरेकादेशस्य शत्रमात्रा
पेक्षत्वात् नुमस्तु बहिरङ्गत्वं शीनद्युत्तरापेक्षत्वात्। अपवर्गाभेदः इदमवर्णान्तमङ्गं अपशब्दत्वमापद्यत इत्येवंरूपः स एकादेशे कृते नास्ति शीनद
द्भवता। तद्यथा क्षीरोदके संपृक्ते न ज्ञायते इदं क्षीरमियदुदकमनुषक्तिन्नवकाशो क्षीरमनुषक्तिन्नवकाश उदकमिति। अवर्णान्तादङ्गादुत्तरस्य

॥आच्छीनद्योर्नुम्॥ ॥अवर्णान्तादङ्गादुत्तरस्य शतुर्वा नुमागमो भवति शीनद्योः परतः। तुदती कुले तुदन्ती कुले।
तुदती ब्राह्मणी तुदन्ती ब्राह्मणी। याती कुले यान्ती कुले। याती ब्राह्मणी यान्ती ब्राह्मणी। करिष्यती कुले करिष्यन्ती कु
ले। करिष्यती ब्राह्मणी करिष्यन्ती ब्राह्मणी॥ अत्रान्तरङ्गत्वादेकादेशे कृते अपवर्गाभावादवर्णान्तादङ्गादुत्तरस्य शतुरि
ति न युज्यते वक्तुं। उभयत आश्रयेणान्तादिवदित्यन्तादिवद्भावोऽपि नास्ति॥ ॥श्री ४॥ ॥श्री ४॥ ॥अथ

शतुरिति न युज्यते वक्तुमिति। यथा पूर्वमवोचत्तथा न युज्यत इत्यर्थः। तथा हि। सर्वत्रैवावर्णस्य निवृत्तत्वाभावितव्यं। क्वचिल्लुका। अदती अ
ती। क्वचिच्छ्लुना। जुह्वतीति। तुदतीत्यादावेकादेशेन। लुनतीत्यादौ श्नाभ्यस्तयोरात इत्याकारलोपेन। स्यादेतत्। एकादेशविषयेऽन्तादिवद्भा
वेनावर्णान्तत्वमपि भविष्यतीति तत्राह उभयत आश्रय इति। यत्र पूर्वं च परं चोभयं युगपदाश्रीयते न तत्रान्तादिवद्भावोऽस्तीति यथा उपस
र्गाद्ध्रस्व ऊहतेः प्रोहते। एतेर्लिङि अभीयादिति। इह त्ववर्णान्तं शतारं चेत्युभयं युगपदाश्रीयत इति नास्त्यन्तादिवद्भावः। एवं तर्ह्युत्सृते वे
दं अवर्णान्तादङ्गादुत्तरस्य शतुरिति न च सम्प्रत्येवंविधः शता क्वचित्सम्भवति तत्र भूतपूर्वगतिराश्रयिष्यते पूर्वं यः शता अवर्णान्तादङ्
गादुत्तर आसीदिति तत्राह॥ ॥७॥ ॥

७का

भूतपूर्वगत्याश्रयणोचेति। समाधिः समाधानं परिहारः। अवर्णान्तादच्छब्दादिति। आंगादिति। इष्टव्यं अमथादद्तीसादावपिप्रसंगार्। भवति। अत्रापि शत्रवयवाद्काराः स्यात्कारः। कथं पुनरवर्णान्तस्यांगत्वं एकादेशस्यान्तवद्भावात्। नहीदानीं पर्वप्रस्त्रादिवत्वं विवक्षितं तत्कास्यरूपमेवशत्रवयवत्वात्। एवं तेनत्कारेणापुनर्ग्रहणस्य विधिः। अशासेत्तेतदत्रावर्त्मते। अपरे पुनरीरिति। अत्रापि युगपद्भयेना श्रीयते किंतुक्रमेणोत्पस्यन्तादिवद्भावः। ननुच नुदतीसादावन्तादिवद्भावादवर्णान्तिभवतु न ततः परेशी नद्योनकारेणाव्यवधानादि

भूतपूर्वगत्याश्रयणोच अदतीसेवमादिष्वपिप्रसंग इति। अत्रसमाधिं केचिदाहुः। शत्रवयवे शतृशब्दो वर्त्तते अवर्णान्तादच्छब्दात्परोयः शत्रवयव इति। यथा ग्रामो दग्ध इत्यत्रग्रामैकदेशे ग्रामशब्दोऽनि दृश्यते। अपरे पुनरेवमाचक्षते। आदित्यनेनशीनद्यावेव विशेष्येते अवर्णान्तादंगात्परे येशीनद्यौ तयोः परतः शत्रंतस्यनुम्भवतीति। तेनत्रयेननाव्यवधाने तेनव्यवहितेपि वचनप्रामाण्यादिति तत्कारेणोव्यवधानमाश्रपितव्यमिति। आदिति किं कुर्वती सुन्वती। शीनद्योरिति किं तुदति नुदति॥ ॥शप्श्यनोर्नित्यं॥ ॥शप्श्यन इत्येतयोः शतुः शीनद्योः परतो नित्यं नुमागमो भवति। पचन्ती कुले पचन्ती ब्राह्मणी। यजन्ती कुले यजन्ती ब्राह्मणी। श्यन्॥ दीव्यन्ती कुले दीव्यन्ती कुले सीव्यन्ती ब्राह्मणी। नित्य ग्रहणं वेत्यस्याधिकारनिवृत्त्यर्थं॥ इहारम्भसामर्थ्यान्नित्यो विधिरुत्तरत्रतदनुवर्त्तत एवेत्याशंकेत॥ ॥२५ ॥

यतआह तत्रेति। प्रकृतो यम्प्रतिषेधेन संबध्यते इति तदनुवृत्ताविहापिप्रतिषेध एव विकल्पेनशीनद्योर्वानुम्नभवति अवर्णान्तादिति केनपुनः प्रसंगः इदमेववचनापकंस्मात् आच्छीनद्योर्नुमिति तितत्रकुर्वतीत्यादावनवर्णान्तान्नित्यं नुम्। प्रसंगः सैवंविज्ञायीति नुम् ग्रहणं॥ ॥शप्श्यनोः॥ ॥इत्येतयोः शतुरिति। एतयोः संबंधी यः शतात स्येत्यर्थः। संबंधश्च निमित्तनिमित्तिभावः। क्वचित्तु संबंधिनः इति पष्ठते नित्यग्रहणमिति। ननुचारम्भसामर्थ्यादेवनित्यं भविष्यतीति तत्राह इहेति २५

॥सावनडुहः॥ ॥इहचतुरनडुहोरामुदात्तइत्यामः सर्वनामस्थानमात्रे विधीयमानः सोऽयमत्रसावकाशो निरवकाशेन नुमा बाध्येतान्यथा
संबुद्धेरन्यत्रमो सावकाशो नुम संबुद्धौ विशेषविहितेनाम्संबुद्धावित्यनेन बाध्येतेत्याशंक्याह अन्तके चिदित्यादि। कथंपुनरादित्यस्यानुष्ठ नो
स्यामप्याममोः कृतयोर्नुमभवति नपुनर्यदावानडुहिनित्यः संनिहितो काराल्लत एव परः स्यात् उच्यते। एवं सति निमित्तं भावी सामस्यरतिपरिभाषया बाध्ये
तनया बाधेनोपपन्नौ सन्तौ शाखो स्याप्यः तत्र यथायस्मिाषानबाध्यते आदित्यनुहृतित्यस्य साधिका भवति तथावक्ष्यं यदि चाममोः कृतयोर्न
म स्यात्ततो मुभयमनुगृहीतं स्यादिति कृतयोरेव तयोर्नुम भविष्यति। अमामोनबाध्येते इति न केवलममेव न बाध्यते अपि त्वाम मात्रमपि

सावनडुहः॥ ॥सौ परतः अनडुहः इत्येतस्याम् नुमागमो भवति। अनड्वान्। हे अनड्वन्। अत्र केचिदादित्यधि
कारादाममोः कृतयोर्नुमं कुर्वन्तीति तेन नुमा आममोर्न बाध्येते आममभ्यां वनुमिति। अपरे तु सत्यपि सामान्यविशेष
विषयत्वे आममोर्नुमश्च समावेशमिच्छन्ति न बाध्यबाधकभावं यथा चिवीयती सादिपुटौ दीर्घत्वद्विर्वचनयोरिति॥
॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥छ॥ ॥
श्रीराम॥ ॥श्री॥ ॥

न बाध्येते इत्यर्थः। अमत्र दृष्टान्तत्वेनोपात्तः यथामन बाध्यते तथा आमिति भावः। न पुनरमो नुमा बाधशंका अमो विशेषविहितत्वात्। आमम
भ्यां वनुमिति। न बाध्यत इति वचनविपरिणामेनानुषंगः। अत्रापि यथा आमान बाध्यते तथाः मापीत्यर्थः। न पुनरामानुमो बाधप्रसंगात्
सामान्यत्वात्। अपर इत्यादिना इच्छन्तीति वचनादिष्टिरेवेयमिति केचित्। अन्ये त्वाहुः। सामान्यविशेषयोः संनिधौ बाध्यबाधकभावः इह त्वनेके
न योगेन व्यवधानं अस्ति हि संभवे बाधनं भवति इह च अस्ति संभवो युगपदुभयं स्यादित्याममोर्नुमश्च समावेश इति। यथेति। अत्र नाप्राप्ते द्विर्वच
ने दीर्घ आरभ्यते अथ च संभवात्मकारणभेदाच्च समावेशः। वद्धनद्धांहिवाससकुलातीति। परत्वाद्दामि कृते पुनः प्रसंगविज्ञानान्नपुंसकस्य
झलचइतिनुम भवति॥ ॥छ॥ ॥छ॥ ॥

दृक्स्ववः स्वतवसां॥ ईदृशः सादेश्यादृशिष्णुदृशोना लोकने कञ्चेति क्विन्नित्ययमिवकृते एवंविकृत्वं॥ ॥दिव औत्॥ ॥धातोः प्रतिषेधो वक्तव्यः
अक्षद्यूरिति। एकदेशविकृतमनन्यवद्भवतीति दिव्शब्द एवायमिति प्रसंगः इति। अथ लक्षणिकारास्ति इदं। अथ धातोरिति वर्जते। वक्तव्यं। आगि
इतोऽसर्वनामस्थाने धातोरिति। परितरनुवर्तते तन्नपुंसकस्य झलचः इत्यत्रामि संबध्येतं न तत्रानुवर्तते श्रिप्राप्तकुलानालेत्र नस्मात् ततस्मा
दशब्दान्तरमनुवर्तयितुं तत्र धातोः प्रतिषेधो वक्तव्य एवेत्याशंक्याह दिव् इति प्रातिपदिकमित्यादि॥ ॥पथिमथ्यृभुक्षां॥ ॥पंथा इति। इतोऽत्स

दृक्स्ववः स्वतवसां छंदसि॥ ॥दृक्स्ववस्स्वतवस इत्येतेषां सोपरतो नुमागमो भवति छंदसि विषये। ईदृङ्। यादृङ्। ता
दृङ्। सदृङ्। स्ववान्। स्वतवान् मा पुरस्ते॥ ॥दिव औत्॥ ॥दिव् इत्येतस्य सोपरत औत् औ इत्ययमादेशो भवति। द्यौः। दिवि इति प्रा
तिपदिकमस्ति निरनुबंधकं धातुस्तु सानुबंधकः स इह न गृह्यते अक्षद्यूरिति॥ ॥पथिमथ्यृभुक्षामात्॥ ॥पथिन् मथिन्
ऋभुक्षिन् इत्येतेषां सोपरत आ इत्ययमादेशो भवति। पंथाः। मंथाः। ऋभुक्षाः। स्थानिन्यनुनासिकेऽप्यनुनासिक आ
कारो न भवति भाव्यमानोऽण् सवर्णान्न गृह्णाति। शुद्धोऽयमुच्चार्यते॥ ॥ २६ ॥ ॥ ७ ७ ॥ ॥ ७ ॥

र्वनामस्थाने इतीकारस्याकारः सवर्णदीर्घत्वं थो न्थः अनुनासिकस्य नकारस्यान्तर्यतोऽनुनासिक आकारः कस्मान्न भवति इत्याशं
क्याह स्थानिन्यनुनासिकेऽपीति॥ अत्र कारणमाह भाव्यमानेनेति। केचिद् भाव्यमानोऽण् सवर्णान्न गृह्णातीति पठंति तेषामण्ग्रह
णं ग्राहकोपलक्षणार्थं तेनाकारोऽपि भाव्यमानो ग्राहको न भवति। तपरस्तत्कालस्येत्यनेन तु ग्रहणाशंका। उच्यते तत्र अनणि विध्यर्थ
मेतदिति। स्यादेतत् मा भूत्सवर्णग्रहणं अनुनासिकस्यैवानुनासिक उच्चारणात् स्यादेवेत्यत आह शुद्धोऽयमिति। अकारविधाने ततो
शुद्धोपरूपं स्यात् अकारविधानं तु नकारनिवृत्त्यर्थं स्यात् लोपविधौ गौरवप्रसंगात्तस्मादाकार एव विहितः॥ २६ ॥ ॥ ७ ॥ ॥

॥इतोत्सर्वनाम॥ ॥अद्वचनं किमर्थं। ह्रस्वस्य अवर्णापत्त्या स्यात् । नैतदस्ति। सोमावरकः सवर्णे दीर्घत्वं भवति अस्मत्रापि नोपधायाः सर्वनामस्था
ने च इति दीर्घत्वं प्राप्तं तस्मात् तत्कृत आकार एव विधेयो न आत् त्वादिति वर्त्तमान इति। यत्रायं विहितो अकारः षष्ठी भवति तत्रास्य प्रयोजनमित्य
र्थः। तदेव दर्शयति। ऋभुक्षणमिमत्रेति। आकारविधौ तु क्रमे बहूपं स्यात् दीर्घविकल्पस्तु ऋभुक्षाणं न क्षरा भिसा दीर्घः स्यात् स्थानिम्नादेशे च तपर

॥इतोत्सर्वनामस्थाने॥ ॥पथ्यादीनामिकारस्य स्थाने अकार आदेशो भवति सर्वनामस्थाने परतः। पन्थाः पन्थानौ पन्था
नः। मन्था मन्थानौ मन्थानः॥ ऋभुक्षाः ऋभुक्षाणौ ऋभुक्षाणः। आदिति वर्त्तमाने पुनरदिति वचनं अपूर्वार्थं। ऋभुक्षणमिन्द्रमाहि
वा अपूर्वस्य निगमे इति दीर्घत्वविकल्पः॥ ॥थो न्थः॥ ॥पथिमथोस्थकारस्य स्थाने न्थ इत्ययमादेशो भवति सर्वनाम
स्थाने परतः। पन्थाः पन्थानौ पन्थानः। पन्थानं पन्थानौ। मन्थाः मन्थानौ मन्थानः। मन्थानं मन्थानौ॥ ॥भस्य टेर्लोपः॥ ॥
पथ्यादीनां भसंज्ञकानां टेर्लोपो भवति। पथः पथा पथे। मथः मथा मथे। ऋभुक्षः ऋभुक्षा ऋभुक्षे। सर्वनामस्था
न इत्यनुवर्त्तमानमपि विरोधादिह न संबध्यते॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥छ॥ ॥

क्षणं मुरुक्षणं वार्थी॥ ॥थोन्थः॥ ॥पथिमथोरिति। त्रयाणां प्रकृतत्वेपि एतयोरेव थकारसंभवात् संबन्धः आदेशोकार उच्चारणार्थः। स्यादेतत्
थ इत्यस्मात् अस्तु अकारोपि विवक्षितो तु थि शब्दस्य थ आदेशः एवं च कृत्वा इतोदिति न वक्तव्यमिति। तदपि वक्तव्यं ऋभुक्षिन्शब्दार्थं॥ ॥
भस्य टेः॥ ॥पथ्यादीनामिति। प्रत्येकमभिसंबन्धात् अस्य एकवचनं। विरोधादिति। सर्वनामस्थाने भसंज्ञाया अभावो विरोधः। इह न संबध्यतइ
ति। उत्तरार्थं त्वनुवर्त्तत एवेतिभावः॥ ॥छ॥ ॥

पुंसोसुङ्॥ ॥असुङोङकारोन्तादेशार्थः॥उकारउच्चारणार्थः॥उकारउच्चारणार्थः।पुमानिति।पुम्स आत्वस्योगित्वान्नुम्।सहितइङ्गेनुमसु
न्तिसुल्याघते।उकारस्तिलोपार्थः।उकारउगित्कार्यार्थः।नकारः स्वरार्थः।मकारोकारउच्चारणार्थः।बहुपुंसीतिङीपुगित्त्व श्रणोभवति।इहस्मा
दिचोघे।प्रागेवचप्रसयोस्तत्तेरितिप्रसपः सर्वनामस्थानं।समासस्यांतोदात्तत्वमितिपुमसादौकारस्य।अनिष्टः स्वरइतिश्रेमनधर्मेणास्यका
रस्यहलःस्थानेनदुर्मनुदात्तआदेशःस्यादित्यर्थः॥ ननुचोकारस्यकृतमपिसमासांतोदात्तत्वमसुङि कृतेनंसत्वान्निवर्तिष्यतेऽसुङ

पुंसोसुङ्॥ ॥सर्वनामस्थानइतिवर्त्ततेपुंसइत्येतस्यसर्वनामस्थानेपरतोऽसुङित्ययमादेशोभवति।पुमान् पु
मांसौपुमांसः॥सर्वनामस्थानइत्येवपुंसः पश्यइत्यपरमपुमानितिप्रागेवविभ।ष्टपुंसत्तेः समासांतोदात्तत्वं।उत्पन्नायां
विभक्तावसुङि सत्यनिष्टः स्वरःप्राप्नोतितदर्थमुपदेशिवद्वचनं कर्तव्यमंतेनपरमपुमानिमंतोदात्तोभवति।पुमानित्ययं
पुनराद्युदात्तएव ॥२७॥ ॥७४॥ ॥

श्चांत्यत्वात्सर्वात्त्रिष्यतेनैतदस्ति।अंतरंगोस्वरेकर्त्तव्येबहिरंगस्यासुङोसिद्धत्वान्महत्तस्यनिवर्त्तनायोगाच्चातदर्थमित्यादिपरिहारः।अर्थश
ब्दोनिवृत्तिवचनः तस्यानिष्टस्वरस्यनिवृत्त्यर्थमित्यर्थः।उपदेशिवद्वचनमिति।उपदेशोस्यास्तीत्युपदेशी।संकारः संपद्योपदेशावस्थायां
संनिहितस्तथासुङः पीत्यर्थः।सर्वनामस्थानइतिविषयसप्तम्याश्रयणीयेत्युक्तेभवति।तत्रसमासानंतरमेवपरत्वादसुङि कृतेपस्मा
दुदात्तत्वंभवदसुङ एवाकारस्यभवतीतिपद्येवं पुमानित्याद्यावसमासेपितुपदेशावस्थायामसुङि कृतेप्रातिपदिकस्वरोभवत्यसुङएव
वस्यादित्यतआह पुमानित्ययंपुनरिति।पुमस्शब्दोप्रत्ययोनिदित्युक्तत्वात्सामर्थ्याद्याद्युदात्तत्वं २७

ऽका॰प॰९०१

२८

॥गोतो णित्॥ ॥गाङ्कुटादिसूत्रे यावता पश्चात् इहापि तावता स्वगुणरोधाश्च न तद्देवचातिदेशपक्ष आश्रीयते यदा ह णिद्वतीति पश्चपरस्थ
त्वः प्रयुक्तो णित्वाधिकल्पितं चार्थं गामपतिय था सिं ह्रो मारणाधक इति। णिदिसने न साम्नाधिकारेण सर्वनामस्थाने इति संपन्नं तं प्रथमया
विपरिणाम्यते तत्र सर्वनामस्थाने णित् कार्यं विधेयं न तु सं भवतीति णित्कार्यं तत्र सर्वनामस्थाने एवं स्यादिति दिष्टे तेन स्याद्यणित्कार्यं त
त्र भवतीत्यर्थ इति। चित्रगुरिति वद्रश्रीही गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं। अत्रासतित परत्वकरणे अंगाधिकारेत दं न विधेरस्तुपराधास्तर्वे
सर्वपदादेशा इति न्यायेन स्यान्निवद्भावेन मा भि शङ्कतं त्वात णिद्भावः प्राप्नोतीति तपरकरणे तु न त्का लार्थे सति न भवति भिन्नकालत्वा

॥गोतो णित्॥ ॥गोशब्दात्परं सर्वनामस्थानं णिद्वद्भवति णित्कार्यं तत्र भवतीत्यर्थः। गौः गावौ गावः। तपरकरणं किं
चित्रगुः। कथं हे चित्रगो हे चित्रगाव इति। अंगवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति संबुद्धि जसोर्गुणे कृते णित्वं न भविष्यति
। अथवा गोत इति संबंधलक्षणा षष्ठी गोतः संबंधि यत्सर्वनामस्थानमिति। यद्येवं तदर्थस्यैकत्वादिषु सर्वनामस्थानं
तस्ये सर्वनामस्थानमित्युच्यते चित्रगुशब्दात्तु परं सर्वनामस्थानं तदन्यपदार्थस्येत्याशंक्य आह। तपरकरणं तु निर्देशा
र्थमेव॥ ॥४४॥ ॥४॥ ॥

त। तपरस्तत्कालस्येत त्राणित्वस्य निहन्तव्यात् तपरोऽपि तत्कालनियमो भवतीति मन्यते कथमिति। हस्वस्य गुणः जसि चेति गुणे कृते सत्यपि
तत्कारे तत्कालत्वा णित्वं प्राप्नोत्येवेति प्रश्नः। न च स्थानिवद्भावविषये लक्षणाप्रतिपदोक्त परिभाषा तस्यैव षष्ठी प्रसंगात्। अंगेत्यादि परिहारः
। णित्वं न भवति णित्कार्यं न भवतीत्यर्थः। भवतु संबुद्धावेष परिहारः जसि त्ववादेशमंतरेण निष्ठितत्वादंगस्य नायं परिहार इत्याशंक्या
ह अथवेति। यद्येवमादिना र्थद्वारकं विशेषसंबंधमाह। आनंतर्यलक्षणोऽतु संबंधे चित्रगुशब्दादपि प्रसंगात्। यदि तर्ह्यर्थद्वारक संबंधाश्र
यणादेव चित्रगुशब्दे अप्रसंगः किमर्थं तपरकरणमित्याह। तपरकरणं तु निर्देशार्थमेवेति। सुखनिर्देशार्थमेवेत्यर्थः। इतरथा गोरित्युच्यमा
ने गुणरूपस्यापि निर्देशः संभाव्येत॥ ॥

॥न्या॰
२८

।केचिद्दिस्यादि। एवंपाठेप्रयोजनमाह घोशाह्वादयो इति। येनहेवं नपठंति तेषां कथं घोशाह्वे इति। इद्धावर्त्यत आह गोतहस्येनदेवेति। कथंपुनरो
कारान्तोपलक्षणं द्रष्टुं शक्यमित्यत आह वर्णनिर्देशोपि हीति। हृष्ठिरादे चूअतो लोपइत्योदो वर्णनिर्देश एव तपरत्वं दृष्टं तस्मात्तपरकरणमिह
ओकारान्तोपलक्षणं विज्ञापयते॥ ॥णालुत्तमो वा॥ ॥णित्कार्यं तत्र भवतीत्यर्थ इति। एतेन पक्षे णित्कार्यस्याभावोपि णिद्भवती प्रत्य
ते नतु पक्षे णाकारस्येत्संज्ञा प्रतिषेधादिति दर्शयति। एतच्च पूर्वत्र कार्यातिदेशाल्लभ्यते। चकारेति। णित्वपक्षे हृद्धिरत्र गुणः। यथा

केचिदोतो णिदिति पठंति घोषाह्वादपि विधत्ते तद्दर्थ्या घोः घावौ घावः इति। गोत इत्येनदेव वा तपरनिर्देशादोका
रान्तोपलक्षणार्थं द्रष्टव्यं। वर्णनिर्देशोपि हि तपरकरणं प्रसिद्धं॥ ॥णालुत्तमो वा॥ ॥उत्तमो णाल्वा णि
द्भवति। णित्कार्यं तत्र वा भवतीत्यर्थः। अहं चकार अहं चकर। अहं पपाच अहं पपच॥ ॥सख्युरसंबुद्धौ॥ ॥
असंबुद्धौ परे विग्रहस्तस्मात्परं सर्वनामस्थानं णिद्भवति। सखायौ सखायः सखायं सखायौ। असंबुद्धा
विति किं हे सखे॥ ॥अनङ् सौ॥ ॥सख्युः सौ परतः असंबुद्धावनङ् आदेशो भवति। सखा। असंबुद्धा
विसेव हे सखे॥ २८ ॥ ॥छ॥ ॥छ॥ ॥

चेति। णित्वपक्षे हृद्धिरभावात्तदभावः॥ ॥सख्युः॥ ॥अत्रापि णिदित्यनेन सामानाधिकरण्यात्सर्वनामस्थानं प्रथमान्तांत
त्रोत्तरार्थमसंबुद्धाविति प्रकृतमेतस्योपादानस्य प्रयोहान्वयस्त थादर्शयति असंबुद्धौ परः सखिशब्द इति॥ ॥अनङ्॥ ॥सर्व
नामस्थानप्रकरणात्संबुद्धिपर्युदासाच्च साविति प्रथमैकवचनस्य ग्रहणं न सप्तमीबहुवचनस्य। आकारविधाने सो हल्ङ्या
दिलोपो न स्यात्। एवं तर्हि सोर्डादेशो विधीयतां। एवं सिद्धे यत्नङ् शास्ति तज्ज्ञापयति अनङ् एवंक विषयस्य गुणमस्तीति तेन पदृस
ति संबुद्धावपि पक्षे नङ् स्यात् इति न दुष्यत्वं भवति २८ ॥

॥ ऋदुशनस्पुरुदंसोनेहसां च ॥ ॥ संबुद्धावपि पक्षे नङिः स्यात् इति यदुक्तं तदागमेन द्रष्टव्यमिति । तथा चोक्तमिति । संबोधने संबुद्धौ । त्रयाणां रूपाणां समाहारः त्रिरूपं पात्रादिः । कानि पुनस्तानि रूपाणीत्यत आह हे उशनसित्यादि । सांतमनङो भावपक्षे । नांतं नलोपाभावपक्षे । अदंतं नलोपपक्षे । माध्यंदिनस्यापत्यं माध्यंदिनिराचार्यः वष्टि इच्छति । ...

॥ ऋदुशनस्पुरुदंसोनेहसां च ॥ ॥ ऋकारांतानामुशनसः पुरुदंससः अनेहसः इत्येतेषां चासंबुद्धावनङादेशो भवति सौ परतः । कर्त्ता हर्त्ता । पिता माता भ्राता । उशना । पुरुदंसा । अनेहा । असंबुद्धाविति किं । हे कर्त्तः । हे उशनः । हे पुरुदंसः । हे अनेहः । उशनसः संबुद्धावपि पक्षे अनङिष्यते । हे उशनन् । नङिः संबुद्धौ गीस्येतदपि पक्षे एवेष्यते । हे उशन । तथा चोक्तं । संबोधने तूशनसस्त्रिरूपं सांतं तथा नांतमथाप्यदंतं । माध्यंदिनिर्वष्टि गुणं त्विगंते नपुंसके व्याघ्रपदां वरिष्ठः इति । नपरकरणमसंदेहार्थं ॥ ॥ तृज्वत्क्रोष्टुः ॥ ॥ क्रोष्टुशब्दः स्तुनप्रत्ययांतः संज्ञाशब्दः सर्वनामस्थाने परतः संबुद्धौ तृज्वद्भवति ॥ ॥ २९ ॥ ॥ श्री ४ ॥ ॥ श्री ४ ॥ ॥ श्री ४ ॥ ॥ श्री ४ ॥

व्याघ्रपादपत्यानां मध्ये वरिष्ठो वैयाघ्रपद्य आचार्यो नपुंसके नपुंसकसंबंधिनि इगंते हेत्रयोदशाद्यैः गुणं वष्टीति श्लोकस्यार्थः ॥ ॥ तृज्वत् क्रोष्टुः ॥ ॥ क्रोष्टुशब्दः स्तुनप्रत्ययांत इति । क्रुश आह्वाने । सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् । संज्ञाशब्द इति तुनप्रत्ययस्य संज्ञार्थविधानात् । जंबुकस्य चेयं संज्ञा । वस्तुस्वरूपकथनमेतत् । अत्रानंतानंतस्यापि पठितमं । क्रोष्टुरिति सूत्रे षष्ठी । निर्देशात् । तृज्वद्भवतीति । तत्र चरवत् तृज्वत् तत्र तस्येवेति षष्ठीसमर्थाद्वतिः तदेव सर्वमुत्तरग्रंथे स्पष्टं स्फुटं २९

त्जंतस्य यद्रूपं तत्तस्य भवतीति। प्रत्ययग्रहणपरिभाषया त्जंतस्येति लभ्यते। अतिदेशोनेकप्रकारः निमित्तव्यपदेशतादात्म्यशास्त्रका
र्यरूपविषयः। तत्रेहादित्रयाणामसंभवाद्रूपातिदेशः। शास्त्रकार्यातिदेशयोरप्यविशेषः। शास्त्रातिदेशे तनानेन शास्त्रेण कार्यं क्रि
यवेति कार्यातिदेशे त्वतिदेशवाक्येनेवेति तत्र विप्रतिषेधे फलविशेषः। तद्यथा कर्मवत्कर्मणेत्यत्र शास्त्रातिदेशे कर्मकर्तरि भावकर्म
णोरित्येतद्वाक्यस्याप्रयत्नत्वमाश्रित्य शेषात्कर्तरि परस्मैपदप्रसंगः। कार्यातिदेशे त्वात्मनेपदमेव परत्वाद्भवतीति। इह तु नैवं विधो
विशेषः संभवतीति तयोरभेदमाश्रित्याविचारः प्रवर्तितो महाभाष्ये। किं पुनरयं शास्त्रातिदेश आहोस्विद्रूपातिदेश इति। तत्र शास्त्रस्य
प्राप्त्यसंभवात्समिति शास्त्रातिदेशः प्राप्नोति प्राधान्यात्तु रूपातिदेशप्रसंगस्तदर्थत्वादतिदेशानां तत्राक्षेपपक्षे आह सततविप
क्षे शास्त्रं तद्वातिदिश्यते अनाहस्यवा। पटित्वकृदवच्छास्त्रमतिदिश्यते तत आह सेतिपक्षः अथवा इहैव काण्डविवक्षितः चकारः स्व
रार्थः। नकारस्त्वप्रसिद्धाशंकानिवृत्यर्थः। अनुवृत्तिसामान्येन अप्रसिद्धाप्यतिदेशः शंक्येत अत उक्तं रूपस्थैकशब्दनिबंधनस्य वा समासा
ध्ये पाठो ज्ञापको निष्ठायामनिट्त्वस्य सहि नत्वार्थः। नत्वं चानिष्ठानोऽनंतरस्य विधीयते उड्डीनः उड्डीनवान्॥
॥यस्य विभाषा॥ ॥यस्य विभाषा इट् क्वचिदुक्तस्तस्य निष्ठायामिडागमो न भवति। वस्ताति। धूञ् इत्येतो वा विधू
तः विधूतवान्। गुहू। गूढः गूढवान्। उदितो वा। दृधु। दृधः दृढवान्। ते नियंति इत्यादिषु यसंयोगान्निमित्तेष
तेर्विकल्पिते क्त्वाऽपि इट् नीयाश्रितानीत्यतितेति निपातनादिडागमः॥ ११ ॥ ॥श्री४॥ ॥

यस्य विभाषा॥ ॥यस्य विभाषेत्यनुवादवाक्यं अत्र चेड् हित इति वा काशेषः यत्र क्वचिन्निमित्तसंबंधात्तस्य निष्ठायामिण्न भवतीति प्रतिषे
धवाक्यं संपद्यते। निपातनादिडागम इति। अयमस्याह अनित्योऽयं प्रतिषेधः क्वचिद्भवति न इत्यस्यार्थ इत्यकरणसामर्थ्यात्। यदि त्वयं विधि
र्निषेधः स्यात्तस्मिन् सिवीत्यनेन विभाषिते क्त्वा इत्यनेनैव प्रतिषेधस्य सिद्धत्वादीदित्करणमनर्थकं स्यादिति॥ ११ ॥ श्री४॥ ॥छ॥ ॥
॥ ॥ ॥ ॥ ॥

॥आदितश्च॥ ॥आध्मातो वान्त इति। भाष्यवार्त्तिकयोरनुक्तमपि प्रयोगबाहुल्यादुक्तं। योगविभागकरणं किमिति। योगविभाग एव तावद् दोषः अपि च एकयोगत्वे न चकारेण कर्त्तव्यो भवतीति प्रश्नः। एवं चोत्तरग्रन्थे चकारेण पठितव्यः। पठ्यमानस्तु अनुक्तसमुच्चयार्थो भावे॥ कथं पुनरेकयोगत्वे भावादिकर्मप्राप्तमन्यत्र प्रतिषेधः सिद्धस्तत्राह अन्यत्रेति। यदुपाधिरिति। उपाधिरभिधेयादिर्भेदकः। यदुपाधीनां भेदकत्वेन स्याद्योगविभागोऽनर्थकः स्यात् भेदकत्वे तु तेषां भावादिकर्मणोर्विकल्पविधानात् कर्तृकर्मणोः प्रतिषेधो न स्यादिति तदर्थो योगविभागः कर्त्तव्यः। किमेतस्य ज्ञापने प्रयोजनमित्यत आह तेनेति। लाभार्थस्य विभाषेति। अत्र हेतुर्वक्ष्यते पदत् स्तुपाधि

॥आदितश्च॥ ॥आदितश्च धातोर्निष्ठाया इडागमो न भवति। ञिमिदा। मिन्नः। ञिक्ष्विदा। क्ष्विण्णः। चकारोऽनुक्तसमुच्चयार्थः। आध्मातः। वान्तः। योगविभागकरणं किं। आदितश्च विभाषा भावादिकर्मणोरित्येवं हि एकयोगे भावादिकर्मप्राप्तमन्यत्र यस्य विभाषेति प्रतिषेधो न भविष्यति। ज्ञापनार्थं एतत् ज्ञापयति यदुपाधेर्विभाषा तदुपाधेः प्रतिषेध इति तेन विभाषागमहनविदविशामित्यत्र विदेर्लाभार्थस्य विभाषा ज्ञानार्थस्य प्रतिषेधो न भवति विदितः विदितवान्॥ ॥विभाषा भावादिकर्मणोः॥ ॥भावे आदिकर्मणि च आदितो धातोर्विभाषा निष्ठाया इडागमो न भवति। भावे। मिन्नमनेन मेदितमनेन॥ आदिकर्मणि। प्रमिन्नः प्रमेदितः। सौनागाः कर्मणि निष्ठायां शकेरिडिष्यते विकल्पेन। शक्तो घटः कर्तुं शकितो घटः कर्तुं भावे न भवत्येव। शक्तमनेन। अस्यतेर्भावे असितमनेन। आदिकर्मणि तु न भवत्येव अस्तः कोऽपि॥ ॥

भेदकः तत उदितो वेति क्त्वाप्रत्यये भाववाचिनि विकल्प इति निष्ठायामपि भाव एव प्रतिषेधः स्यात्। लाभार्थी तरोः शब्देनाश्रीयमाणो ह्युपाधिर्भेदकः न चोदितो वेत्यत्र भाववाचित्वं शब्देनाश्रितं तथा च तेन निर्दिष्टं निर्दिष्टत्वे क्षए तादिष्मर त्वाद्युपपत्तिः॥ ॥विभाषा॥ ॥मेदितमनेनेति। निष्ठा शीङ् इति कित्वप्रतिषेधाद्गुणः। प्रमिन्नमिति। आदिकर्मणि क्तः कर्तरि चेति कर्तरि क्तः। सौनागा इति। सुनागस्यापत्यं शिष्याः सौनागाः। शकितो घटः कर्तुमिति। यद्यपि शकिः केवलोऽकर्मकः तथापि तुमुन्नन्तवाच्यक्रियाविशेषणत्वेन सकर्मको भवति तथा च कर्मणि लादयो दृश्यन्ते अयं योगः शकी वर्जुं अपमर्थः। शक्या नेव क्तुमिति॥ ॥७ ७॥ ॥७ ७॥ ॥

क्षुब्धस्वांत॥ ॥मंथाभिधानं चेदिति। समुदायेन वै कंथोऽभिधीयत इत्यर्थः। एतेन समुदायानामभिधेयभावेन मंथादयस्तहोपपन्ना इति द
र्शयन्नियदितु धात्वर्थो याभित्वे नाम्नी येन न मंथादिसाधने धात्वर्थस्तु व्यापारो निपातनं तु शतिततः क्षुभितं मंथेनेत्यादावपि स्यात् इत्यद
असेपृक्तः स कृतो मंथः दधिमंथानमक्षुभत्योऽश्वेति हि दृश्यते। अन्ये तु मध्य तेनेमे तिमंथ न दंडः खजकोमंथ इत्यादृष्ठ। मंथापि क्षु

॥क्षुब्धस्वांतध्वांतलग्नम्लिष्टविरिब्धफांटवाढानि मंथमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु॥ ॥क्षुब्धस्वां
तध्वांतलग्नम्लिष्टविरिब्धफांटवाढ इत्येतानि निपात्यंते मंथमनस्तमःसक्तअविस्पष्टस्वरअनायासभृशइत्येतेष्वर्थेषु।
क्षुब्धमिति भवति मंथाभिधानं चेत् क्षुब्धो मंथः क्षुभितमन्यत्। क्षुभितं मंथेन। क्षुब्धा गिरिनदी सेयमा दावण्युपमा
नादवति। स्वांतमिति भवति मनोऽभिधानं चेत्। स्वनितमन्यत्। स्वनितो मृदंगः स्वनितं मनसा। ध्वांतमिति भव
तितमोऽभिधानं चेत्। ध्वनितमन्यत्। ध्वनितो मृदंगः ध्वनितं मनसा। लग्नमिति भवति सक्तं चेत् लगितमन्य
त्। म्लिष्टमिति भवति अविस्पष्टं चेत्। म्लेच्छितमन्यत्। इत्वमप्येकारस्य निपातनादेव। विरिब्धमिति भवति स्व
रश्चेत् विरिभितमन्यत्। रेभृ शब्दे इत्येतस्मात् क्तप्रत्यये निपातनं। अन्ये तु विरिभितमन्यदिति पठंति रिभिं च सौत्रमेव यथा
तुंबुर्यो विरिभंति॥ ॥१२॥ ॥श्री॥ ॥७ ७॥ ॥

चादिशब्दानां चलनादिक्रियायोगो यथासंभवं द्रष्टव्यः उपमानादिति। उपमानं सादृश्यं तच्च यथासंभवं द्रष्टव्यं। स्वांतशब्देन दिव
येष्वविक्षिप्तमनाकुलं मनउच्यते। स्वनितमिति। शब्दापितमित्यर्थः। मनसेति कर्तरि करणे वा तृतीया। एवं ध्वनितं तमसेत्यत्रापि। ल
ग्नमिति। लगे संगे। अत्र निष्ठान त्वमपि निपात्यते। म्लिष्टमिति। म्लेच्छ अव्यक्ते शब्दे। म्लेच्छितमिति। अपभाषितमित्यर्थः। अत्रा
र्थस्याविस्पष्टत्वाच्छब्दस्याविस्पष्टत्वं अपशब्दानामपि स्वरूपेणाभिव्यक्तत्वात्। इहाहुर्यो वर्णानभिव्यक्तिर्विस्पष्टत्वं। १२।

७का-प-२
४५

।फांटमित्यादि।कः पुनरत्रानायासो विवक्षित इत्यत आह यदशृतमित्यादि।पस्माधेयदौषधजातं तत्पथ्यं पंचधा कल्पना रसः कल्कः शृतः शी
तः फांट इति। रसः स्वरसः कल्कः पिष्टं शृतं क्वाथः शीतो मृन्मयपात्रे सौषधजातमुदके प्रक्षिप्य रात्रावधिवासितमुदकं प्रातः पीतं यत्तद्बो
ष्णोदके प्रक्षिप्य मृद्गोभिमृदुसत्वात्पयसीयते स फांटः। यथाह वाग्भटः। मृदो भिमृद्य तत्पूतं तत्फांट इति। पंचाप्येते कषायाः। तत्राशृतमिति क्वा
थस्य व्याहतिः। अपिष्टमिति कल्कस्य। उदकसंपर्कोत्थितमिति स्वरसस्य। ईषदुष्णमिति शीतस्य। मात्रशब्दः स्वभावानुवादः। विभक्तरसं प्राग्व
स्थाया भिन्नरसं यदेवंभूतं कषायांतरं फांटमित्यर्थः। कषायपशब्दः उभयलिंगः। कथं पुनरेतदनायासशब्देनोच्यते लक्षणया यावता हि अ

।फांटमिति भवति। अनायासश्चैतत्फाणितमन्यत्। यदशृतमपिष्टं कषायमुदकसंस्पर्शमात्रादभिव्यक्तरसमीषदुष्णं तत्
फांटं अल्पप्रयत्नसाध्यत्वादनायासेन लक्ष्यते। बाढमिति भवति भृशं चेत्। बाहितमन्यत्। बाहृ प्रयत्ने इत्येतस्य धातो
स्तन्निपातनं। अतिशयश्च भृशमिहोच्यते॥ ॥धृषिशसी वैयात्ये॥ ॥विपातनप्रभावेवे वैयात्यं प्रागल्भ्यमविनीतता तत्र धृ
षिशसिभ्यां निष्ठायामिडागमो न भवति। धृष्टोयं विशस्तोयं। धृषेरादित्त्वादिति प्रतिषेधः सिद्ध एव तथा शसेरपि उदि
त्त्वाद्यस्य विभाषेति नियमार्थं वचनं। धृषिशसी वैयात्ये एव इण्न भवति भावादिकर्मणोरपि वैयात्ये धृष्टमनेनेति। वैया
त्य इति किं। धर्षितः विशसितः॥ ॥दृढः स्थूलबलयोः॥ ॥दृढ इति निपात्यते स्थूले बलवति चार्थेभिधेये। दृढः स्थूलः दृ
ढो बलवान्। किमत्र निपात्यते दृहेः क्तप्रत्यये इडभावो हकारनकारयोर्लोपः। परस्य ढत्वं। अथ दृहिः प्रकृत्यंतरमस्ति तस्या
प्येतदेव सर्वं नलोपवर्जं नकारस्याभावात्॥ ॥

नायासेन लक्ष्यत इति॥ ॥धृषि॥ ॥ञिधृषा प्रागल्भ्ये शसु हिंसायां। षष्ठ्यर्थे प्रथमा विरूपयातं गमनं चेष्टितं यस्य स वियातः अविनी
तः शसेरपीत्यादौ यस्य विभाषेति प्रतिषेधः सिद्ध इत्यनुषंगः। अथ धृषेर्विभाषा भावादिकर्मणोरिति विकल्पे प्राप्ते नियमार्थं ग्रहणं कस्मान्न भव
तीत्यत्राह। भावादिकर्मणोरपीति। एवं चास्य आदित्त्वे प्रयोजनं चिंत्यं। धर्षितोभिभूतः सर्वविदं कित्वं विशसितो विकृतः॥ ॥दृढः॥
।स्थूलो मांसलो दुर्बलोपि। अस्थूलोपि बलवान् बलः। बलवति चेति। सत्रेसर्प्पो आद्यचः प्रसंग यातं बलशब्दं दर्शयति। दृहेरिति। दृहि
दृह्य वृद्धावित्येतावाप्याह इति वा। त्रिंशिकारस्य पक्षः। दृह दृहि वृद्धाविति भाष्यकारस्य। अथ किमर्थं हकारस्य लोपो निपात्यते न ढत्वमेव नि
पात्यतां परस्य ढत्वं च बहुलं ढो ढे लोपः इति सिद्धमित्यत आह॥

रा-प०
४५

हकारलोपनिपातनमिति॰ रेफेण न स्यात् रिफइत्यत्र वर्णादिति नापेक्ष्यते तेन रशाद्वेन स्यादित्यर्थः॰ ढलोपस्यासिद्धत्वे संयोगे गुर्विति
गुरुसंज्ञा प्राप्नोति यालघुसंज्ञा बाधितत्वात्तन्निबंधनकार्यप्रसंगः इत्यर्थः इह चेति॰ गुरुसंज्ञानिबंधनकार्यप्रसंगश्चेत्यर्थः॰ दृंहि
तमिति दृंहेः प्रत्युदाहरणं दृंहितमिति दृंहेः अत्र च दीर्घादि रूपेणाहृ इद्मुच्यते॥ ॥प्रभो॥ ॥ एवंणासमानमिति॰ इउभावादेनिपा
तस्यातुल्यत्वात् वृहेरिति॰ वृंहि इ द्वावितिवार्त्तिककारस्य पक्षः भाष्यकारस्य तु वृहि इ द्वाविति पाठः। वृंहिश्च यदि प्रकृत्यंतर

हलोपनिपातनं पूर्वत्रासिद्धत्वनिवृत्त्यर्थं ढलोपे हि सति तत एव पूर्वत्रासिद्धत्वात् द्रढिमा द्रढीयान् द्रढयतीत्यत्रौत्स
र्गिकोतो हलादेर्लघोरितिभावेन स्यात्। इह च परिवृढयत्यपगत इति स्यपि तद्गुरुर्वाहित्यपादेशेन स्यात्। इह च परि
वृढस्यापत्यं पारिवृढी कन्येति गुरुपोत्तमलक्षणः ष्यङ् प्रसज्येत स्थूलबलयोरिति किं दृंहितं वृंहितं॥ ॥प्रभो
परिवृढः॥ ॥परिवृढ इति नियामते प्रभुश्चेद्भवति। परिवृढः कुटुंबी। एवं णासमानं वृंहेर्निपातनमेतत् तथाहि वृहि
श्च यदि प्रकृत्यंतरमस्ति तदा तस्यापि पूर्ववद्धलोपनिपातनस्य तदेव प्रयोजनं परिवृढयति परिवृढयागतः पा
रिवृढी कन्येति। परिवृढमाचष्ट इति विगृह्य वृढशब्दादेव णिजुत्पाद्यते॰ संग्राममयते रेवमोपसर्गाणिजुत्पत्ति
रिष्यते नान्यस्मादिति। तथा च सति परिवृढयतीति तिङ् तिङ इति निघातः सिद्धो भवति परिवृढयागतस्य
न च परिशब्दस्य ल्यबंतेन सह समासे ल्यपादेशः सिद्धो भवति। प्रभाविति किं परिवृंहितं परिवृहितं १३ ॥

मस्तीति ततस्तस्यापि निपातनमित्यर्थः तदेव प्रयोजनमिति असिद्धत्वाभावश्च अथ कथं परिवृढय्येत्यत्र ल्यबादेशः यावता
परिवृढमाचष्ट इति विग्रहे तत एव णिच् कर्तव्यः समुदायस्य चाधातुत्वात् ल्यप्प्रसंगोपि तत एवकर्तव्यः तत आह परे पिल्यबंते तेनभा
वात् समासः इह च परिवृढयतीति परिशब्दस्यातिङं॰ तेन न भवति निघातोन स्यादित्यत आह॰ परिवृढमाचष्ट इति
विगृह्येति॰ णिजुत्पाद्यत इति एवं तत्पाठे तव्य आपरेतरपाठे तु विगृह्येति ल्यप्प्रसंगो न स्यात्॰ असमानकर्तृकत्वात्॰ संग्रामय

॥ कृच्छ्र ॥ ॥ कषतिर्हिंसार्थः कष्टो ऽग्निरिति चीयमानो ऽत्राग्निर्विवक्षितः स कष्टो भवति चयनप्रकारस्य दुर्ज्ञानत्वात् । माकरणस्य कष्टत्वं दुर्गमादिमिव स्थायादुर्ज्ञानत्वात् । साम्नां कष्टत्वं पर्वभेदस्य स्वरस्य स्तोभादीनां च दुर्ज्ञानत्वात् । काणा मयीनि । लक्षणया कृच्छ्रयन्तीति कृच्छ्राणीति कुत्स्न्याया ॥ ॥ घुषिरविशब्दने ॥ ॥ घुष्टा अविशब्दिता । अवघुषितं विशब्दितं विहत्तस्याभिप्रायमित्यर्थः । वेणादिकस्य नायं प्रयोगः स एव त्वमित्यर्थे वर्त्तते । सामान्येन गृह्यत इति । घुषिरिति सन्त्रोपान्तं रूपं द्वयोरपि साधारणमित्यर्थः । कथं सामान्येन ग्रहणं

॥ कृच्छ्रगहनयोः कषः ॥ ॥ कृच्छ्रगहन इत्येतयोरर्थयोः कषेर्धातोर्निष्ठायामिडागमो न भवति । कष्टो ऽग्निः । कष्टं व्याकरणं । ततो ऽपि कष्टानि सामानि । कृच्छ्रं दुःखं तत्कारणमप्याग्न्यादि कृच्छ्रमुच्यते । गहनेो कष्टानि वनानि । कष्टाः पर्वताः । कृच्छ्रगहनयोरिति किं कषितं सुवर्णं ॥ ॥ घुषिरविशब्दने ॥ ॥ घुषेर्धातोरविशब्दने निष्ठायामिडागमो न भवति । घुष्टा रज्जुः । घुष्टौ पादौ । अविशब्दन इति किं अवघुषितं वाक्यमाह । विशब्दनं प्रतिज्ञानं । घुषिरशब्दार्थ इति भ्वादिषु पठ्यते । घुषिर्विशब्दन इति चुरादिषु सो ऽपीह सामान्येन गृह्यते । विशब्दने प्रतिषेधश्च ज्ञापकश्चुरादिणिचो विशब्दनार्थस्यानित्यत्व इति तेनायमपि प्रयोग उपपन्नो भवति महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवा इति । ध्वाभिप्रायं शब्देनाविष्कृतवन्त इत्यर्थः ॥ ॥ अर्देः संनिविभ्यः ॥ ॥ सम् नि वि इत्येतेभ्य उत्तरस्मादर्देर्निष्ठायामिडागमो न भवति । समर्णः न्यर्णः व्यर्णः । संनिविभ्य इति किं अर्दितः ॥ ॥ श्री ४ ॥ ॥

यावता विशब्दने णिचा भवितव्यं केवलश्चेद् घुषिरुपात्तोत आह विशब्दनप्रतिषेधश्चेति । विशब्दनार्थस्यानित्यत्व इति अस्येत्वनिवृत्तावन्ये णिचापि भवितव्यं तेनायं प्रयोग इति । स्वार्थिके णिचि णिलोपस्येष्टत्वात् । फलं चिन्तितमुक्तं तथैव । सरणं तापं चकार सर्वत्र यथास्थानं । अपरश्चाह । चिन्तितस्य सामिती प्रतिपत्ति । णित्वमत्र ज्ञापकमस्येति हि । फलं चिन्तितमित्युक्ता । होनलो स्वरार्णं तास्व दृश्य इति सामान्येन ज्ञापकमाह । अपरस्त्वाह । चिन्तितस्य सामिती । प्रामितेनी चेत् पठितम् अभवेदिति । अयमपीति । यथोक्तार्थमाह इति । निष्ठायां णिचि सत्यत्र न लोपस्य प्रसंगतः । चिन्तनस्य सामित्ती । पामितेनी चेत् पठितं भवेदिति । अयमपीति । यथाभासमहृदिति । निष्ठायां णिचि सत्यत्र न लोपस्याप्रसंगतः । चिन्तनस्य सामित्ती । घष्यवघुषितं वाक्यमाह एसोतदपि प्रयोजनं तथापि जुघुषुरित्ययमपि प्रयोग उपपन्न इत्यर्थः ४ ॥ ॥ ७ ७ ॥ ॥ ७ ॥ ॥

॥ २ २ ॥ ॥ २ २ ॥ ॥

॥ अभेः ॥ ॥ विशेषेणाद्दूरं विदूरं ततोऽन्यदिति। तत्पुनर्यद्यपि सन्निकृष्टमविप्रकृष्टं वा भवति तद्वेदितव्यं तस्य भाव आविदूर्यमिति ब्राह्मणादेराकृति
गणत्वात् ष्यञ्। ननु च नञ्पूर्वात्तत्पुरुषादिति प्रतिषेधः प्राप्नोतीत्यत्राह एतस्मादेवेति। ननु च पूर्वं वृद्धिप्रकरणमधिकारः तेन ततः सूत्रादुत्तरस्य
भावप्रत्ययस्य प्रतिषेधस्तत्र क्रियते तदुत्तरस्येत्युक्तं॥ ॥ णेरध्ययने॥ ॥ अधीयत इत्यध्ययनमिति कृत्यल्युटो बहुलमिति कर्मणि ल्युट्। अनि
ष्टविशेषणं चैतत् अध्ययनाभिधायिन्यां निष्ठायामिति। णिलुक्चेति। अत्यल्पलक्षणेनाप्राप्तो णेर्लुक् इति णेर्लुक् निपात्यते। लोपनिपातने
तु गुणः स्यात्। वृत्तो गुण इति। गुणः पाठः पदक्रमसंहितारूपोऽध्ययनविशेषः स हि जनः संपादित इत्यर्थः। वृत्तिरयमित्यादिना सूत्रस्यानारंभमा
शंकते। अकर्मक इति। वृत्तेर्गुणस्य वृत्तं पारायणस्येति भावे क्तप्रत्ययोऽनार्थमिदमुक्तं। अकर्मकत्वे हि भावे निष्ठा भवतीति तयोरेवं यत्र भा

॥ अभेश्चाविदूर्ये ॥ ॥ अभिशब्दादुत्तरस्यार्देराविदूर्येऽर्थे निष्ठायामिडागमो न भवति। अभ्यर्णा सेना। अभ्यर्णा शरत्। आविदूर्य
इति किं। अभ्यर्दितो वृषलः शीतेन। पीडित इत्यर्थः। विदूरमतिविप्रकृष्टं ततोऽन्यदविदूरं तस्य भाव आविदूर्यं एतस्मादेव निपात
नान्नञ्पूर्वात्तत्पुरुषादुत्तरस्य भावप्रत्ययस्य प्रतिषेधो न भवति॥ ॥ णेरध्ययने वृत्तं॥ ॥ ण्यन्तस्य वृत्तेर्निष्ठायामध्ययनेऽर्थे वृत्त
मिति इडभावो णिलुक् च निपात्यते। वृत्तो गुणो देवदत्तेन। वृत्तं पारायणं। अध्ययन इति किं। वर्त्तितमन्यत्र। वृत्तिरयमकर्मकः स
ण्यर्थे वर्त्तमानः सकर्मको भवति तेन निर्वृत्तेः इति वृत्तेरेव कर्मणि क्तप्रत्ययो दृश्यते तद्धि हापितप्रत्यये वर्त्तेर्धातोरेव वृत्तो गु
णो देवदत्तेनेति भविष्यतीति निपातनमनर्थकं तत्क्रियते यदा णिलोपश्चैव ण्यर्थोऽभिधीयते तदा नीवर्त्तितमित्यध्ययने मा
भूदिति केचित्। अपरे तु वर्त्तितो गुणो देवदत्तेनेत्यपि इच्छन्ति॥ ॥२६॥ ॥

वे चाकर्मके स्यादित्यनुवर्त्तनेः। योऽपि नपुंसके भावे क्तः सोऽपि सकर्मकोऽप्यो न भवति तयोरेवं सूत्रस्य ग्रहणात् अन्यथा सकर्मकाद्भावे क्ते विधीय
माने कर्मणि द्वितीया प्रसज्येत ग्रामं गतमोदनं भुक्तमिति। यदि तर्ह्यकर्मकः कथं वृत्तो गुण इति कर्मणि निष्ठेत्याशंक्याह स ण्यर्थे वर्त्तमान इ
ति। यदि वा यं वृत्तिरकर्मकः स ण्यर्थे वर्त्तमान इत्येक एव ग्रन्थः अकर्मका अपि धातवो नभो विना ण्यर्थाः प्रयोज्येन कर्मणा सकर्मका भ
वन्ति यथा ह्याससं पुत्रेति। दृश्यते वर्त्तेरंतर्भावितण्यर्थस्य प्रयोगः इत्याह तेन निर्वृत्तमिति हीति। न चात्रोपसर्गवशात् सकर्मकत्वं ण्यर्थावग
तेः। वृत्तो गुण इति वर्त्तितो वेति क्तायां विकल्पिते कृते यस्य विभाषेतीट्प्रतिषेधः सिद्धः तदेवं निपातनमनर्थकमित्येव मतं चोद्यं परि
हरति तत्क्रियत इति। इडभावो मध्यामिडागमनिष्ठानिवृत्त्यर्थं निपातनमित्यर्थः। अपरे त्विति। तेषां मतेनानेनार्थः सूत्रेण॥ २६ ॥ ॥

।वासंता। यद्दांतश्च शांत इति। दमि शमी उपशमने आर्द्धौ। तेनुनिट्प्रतिषेधयोरनुनासिकस्य क्वि झलोरिति दीर्घश्च निपात्यमानस्य धातोर्लुकोऽप्य रनिमित्तकत्वाद्दीर्घविधिं प्रति निषेधाद्वस्य स्थानिवद्भावो नास्ति। पूर्ण इति। पूरी आप्यायने दिवादिः श्रुरादिश्चात्र स्त इति। तसु उपक्षये दसु च। अत्र दस्त इत मपि निपात्यते। स्पष्ट इति। स्पश बाधनस्पर्शनयोः। छद अपवारणे। अत्रापि इत्त्वमपि निपात्यते। ज्ञप्त इति। ज्ञप मिच्च चुरादिः। इट्प्रतिषेधो णि लुक्च निपात्यत इति। चकारात् किं विदुः पधात् इत्त्वं च। कश्चित्तु ज्ञातेर्ज्ञपेर्मरं ज्ञपिम्नामिति विकल्पविधानात् घस्य विभाषेति नीट्प्रतिषेधे प्राप्ते विकल्पो

।।वा दांतशांतपूर्णदस्तस्पष्टछन्नज्ञप्ताः।। ।।णेरिति वर्त्तते। दांत शांत पूर्ण दस्त स्पष्ट छन्न ज्ञप्त इत्येतानि निपात्यंते। दम्यादीनां धातूनां ण्यंतानां निष्ठायां वा इडागमो निपात्यते। दांतः दमितः शांतः शमितः। पूर्णः पूरितः दस्तः दासितः स्पष्टः स्पाशितः छन्नः छादितः ज्ञप्तः ज्ञपितः। इट्प्रतिषेधो णिलुक्च निपात्यते। ज्ञपेस्तु मारज्ञपिसनामिति विकल्पविधानात् घस्य विभाषेति नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं निपातनं।। ।।रुष्यमत्वरसंघुषास्वनां।। रुषि अम त्वर संघुष आस्वन इत्येतेषां निष्ठायामिडागमो वा न भवति। रुषितः तीषसहलुभरुषरिष इति विकल्पविधानात् घस्य विभाषेति प्रतिषेधे प्राप्ते विकल्प उच्यते। अभ्यांतः अभ्यमितः। तूर्णः त्वरितः। आदितश्चेति प्रतिषेधः प्राप्तः। संघुष्टं वाक्यमाह संघुषितं वाक्यमाह। संघुष्टौ दम्यौ संघुषितौ दम्यौ।। ।।छ छ।। ।।छ छ।। ।।छ छ।। ।।

र्थं निपातनमिति। एकाच्ग्रहणं पयस्य विभाषेत्यत्र नानुवर्त्तत इति भावः। अत्रादितश्चेत्यनु स्योग्रहणं शकारमकर्तुं अंतर्भावितण्यर्थानां प्रकृत्यंतानां तद् स्यादीनिड्वारणे अमत्वरयुक्तानां न्मितद्यादीनि।। ।।रुष्यमत्वर।। ।।अम्यो त इति। अम गत्यादिषु। पूर्ववद्दीर्घः। त्वर इति। ञित्वरा संभ्रमे। ज्वरत्वरेत्यादिना ऊठ्। आदितश्चेति प्रतिषेधे प्राप्त इति। आदित्वे तु प्रयोजनं मृग्यं। आत्मनेपदार्थं तावत्कश्चिदनुबंधः आंपतं जनीपः। कश्चिदाह। आदित्वं यङ्लुगर्थमिति। न हि तत्रायं विकल्पः एकाच इत्यनुवृत्तेः। आदित्करणसामर्थ्याज्ज्ञानुबंधनिबंधनो प्यादितश्चेति प्रतिषेधो यङ्लुकि भवति।। ।।श्री।। ।।श्री।। ।।

संपूर्वस्य घुषेरिति। घुषिरविशब्दने इत्यस्मात्संपूर्वादवकाशो घुष्टा रज्जुः। अस्य विकल्पस्यावकाशः संपूर्वत्वेऽपि विशब्दनं संघुष्टं वाक्यमाह संपूर्वस्या
विशब्दने विप्रतिषेधः। आङ्पूर्वस्येत्यादि। क्षुब्धस्वान्तेति निपातनस्यावकाशः संपूर्वत्वे सति विशब्दनं संघुष्टं वाक्यमाह संपूर्वस्याविशब्दने विप्रतिषे
धः। आङ्पूर्वस्येत्यादि। क्षुब्धस्वान्तेति निपातनस्यावकाशो नाङ्पूर्वत्वे सति मनोभिधानं स्वान्तं मन इति। अस्य विकल्पस्यावकाशः। आङ्पूर्व

संपूर्वस्य घुषेरविशब्दनेऽपि परत्वादयमेव विकल्पो भवति। आस्वान्तो देवदत्तः आस्वनितो देवदत्तः। आस्वान्तं मनः आस्व
नितं मनः। आङ्पूर्वस्य स्वनेर्मनोभिधानेऽपि परत्वादयं विकल्पः क्षुब्धस्वान्तेति निपातनं बाधते॥ ॥हृषेर्लोमसु॥ ॥लो
मसु वर्तमानस्य हृषेर्निष्ठायामिडागमो वा न भवति। हृष्टानि लोमानि। हृषितानि लोमानि। हृष्टं लोमभिः हृषितं लोमभिः
हृष्टाः केशाः हृषिताः केशाः हृष्टं केशैः हृषितं केशैः। हृषु अलीके इत्युदित्वान्निष्ठायामनिट्। हृष तुष्टौ विस्मये त्वितयो
रुभयोरिह ग्रहणमिति उभयत्र विभाषेयं। लोमानि मूर्धजान्यंगजानि च सामान्येन गृह्यन्ते यथा लोमनखं स्पृष्ट्वा शौचं क
र्तव्यमिति। तद्विषये च हर्षे वर्तमानो हृषिर्लोमसु वर्तत इत्युच्यते। लोमस्विति किं हृष्टो देवदत्त इत्येवमलीकार्थस्य हृ
षितो देवदत्त इति च तुष्ट्यर्थस्य विस्मितप्रतिघातयोश्चेति वक्तव्यं हृष्टो देवदत्तः हृषितो देवदत्तः विस्मित इत्यर्थः हृ
षिता दन्ताः प्रतिहता इत्यर्थः॥ १५ ॥ ॥छ॥ ॥

तेसत्यमनोभिधानं आङ्पूर्वत्वे मनोभिधाने च सति विप्रतिषेधः॥ ॥हृषेः॥ ॥हृष्टानि उत्कृष्टानि। मूर्धजाः केशाः अंगान्तरजानि लोमानीति
निघंटुप्रसिद्धिः कल्पसूत्रकारेणाप्य पठित इत्यनुगुणाः प्रयोगाः केशश्मश्रुलोमनखानि वापयन्तीति। इह तु केशानामपि ग्रहणमिष्यते मू
र्धजामंगजानि चेति। अत्र विशेषोऽस्य मूर्ध्ना सामान्येन गृह्यन्त इति। क्वयथेत्यत्राह यथेति। ननु क्रियावचनस्य धातोः कथं द्रव्यात्मकेषु लोमसु
वृत्तिरित्यत आह तद्विषये चेति। प्रतिहताः काठिन्यदूरत्वादनेन शीतयीडया वा हता इत्यर्थः॥ १५ ॥ ॥छ छ॥ ॥छ॥ ॥

॥अपचितः॥ ॥अपचितोनेनगुरुरिति। चायृपूजानिशामनयोः निशामनेचायंप्रयोगः। पूजायांतुमतिबुद्धिपूजार्थेभ्यश्चेतिवर्त्तमानेक्तेसतिक्त
स्यचवर्त्तमानइतिषष्ठ्याभवितव्यं। क्तिनिस्यमिति। क्तिन्लावादिभ्यइतिक्तिन्। अन्यथात्गुरोश्चहलइत्यकारः स्यात्॥ ॥ह्रुह्वरेः॥ ॥ह्वरेरितिह्रुतो
हित्येस्यागंतुकेकारेणागुणोननिर्दिष्टः॥ ॥अपरी॥ ॥आदेशस्याभावइति। पूर्वसूत्रेणप्राप्तस्याबहुवचननिर्देशाच्छंदसितस्यैवप्रयोगात्

॥अपचितश्च॥ ॥अपचितइतिवानिपात्यते अपपूर्वस्यचायतेर्निष्ठायामनिट्त्वंचिभावश्च· अपचितोनेनगुरुः अप
चायितोनेनगुरुः क्तिनिनित्यंचिभावोवक्तव्यः· अपचितिः॥ ॥ह्रुह्वरेश्छंदसि॥ ॥ह्वरेः छंदसिविषयेनिष्ठायांह्रु
इत्ययमादेशोभवति· ह्रुतस्यचाह्रुतस्यच· अह्रुतमसिहविर्धानं छंदसीतिकिं ह्वृतं॥ ॥अपरिह्वृताश्च॥ ॥अपरिह्वृ
ताइतिनिपात्यतेछंदसिविषयेह्रुइत्येतस्यादेशाभावोनिपात्यते· अपरिह्वृताः सनुयामवाजं॥ ॥सोमेह्वरितः॥ ॥
ह्वरितइतिह्वृतेरनिष्ठायामिडागमोगुणश्चनिपात्यतेछंदसिविषयेसोमश्चेत्तद्भवति· मानः सोमोह्वरितोविह्वरितस्त्वं
॥ ॥ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्वलितिक्षरि
तिक्षमितिवमित्यमितीतिच॥ ॥ग्रसित· स्कभित· स्तभितउत्तभित· चत्त· विकस्त· विशस्तृ· शंस्तृ· शास्तृ· तरुतृ·
तरूतृ· वरुतृ· वरूतृ· वरूत्रीः उज्वलिति· क्षरिति· क्षमिति· वमिति· अमिति· इत्येतानिछंदसिनिपात्यंते· ग्रसितस्क
भितस्तभित॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥

र्शनात्॥ ॥सोमो॥ ॥इडागमोगुणश्चेतिचकारादादेशाभावश्च॥ ॥ग्रसित॥ ॥ग्रसुअदने। स्कंभुस्तंभुरोधनार्थौसौत्रौ। चतेयाच
ने। कसगतौ। शसुहिंसायां। शंसुस्तुतौ। शासुअनुशिष्टौ। तॄप्लवनतरणयोः। वृङ् संभक्तौ। वृञ्वरणे। ज्वलदीप्तौ। क्षरसंचलने। क्ष
मूषसहने। टुवमउद्गिरणे। अमगत्यादिषु॥ ॥

।उत्तभितेति। उदः स्थास्तंभोः पूर्वस्येति पूर्वसवर्णः सकारस्य तकारः॥ अन्योपसर्गपूर्वस्तभितशब्दो न भवतीति यदि स्यादुत्तभितम्

उत्तभितः इति प्रस्तुस्तं प्रस्तुतं प्रस्तुस्त्वे तेषामुदित्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इडागमो निपात्यते· ग्रसितं वा एतत्सोमस्य· ग्रस्त मिति भाषायां· स्कभितं· विष्कभिते अजरे· विष्कब्धे इति भाषायां· स्तभितं· येन स्वः स्तभितं· स्तब्धमिति भाषायां· उत्तभितं· सत्येनोत्तभिता भूमिः उत्तब्धेति भाषायां उत्तभितेत्युत्पूर्वस्य निपातनसामर्थ्यादन्योपसर्गपूर्वः स्तभितशब्दो न भवति· चत्तविकस्तेति चतेः कसेश्च विपूर्वस्यानिष्ठायामिडभावो निपात्यते· चत्ता वर्षेणाविद्युतः· चतितेति भाषायां विकल्पस्तत्ता· उत्ता नाया तद्दृष्टयं यद्विकस्तं· विकसितमिति भाषायां· निपातनचबहुत्वापेक्षं विकस्ता इति बहुवचनं। अपरे खुतु निपातनेषु प्रत्येकं विभक्तिनिर्देशः।विशस्तृशंस्तृशास्तृ इति शसेर्विपूर्वस्य शंसेः शासेश्च तृचि इडभावो निपात्यते· विशास्तृ· एकस्त्वष्टुरश्वस्या विशस्ता· विशसितेति भाषायां· शंस्तृ· ग्रावग्राभउत शंस्ता· शंसितेति भाषायां।शास्तृ· प्रशास्ता प्र सुहि· प्रशासितेति भाषायां तरुतृतरूतृवरुतृवरूतृवरूत्री इति तरतेर्वृञ्वृञोश्च तृचि उट् ऊट् इत्येतावागमौ निपात्येते· तरुतारं रथानां तरूतारं रथानां। तरितातरीतेति भाषायां· वरुतारं रथानां वरूतारं रथानां।वरितारं वरीतारमिति भाषायां। वरूत्रीर्छ्रुदेवीर्विश्वदेव्यावतीः।ङीप्पूर्वसवर्णोच्चारणं प्रयोगदर्शनार्थं अतन्त्रत्वेन दृष्टमपि द्विर्भवति· भाषायां। वरूत्री ब्रृदेवी विश्व देव्यावतीः। छांदसं दृष्टत्वं प्रपंचार्थमेव च ङीवं तस्मान्निपातनं। वरूतृशब्दो हि निपातितस्तस्मा एव च होतात्राणि वैवरूत्र्य इति। छांदसं दृष्टत्वं प्रपंचार्थमेव च ङीवं तस्मान्निपातनं वरूत्रीशब्दः॥ उज्ज्वलिति क्षरितिक्षमितिवमितिअमितीति च ज्वलतेरुत्पूर्वस्य क्षरक्षमवमअमर् दीपिसमिति सिद्धो वरूत्रीशब्दः॥ उज्ज्वलिति क्षरिति क्षमिति वमिति अमितीति च ज्वलतेरुत्पूर्वस्य क्षरक्षमवमअम इत्येतेषां चति पिशपरस्कारादेशो निपात्यते शलुकिवा इडागमः। अग्निरुध ज्वलिति। उज्ज्वलतीति भाषायां। स्तोकं क्षरिति। क्षरतीति भाषायां। स्तामं क्षमितिक्षमतीति भाषायां। सोमं वमिति वमतीति भाषायां। अम्यमिति वरुणः। अम्यमतीति भाषायां। इतिकरणं प्रदर्शनार्थं तेन कचिदीकारोऽपि भवति ति

हणामनर्थकं स्यात्। निपातनबहुत्वापेक्षमिति। तेन छांदसः प्रयोग एकवचनांतोऽप्युदाहृत इति भावः॥ ॥इतिकरणः प्रदर्शनार्थं इति।
तस्य प्रकारार्थत्वात्॥ १६॥ ॥७॥ ॥

॥आर्द्ध॥ ॥आस्ते वस्त इति। ननु वक्ष्यति रुदादिभ्यः सार्वधातुक इत्येतन्नियमार्थं भविष्यति रुदादिभ्य एव सार्वधातुक इति तत्राह रुदादिभ्यः
सार्वधातुक इत्येतन्न स्यान्निति। नियमे विज्ञायमाने विपरीतोऽपि नियमः संभाव्यते रुदादिभ्यः सार्वधातुक एवेति। तत्र च वक्रमं रुदवि
देति त्क्वासनोः कित्वविधानानर्थक्यं भविष्यति अनिटः सनो हलादेः हलिं ताच्छेत्येव सिद्धत्वात् क्त्वोऽप्यनिट्कोऽपदेशिकं कित्वस्य द्वागादि
ति ततश्च प्रतिपत्तिगौरवं स्यात्। ननु चासत्यार्द्धधातुकग्रहणे अंगाद्येत्यधिकारान्नस्यैवेट् प्राप्नोति यथा लुङ् लृङ्: स्वदुदात्त इति।
ज्ञापकात्सिद्धं यदयमेकाच उपदेशेऽनुदात्तादिति प्रत्ययस्येट्प्रतिषेधं शास्ति यच्च निष्ठायां सेटि निर्त्क्वा सेडिह्वाहृत ज्ञापयति प्रत्ययस्ये

॥आर्द्धधातुकस्येड्वलादेः॥ ॥छंदसीति निवृत्तं। आर्द्धधातुकस्य वलादेरिडागमो भवति। लविता लवितुं ल
वितव्यं। पविता पवितुं पवितव्यं। आर्द्धधातुकस्येति किं। आस्ते वस्ते शेते। रुदादिभ्यः सार्वधातुक इत्येतन्नि
यमार्थो विज्ञायमाने प्रतिपत्तिगौरवं भवतीत्यार्द्धधातुकग्रहणं क्रियते। वलादेरिति किं। लव्यं लवनीयं।
इति वर्त्तमाने पुनरिड्ग्रहणं प्रतिषेधनिवृत्त्यर्थं॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

वाय मिडिति। न च वह क्षत्वमित्यादौ प्रतिपरिक प्रत्ययस्य प्रसंगः। अंतरंगत्वातोऽङ्गाधिकारात्। एवमपि जुगुप्सते लूयां लूमिरि
त्यादौ प्रसंगः। इडिति नुम धातोरित्यतो द्वितीयमपि धातुग्रहणमनुवर्त्तिष्यते तत्रैकं स्वरूपपदार्थकं तत्र श्च धातोरित्येवं धातुस्
थ इह तत्र विहितस्य धातोः परस्येड्विधानान्नकाश्चनिर्दे तदेवं वद्ध प्रतिविधेयत्वात्प्रतिपत्तिगौरवपरिहारार्थमार्द्धधातुकस्येत्युक्तं
। प्रतिषेधनिवृत्त्यर्थमिति। केन पुनः प्राप्तस्य प्रतिषेधः शंक्यते। इदमेव वचनं कल्प्यं कस्मात् अस्त्यार्द्धधातुमात्रस्येट् यतो वलादेः
प्रतिषिध्यत इति निड्गुशिकतीत्यादिकस्तु प्रतिषेधो नियमार्थः स्यात्॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ छ॥ ॥

॥स्नुक्रमोः॥ ॥स्नुक्रमोरुदात्तत्वादिटि सिद्धे नियमार्थं वचनं अनात्मनेपदनिमित्त एव यथा स्यादन्यत्र मा भूदिति। अथ प्रस्नुतः प्रस्नुतवा
न् प्रस्नुस्नूषति क्रान्तः क्रान्तवान् श्रयुकः कितीति निग्रहणोऽश्वस्य विभाषेति प्रतिषेधे प्राप्ते विभाषार्थमिनत्वकस्मान्न भवति। पुरस्तात्प्रतिषे
धाकांइकरणान्तत्स्य प्रयोजनमनाश्रितविधानविशेषस्येणमात्रस्य प्रतिषेधो यथा स्यादिति। यद्यनात्मनेपदनिमित्त इति प्रसज्यप्रतिषे
धः स्नुक्रमोरात्मनेपदनिमित्ते सतीण् न भवतीति। एवं च प्रतिषेधप्रकरण एवैतत्पठितव्यं तत्रायमप्यर्थः नञ्ञ्तया दानेन कर्तव्यं भवति
तथा तु न कृतमित्येव। अत्र यद्यात्मनेपदशब्देन नञः समासं कृत्वा पश्चान्निमित्तशब्देन षष्ठीसमासः क्रियते आत्मनेपदादन्यदनात्मनेप
दं परस्मैपदमिति यावत् तस्य निमित्तं तत्र च यत्र स्नुक्रमी परस्मैपदनिमित्ते च क्रमिः यथाक्रमीत चक्रमिव चक्रमिम प्राप्तावीत्प्रस्नुस्त्वि

॥स्नुक्रमोरनात्मनेपदनिमित्ते॥ ॥स्नुक्रमोरिड्धातुकस्य
वलादेरिडागमो भवति न चेत् स्नुक्रमी आत्मनेपदस्य निमित्ते॥ १७

वितास्तीतेत्यत्रैवेड्वतीत्यर्थः स्यात् तत्र कृते न स्यात् प्रस्नविता प्रस्नवितुं प्रस्नवितव्यं प्रक्रमिता प्रक्रमितुं प्रक्रमितव्यमिति। तथा विक्रमि
षतीत्यत्रापि न स्यात् नहि सनं तावदुत्पद्यमानस्य परस्मैपदस्य क्रमिर्निमित्तं परस्मैपदग्रहणमेव च कर्तव्यं स्यात् तस्मादात्मनेपदशब्द
स्य निमित्तशब्देन समासं कृत्वा पश्चान्नञ्समासः कर्तव्यः प्रसज्यप्रतिषेधत्वं तु नेष्यते वाक्यभेदस्य स्यात्। तत्र यद्यनात्मनेपदनिमि
त्त इति सप्तम्येकवचनं स्यात् तत्रायमर्थः। स्यात् आत्मनेपदस्य प्रनिमित्तं ङकारादि तस्मिन् सति न भवतीति ततश्च प्रस्नवितीयतरस्मात्रा
पि प्रतिषेधः स्यात् द्विघतेत्यत्रात्मनेपदस्य निमित्तं क्यङोङकार इति प्रथमाद्विवचनान्तं स्नुक्रमोर्विशेषणमिति दर्शयति न चेत् स्नुक्र
मी आत्मनेपदस्य निमित्तमिति। वृत्तौ प्रमाणमिति वदेकवचनं। सूत्रे तु प्रत्येकं निमित्तत्वस्य विवक्षितत्वाद्द्विवचनं॥३७॥४॥

॥श्री४॥ ॥श्री४॥ ॥४॥ ॥

निमित्तशब्दोयमत्तियोग्यतामात्रेकस्सूलक्ष्येष्वपिबीजेषुवक्तारोभवंतिअंकुरनिर्वर्तितामेतानीति।आत्तिचकुर्वद्रूपेतत्राद्येपक्षेकात्म
पिप्रतिषेधःस्यात्प्रस्नावितामस्नावितुंप्रस्नावितवान्प्रक्रमिताप्रक्रमितुंप्रक्रमितवानमिति।आस्तिस्त्वत्रयथायोगंभावकर्मकर्तृविषय
ताद्दात्मनेपदंप्रतियोग्यत्वंतदिह किंविवक्षितमितिपृच्छतिक्वचनावात्मनेपदस्यनिमित्तमिति।इतरोपिकुर्वद्रूपपक्षाश्रयणेनय
दिहेतिपत्रेस्यादि।अत्रैवंमाख्येयंयत्रात्मनेपदंतदाश्रयंभवतितत्रैवात्मनेपदस्यनिमित्तं।किंपुनस्तद्यत्रतदाश्रयमात्मनेपदं
भवतीत्याहभावकर्मेत्यादि।अत्रहिविषयेस्नुक्रम्याद्युपमात्मनेपदंभवतीतिकुर्वद्रूपपक्षएवनिमित्तशब्दोनुरूपः योग्यतामात्रे

क्वचात्मनेपदस्यनिमित्तंयत्रात्मनेपदंतदाश्रयंभवतिभावकर्मकर्मकर्तृकर्मथमितिहाएः क्रमेर्दृत्साद्यश्चतेन।
यंसस्यात्मनेपदेप्रतिषेधोनास्तिरितिप्रतिषेधफलंचेदंसूत्रं।स्नुक्रमोरुदात्तत्वादिट्सिद्धएव।प्रस्नविताप्र
स्नवितुंप्रस्नवितव्यं।क्रमिताक्रमितुंक्रमितव्यं।अनात्मनेपदनिमित्तइतिकिं॥ ॥श्री॥ ॥श्री॥ ॥

तोपचारिकइतिभावः।ननुचभावकर्मादिषुतस्यार्थोआत्मनेपदस्यनिमित्तंनस्नुक्रमीकतहिप्रतिषेधःस्याद्यत्रहिक्रमित्तंअनुपसर्गा
द्वाक्रंसीत्युक्रंस्यतेनैवदोषः।भावकर्मकर्मकर्तारः क्रमेर्दृत्साद्यः सर्वसेवेतद्वातोरेवविषयतया।विशेषणांघातरेचतुसाक्षादात्मने
पदस्यानिमित्तंभावादिविषयाद्धातोरात्मनेपदंभवतीति।तेनेत्यादि।यतएवंकुर्वद्रूपमेवात्रनिमित्तंतेनायंसस्यात्मनेपदेप्रतिषेध
इत्यर्थः।किमुभनेप्रतिषेधइतिपावतापर्युदासाश्रयणोपक्रमेअप्राप्तेनतत्राहप्रतिषेधफलेचेदंसूत्रमिति।सत्यंपर्युदासेपिनि
यमार्थत्वान्नियमस्यचेतद्व्यावृत्तिफलकत्वादेवमुक्तमित्यर्थः॥

प्रस्नोषीष्टेति। आशिषि लिङ्। भावकर्मणोरित्यात्मनेपदं प्रक्रंसीष्टेति। अत्रानुप्रोपाभ्यां समर्थाभ्यामिति कर्तरि। सर्वत्रेत्यादिना सूत्रार्थमु
दाहरणे दर्शयति। ननु सनन्तात् विधीयमानस्यात्मनेपदस्य स एव धातुर्निमित्तं न त्वक्रमीति तत्राह सनन्तादपीति। एवं वारितिवचनात् अप्रकृतिगत
मेव सनन्तेऽपि निमित्तमिति भावः। यदा तर्हि सनन्ताद्भावकर्मणोरात्मनेपदं तदा प्रतिषेधो न प्राप्नोति नहि तदा प्रकृतिगतं किमपि निमित्तमपेक्षि
तं किं तर्हि सनन्तमेव तत्र निमित्तं मुत्री भवति रस्मादिवत्॥ एवं तर्हि सनन्ताद्भावकर्मणोरपि पूर्ववत्त्वान्नरस्यात्मनेपदं भविष्यति भ्यति ए
त योरर्थयोः सन्प्रकृतावात्मनेपदस्य दृष्टत्वात् न त्वयथापि सनन्तमपि समेव निमित्तमुपयुज्यते त[illegible] वा यदि भावकर्मणोरित्यस्यात्मा
शः भूयते प्रत्यते सर्वत्र स्तनरत्नस्यावकाशः शिशयिषते सनन्ताद्भावकर्मणोरभयप्रसंगे परत्वात् पूर्ववत्सनः इत्यनेन न भवति ष्यति यदि

॥ प्रस्नोषीष्ट प्रक्रंसीष्ट प्रस्नोष्यते प्रक्रंस्यते प्रसुस्नूषिष्यते प्रचिक्रंसिष्यते सर्वत्रैवात्र स्नौतिः
क्रमिश्चात्मनेपदस्य निमित्तं सनन्तादपि हि पूर्ववत्सनः इत्यात्मनेपदं विधीयते॥ १८ ॥

परं विशेषो नास्ति तुल्यमतेतदपि न अत्रैव विशेषस्य संभवात्। एवमपि न सिध्यति। पूर्ववत्सनः इत्यत्र कर्तरि कर्मव्यतिहारे इत्यतः क
र्तरीत्यनुवृत्तेः तत्र हि प्रकरणे सर्वत्रैव कर्तरीति संबध्यते अथापि न संबध्यते एवमपि यदा सनन्ताच्चिक्रंसते वा इति भावकर्मणो
रिति वात्मनेपदं तदा प्रतिषेधो न सिध्यति चिक्रंस्यते चिक्रंस्यते इति। किंच भोक्तरापि प्रतिषेधः स्थ्यते वा इ मिष्यते। यदाह वार्त्तिक
कारः सिद्धं तु स्नौत्यात्मनेपदेन समानपदस्थस्य प्रतिषेधात् क्रमेश्चेति। तदेवमात्मनेपदेन समानपदस्थत्वे प्रतिषेधं कुर्वतो वार्त्ति
ककारस्यैवं विषये प्रतिषेधः स्नोलक्ष्यते यथा पुनर्हीति कारणात्ख्यान्तं तथा न प्राप्नोति कर्त्तव्योऽत्र यत्नः॥ ॥१८॥ ॥छ॥ ॥
॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

।यदि स्यादात्मनेपदे प्रतिषेधः माकारि निमित्तग्रहणं आत्मनेपद इत्येवास्तु सति सप्तमी विज्ञास्यते आत्मनेपदे सति न भवतीति यद्येवं लड्येन
कृतं स्यात्तत्तु न लभ्यं शास्त्रेण सम्प्रयुक्ताः सर्वाः परस्मैपदमिति नियमात् परस्मैपदं तु यदि स्नुक्रमो विशेषणं स्नुक्रमोरात्मनेपदे नन्तरं इति निमि
त्तं प्रस्नोषीष्ट प्रक्रंसीष्ट प्रस्नोष्यते प्रक्रंस्यते अत्र न प्राप्नोतीत्येन अव्यवहितत्वात्। अथ इड्धातुकस्य विशेषणं स्नुक्रमिभ्यां परस्यार्धधा
तुकस्यात्मनेपदे नन्तरं इति सिद्धं प्रस्नोष्यते प्रक्रंस्यते प्रस्नोषीष्ट प्रक्रंसीष्ट अत्र न प्राप्नोति सीयुट आत्मनेपदभक्तत्वात् उभयथापि
प्रचिक्रंसिष्यते अत्र न प्राप्नोतीति न स्यात्र क्रमेस्ततः परस्यार्धधातुकस्यात्मनेपदमनन्तरं तस्मान्निमित्तग्रहणं कर्तव्यं तदाह निमि
त्तग्रहणमित्यादि। तदात्मनेपदं यस्मात्तत्परः प्रचिक्रंसिष्यते इत्यादौ एष प्रत्ययः सम्परोपस्थात्सन्नन्तस्य परः सन्प्रत्ययः इह (

निमित्तग्रहणं सीयुडादेस्तत्परस्य च प्रतिषेधार्थं इह तु प्रस्नविते वाचरति प्रस्नवित्रीयत इति
क्यङ् तमात्मनेपदस्य निमित्तं न स्नोतेः क्रमेस्तु कर्तर्यात्मनेपदे कृति प्रतिषेधो वक्तव्यः। प्रक्रान्ता
उपक्रान्ता कर्तरीति किं प्रक्रमितव्यं उपक्रमितव्यं। आत्मनेपदविषयादिति किं निष्क्रमिता स्नो
तेः सनि किति च प्रत्यये परतः अस्रुकः किति सनि प्रसुस्रूषते प्रतिषेधो भवति प्रसुस्रूषति प्रसु

त्वित्यादि। प्रागेवमाख्यातं प्रस्नवित्रीयत इति। रीङ् अतः। वार्त्तिककारमतेऽप्यत्र प्रतिषेधो न भवति। कथं समानपदस्थस्येति वचनात् इ
डात्मनेपदावस्थापेक्षणीया तत्र लड्विधिमक्रान्तुस्नातार्यां लक्ष्येपि यदत्वे आत्मनेपदस्यासंनिधानादिट् प्रवर्तते प्रचिक्रंसिष्यत इत्यत्र
तु यदात्मस्थापनमात्मनेपदसंनिधानात्प्रतिषेधप्रवृत्तिः। आत्मनेपदविषयादिति। तद्योग्यादित्यर्थः। सत्यात्मनेपदे प्रतिषेध इत्युक्त
त्वादिह मा भूत्। अनुपसर्गात् क्रमेः क्रन्ता क्रमिता इत्युभयमपि भवति अनुपसर्गाद्वेति विकल्पेनात्मनेपदनिमित्तत्वादस्ति सेटो। अ
सत्यात्मनेपदविषयादिति अन्यत्र भावे विषयशब्दं वर्णयन्तः क्रमितेत्येव भवितव्यमित्याहुः। स्नोतेः सनि किति चेति। उपलक्षणमेतत्
क्रमेश्च निष्ठायां यस्य विभाषेति इट् सं प्रतिषेधो भवतीत्यत्र हेतुः प्रागेवोक्तः॥ ॥छ॥ छ॥ ॥छ॥ छ॥ ॥छ॥ ॥

घ

ग्रहो॥ ॥ग्रहेरुत्तरस्येटः इति। कथं पुनरिटो दीर्घत्वं लभ्यते इति निपातनात् षष्ठी प्रथमा निर्दिष्टा षष्ठीनिर्दिष्टेन चेहार्थः। एवं तर्हि षष्ठ्यन्तमपि क
ल्पयिष्यामि एवमपि दोषः प्रकृतमिटमनपेक्ष्य इट्सु समाने अविशेषाच्चिराव इटोऽपि दीर्घप्रसङ्गः। अस्तु तर्हि प्रथमान्तमेव तत्र दीर्घ इ
ड्भवतीति सामानाधिकरण्येनान्वये सामर्थ्यादागमविधिः संपद्यते। इड् दीर्घ इति चेद्विप्रतिषिद्धं यदीट् न दीर्घः अथ दीर्घो ने
ट्। इड् दीर्घश्चेति विप्रतिषिद्धं स्यादेतत्। दीर्घ इड्भवतीत्युक्ते सामर्थ्यादाद्यन्तविपरिणामेन ककारोपजातिराश्रीयते दीर्घग्रहणाच्च तदन्तग्र
हणं वेति सा विधीयत इति। एवमपि दोषः विवरण तत्र तत्र पुनरादिमात्रेण वृतो वेत्यनेन पक्षे दीर्घ इति प्रसक्तौ प्रतिग्रहणं श्रेयः सुमप
स्मिन्नपि प्रतिषिद्धे इट् पुनर्विधेति पक्षे इड् विधीयते। तत्र पुनरीये विधानाभावात् पक्षे दीर्घ इट् कार्योन प्राप्नोतीति। नैष दोषः। इट्सन्निवेश
स्मिन्नपि प्रतिषिद्धे इट् सन्निवेशः विवरणे विदेशस्थमिटं प्रतिषिध्य पुनर्विधानेन नस्य नमिध्यातिन्द्र ज्ञोः क्लि जरित्वा जरीत्वा
त्र दीर्घ इति वृत इति चानुवर्तिष्यते। यत्तर्हि विदेशस्थमिटं प्रतिषिध्य पुनर्विधानेन तस्य न सिध्यति

॥ ॥ग्रहोऽलिटि दीर्घः॥ ॥ग्रह उत्तरस्येटो लिटि दीर्घो भवति॥
ग्रहीता ग्रहीतुं ग्रहीतव्यम्। अलिटीति किं जगृहिव जगृहिम ॥ १९

अत्रोदाहरणत्वाद्वित्प्राप्तः वृतो वेत्यनेन च दीर्घ इट् ततो द्वयोरपि श्रुकः कितीति प्रतिषेधे पुनरिड्विधीयते न चेतत्र दीर्घग्रहणाप्यनुवृत्तिसंभवः।
ननु च श्र्युकः कितीत्यत्र नेडित्यधिकारात्कित्पक्षाश्रयणाच्च इट् एकमात्रस्य निषेधो न दीर्घस्येटः। ततः किं वृतो वेत्यनेन न विहितो दीर्घ इट् त
स्य वा प्राप्तः जृव्रश्च्योः क्त्वीत्यनेन चेट् प्रतिपद्यते इति जरित्वा जरीत्वेति रूपमपि सिद्धं भवति। स्यादेतत् यद्यपामन्तरमिड्विधीयते इह त्विट् दी
र्घ इति वचनादिड्दीर्घमस्यापि भवत्येव अन्यथा अग्रहीदित्यत्र इसन्तस्य नोतिह इट्प्रतिषेधः इट ईटीति सिज्लोपश्च अग्रहीद् अग्रहीषं विभाषेट्
इति मूर्द्धन्यविकल्पः जरीत्वेति न क्त्वा सेडिति कित्वप्रतिषेधः इसेले विधयो न सिध्येयुः तस्मादिड्दीर्घमस्यापि टो भवतीति सिंगी करणमन्तत इति
देशस्थं प्रतिषिध्य पुनर्विधाने स्थित एव दोषः स्यात्तस्माद्दीर्घ इडा शक्यो विधातुं। एवं तस्माद्विधानुकस्येति वार्त्तिके ग्रह उत्तरस्य ईधानुकस्य
दीर्घो भवति। इहापि तर्हि प्राप्नोति ग्रहणं ग्रहणीयं वलादेरिति वर्त्तते इहापि तर्हि न प्राप्नोति ग्रहीता ग्रहीतुं भत्न एवं गतिर्विज्ञास्यते इहापि तर्हि
प्राप्नोति ग्राहक इति अस्तु तर्हि इड् इत्येव न तु वोक्तं षष्ठीनिर्दिष्टेन चेहार्थ इति ग्रह इति पंचमी इड् इति प्रथमा षष्ठी प्रकल्पापिष्यतीति तस्मा

५८

प्रकृतस्येति। आर्द्धधातुकस्येडित्यनंतरस्याचि एव इटो न भवतीति। जरीत्वेत्यत्र तु आर्द्धधातुकस्येडित्ययमेव प्रतिषिद्धः प्रतिप्रसूयत इति भव
त्येवा इह जरीगृहितेति यङः तास्य चल्लोपयलोपयोः कृतयोर्द्विप्रयोगो द्विर्वचनमिति स्थाएवायं ग्रहिरिति दीर्घः प्राप्नोति एवं स्मादचि विधौ यः
स्थानिवद्भावः सोपि दीर्घविधौ प्रतिषिद्धः तस्माद्विहितविशेषणमिहाश्रयणीयं ग्रहेर्यो विहित तमार्द्धधातुकं तस्य यद् इट् तस्य दीर्घ इति॥

॥प्रकृतस्येटो दीर्घत्वमिदं चि एव इटो न भवति। ग्रहिता। ग्राहिष्यते॥ ॥वृतो वा॥ ॥वृ इति वृङ्‌ वृञोः
सामान्यग्रहणं तस्मादुत्तरस्य ऋकारान्तेभ्यश्च इटो वा दीर्घो भवति। वरिता वरीता। प्रावरिष्ट प्रावरीष्ट।
ऋकारान्तेभ्यः तरिता तरीता। आस्तरिता आस्तरीता। वृत इति किं करिष्यति हरिष्यति॥ ॥न लिङि॥
॥वृत उत्तरस्येलो इटो लिङि दीर्घो न भवति। वरिषीष्ट प्रावरिषीष्ट आस्तरिषीष्ट विशरिषीष्ट प्रतरिषीष्ट॥

॥वृतो वा॥ ॥अत्र यदि वृवरणे इत्येतस्य न सिला निर्देशः स्याद्ध्रस्वे वृनिर्दिष्टे तयथाप्नोपदीति। अथ तस्य ऋकारान्तानां च ग्रहणं एव
मपि तस्य पृथग्ग्रहणमनर्थकं ऋकारान्तत्वात् अथ तस्य ऋकारान्तानां च न तथा च समस्तत तश्च संयोगादेरित्यत्र ऋत इति न व कर्मेत्र स्ये
वा तु वृञः। अथ वृङ्‌ वृञोः ऋकारान्तानां च न तथापि वृग्रहणमनर्थकं ऋकारान्तत्वात् तस्माद् ऋकारोपदर्शितानामेव ग्रहणं। वृत इति
किमर्थमिति। उरिति सिद्धेति॥ ॥न लिङि॥ ॥विवरिषीष्टेति। कर्मण्यात्मनेपदं॥ ॥श्री॥ ॥श्री॥ ॥छ॥ ॥छ॥ ॥

॥इट्सनि वा॥ ॥अत्रातितीर्षतीति परस्मैपदपाठो युक्तः॥ ॥लिङ्॥ ॥आत्मनेपदेष्विति सिच एवेतद्विशेषणं न लिङः असंभवात्तस्य

॥इट् सनि वा॥ ॥वृतृ उन्तस्य सनौ वा इडागमो भवति। वुवूर्षते विवरिषते विवरीषते। आवुवूर्षति। आविवरिषति आविवरीषति। तितीर्षति तितरिषति तितरीषति। आतितीर्षति आतितरिषति आतितरीषति। सनि ग्रहगुहोश्चेति इट्प्रतिषेधे प्राप्ते पक्षे इडागमो विधीयते इट्श्च दीर्घो नो वेति पक्षे दीर्घः। चिकीर्षति जिहीर्षति। अत्रोपदेशाधिकारात् क्षणीकृत्वा च इडागमो न भवति॥ ॥लिङ्सिचोरात्मनेपदेषु॥ ॥वृतो लिङि सिचि चात्मनेपदे परे वा इडागमो भवति। वृषीष्ट वरिषीष्ट। प्रावृषीष्ट प्रावरिषीष्ट आस्तरिषीष्ट। सिचः खल्वपि। अवृत अवरिष्ट अवरीष्ट। प्रावृत प्रावरिष्ट प्रावरीष्ट। आस्तीर्ष्ट आस्तरिष्ट आस्तरीष्ट। आत्मनेपदेष्विति किं। प्रावारिष्टां प्रावारिषुः॥ ॥ऋतश्च संयोगादेः॥ ॥ऋकारान्ताद्धातोः संयोगादेरुत्तरयोर्लिङ्सिचोरात्मनेपदेषु वा इडागमो भवति। ध्वृषीष्ट ध्वरिषीष्ट स्मरिषीष्ट। सिचः खल्वपि। अध्वृषातां अध्वरिषातां अस्मृषातां। ऋत इति किं। च्योषीष्ट अच्योष्ट। संयोगादेरिति किं। कृषीष्ट अकृषत। आत्मनेपदेष्विति किं। अध्वार्षीत् अस्मार्षीत्। संस्कृषीष्ट समस्कृत इत्यत्रोपदेशाधिकारात् दुक्रमात्सुट इडागमो न भवति॥ ॥ २० ॥ ॥छ॥

॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥

वेनस्य परस्मैपदेपि प्रसंगः वलादेरित्यधिकारात्। प्रावृषीष्ट इत्यादावुश्चेति कित्वं॥ ॥ऋतश्च॥ ॥उदाहरणे लुभावकर्मणोरात्मनेपदं। संस्कृषीष्ट इति समः सुटि इत्यत्र संपुंकानां सो वक्तव्य इति वचनात्सत्वं॥ ॥ २० ॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥छ॥

॥स्वरति॥ ॥अत्र स्वरतेरनुदात्तत्वात्प्राप्त इट्सेषां तु प्राप्तेविभाषा वेति वर्त्तमाने इति ऊदन्तनिवेशतः। लिङ्सिचोर्निवृत्त्यर्थमिति। अन्यथा वा ग्रहणासंबन्धयोस्तयोरप्यनुवृत्तिः स्यात्। प्रवेशणादस्य स्यानिवृत्त्यर्थमिति। अन्यथा निरनुबंधकत्वात्तस्यैव ग्रहणं स्यात् एवं तर्हि स्तु इति कृतं एवमपि लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणमिति सूयतेरेव ग्रहणं स्यान्न सूतेः तस्याः परिभाषाया अस्तित्वे अयमेव विक रणनिर्देशो ज्ञापकः। धूञिति धूञ इत्यस्य निवृत्त्यर्थ इति। अन्यथा पूर्ववत्तस्यैव ग्रहणं स्यात् धुवितेति। कुटादित्वान्नि. त्वं। स्वरतेरिति। अस्य विकल्प स्यावकाशः स्वर्त्तासि ता। अद्धनोः स्य इत्यस्यावकाशः करिष्यति हरिष्यति स्वरतेः स्ये उभयप्रसंगे विप्रतिषेधः। किंतिन्नु स्यपरेति। ननु च

॥स्वरतिसूतिसूयतिधूञूदितो वा॥ ॥स्वरति सूति सूयति धूञ् इत्येतेभ्य ऊदितश्चोत्तरस्यार्द्धधातुकस्य वलादेर्वा इडागमो भवति स्वर्त्ता स्वरिता। सूता। प्रसोता प्रसविता। सूयति। सोता सविता। धूञ्। धोता धविता॥ ऊदितः खल्वपि गाढा गाहिता। गुपू। गोप्ता गोपिता गोपायिता॥ वेति वर्त्तमाने पुनर्वा ग्रहणं लिङ्सिचोर्निवृत्त्यर्थं। सूतिसूयत्योर्वि करणनिर्देशः षूप्रेरणा इत्यस्य निवृत्त्यर्थः। धूञिति सानुबंधकनिर्देशो धूविधूनन इत्यस्य निवृत्त्यर्थः। सविता धुवि ते स्यत्रेण्निसमेव तयोर्भवति। स्वरतेरेतस्माद्विकल्पाद्धनोः स्य इत्येतद्भवति विप्रतिषेधेन स्वरिष्यते। किंतिन्नु स्यपे श्रुकः किति नीति नित्यं प्रतिषेधो भवति पूर्वविप्रतिषेधेन। स्वृत्वा सूत्वा धूत्वा॥ ॥छ छ॥ ॥छ छ॥ ॥

यं विकल्पो यथा एकाज्लक्षणं प्रतिषेधं बाधते तज्जादीन् तथा किं लक्षणमपि प्रतिषेधं बाधेत। न बाध्यते। कथं। येन नाप्राप्ते तस्य बाधनं भवति तस्मादपवादस्तावदेकाज्लक्षणमेव प्रतिषेधं प्रत्यस्य भवति किंतु भयप्रसंगे पुरस्तात्प्रतिषेधकांडकारणात्प्रतिषेध एव भवति। लिङाच्च। यदयं स्वरणिभरन्नपि सनामिति विकल्पं शास्ति अन्यथा अनेनैव सन्यपि विकल्पस्य सिद्धत्वात्पुनस्तेन विदध्यात्। हन्नोऽनुवि प्रतिषेधशब्देनापि पुरस्तात्प्रतिषेधकांडकरणमेव विवक्षितं समानफलत्वात्॥ ॥छ॥ ॥छ॥ ॥छ छ॥ ॥ ॥

।रधादिभ्यः॥ ॥रधिर्नशिस्तृपिदृपीद्रुहिर्मुहिः ष्णुहिः ष्णिहः रधादयो मी पठिता दिवादिष्वष्टकृष्टिभिः । नंष्टेति । मस्जिनशोर्झलीति नुम् ।
न पिदृप्योरनुदात्तस्य चर्दुपधस्येति पक्षे ऽम आगमः । द्रोढा द्रोग्धा द्रुहस्नुहष्णुहष्णिहामिति धत्वढत्वे । क्रादिनियमादिति । ननु च प्रतिषे-
धस्यासौ नियमः न च रधादेः कस्यचित्तस्य प्राप्तः प्रकृतसाप्त्रपो वा प्रतिषेधः प्राप्नोति यो ऽप्यप्राप्नोति तृपिदृप्योः तयोरपि प्रतिषेधे ऽलि-
ङ्गेनेत्नमावर्त्तितेष्वप्ययं विकल्पः स्यादेव विकल्पस्य नियतत्वात् । एवं मन्यते यावान्कश्चिदिड्भावः प्रतिषेधनिबंधनो विकल्पनिबंधनो वा

॥रधादिभ्यश्च॥ ॥रधादिभ्यश्च॥ ॥रधइत्येवमादिभ्यश्चोत्तरस्य वलादेरार्द्धधातुकस्य वा इडागमो भवति । रद्धा रधि-
ता । नंष्टा नशिता । त्रप्ता तर्पिता । द्रप्ता दर्पिता । द्रोग्धा द्रोढा द्रोहिता । मोग्धा मोढा मोहिता । स्नोग्धा स्नोढा स्नोहिता । स्ने-
ग्धा स्नेढा स्नेहिता । क्रादिनियमाल्लिटि रधादिभ्यः परत्वाद्विकल्पं केचिदिच्छन्ति । अपरे पुनराहुः पूर्वविप्रतिषेधविषय-
न सामर्थ्याद्बलीयस्त्वं प्रतिषेधनियमस्येति नित्यमिटा भवितव्यं ररंधिमेत्येवं॥ ॥निरः कुषः॥ ॥निरित्येवंपूर्वात्कुषउ-
त्तरस्य वलादेरार्द्धधातुकस्य वा इडागमो भवति । निष्कोष्टा निष्कोषिता । निर इति किं कोषिता कोषितुं कोषितव्यं । निसइ-
ति वक्तव्ये निरइति निर्देशो न रेफान्तमुपसर्गान्तरमस्तीति विज्ञापयनेतस्य निलयनमिति उपसर्गस्यायतो वितिलत्वं भवति
।निसो हि रुत्वस्यासिद्धत्वाल्लत्वं न स्यात्॥ ॥२१॥ ॥६१॥

तस्य सर्वस्य क्रादिसूत्रेण नियम इति । एवं चोत्तरग्रंथे प्रतिषेधनियमस्येत्यभावनियमस्येत्येवार्थो द्रष्टव्यः । अपर इति । ननु चास्तु प्रतिषे-
धप्राबल्यं किमायातं नियमस्य । प्रतिषेधविषयत्वान्नियमस्य प्राबल्यमित्यदोषः । नित्यमिटा भवितव्यमिति । अपर आह प्रतिषेधाधि-
कारेण क्रादीनामेव लिटि इण् न भवतीति नियमो विज्ञायमाने ऽधात्वंतरेषु यावान्कश्चित्प्रतिषेधः स सर्वो मा भूत् विकल्पस्तु कस्मान्न स्या-
दिति॥ ॥निरः कुषः॥ ॥निष्कोष्टेति इदुदुपधस्य चाप्रत्ययस्येति षत्वं । निस इति वक्तव्य इति । प्रादिषु हि निसिति पठ्यते तत्र चा निस-
स्तपताविति निर्देश इति भावः । किमेतस्य ज्ञापने प्रयोजनमित्यत आह तस्येति । ननु च निस एव रुत्वे कृते लत्वं भविष्यतीति तत्राह निसो हीति

॥इण्निष्ठायां॥ ॥इडिति वर्तमाने पुनरिड्ग्रहणं किमित्यत आह इड्ग्रहणं नित्यार्थमिति। न चारम्भसामर्थ्यादेव नित्यमिड् भविष्यति विकल्पस्य पूर्वयोगे प्रवृत्तत्वादित्यत आह आरम्भो हीति। यदि तर्हि नित्यार्थमिड्ग्रहणं क्रियते तदुत्तरत्रापि नित्य एव विधिः स्यादित्यत आह अन्ये त्वेवेति॥ ॥तीषसह॥ ॥इषु इच्छायामित्यस्येति। तौदादिकस्य प्रेषितेति। एतदिति यद्रूपं तदिति पठन्तीति। धातुपाठे इच्छार्थमुदितं पठित्वा इहाप्युकारोपादानेन तत्

॥इण्निष्ठायां॥ ॥निरः कुषो निष्ठायामिडागमो भवति। निष्कुषितः निष्कुषितवान्। इड्ग्रहणं नित्यार्थं आरम्भो हि यस्य विभाषेत्यस्य बाधको मा भूत् विकल्प एव स्यात्। अन्ये तु वचनमिदमिडागमः। उत्तरत्र विकल्प एव॥ ॥तीषसहलुभरुषरिषः॥ ॥तकारादावार्द्धधातुके इषु सह लुभ रुष रिष इत्येतेभ्यो वा इडागमो भवति। एष्टा एषिता। इषु इच्छायामित्यस्यायं विकल्प इष्यते यस्तु इष गतौ दैवादिकः तस्य प्रेषिता प्रेषितुं प्रेषितव्यमिति नित्यं भवति। योऽपि इष आभीक्ष्ण्ये इति क्र्यादिः तस्याप्येवमेव। तदर्थमेव तीषसहेति सूत्रे केचिदु इतमिषिं पठन्ति। सोढा सहिता। लोब्धा लोभिता। रोष्टा रोषिता। रेष्टा रेषिता। तीति किम्। एषिष्यते॥ ॥सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनां॥ ॥इवन्तानां धातूनां ऋध भ्रस्ज दम्भु श्रि स्वृ यु ऊर्णु भर ज्ञपि सन् इत्येतेषां च सनि वा इडागमो भवति। इव। दिवु। दिदेविषति। दुद्यूषति। सिवु। सिसेविषति सुस्यूषति॥ ॥श्री॥ ॥

स्यैव ग्रहणं वर्णयन्तीत्यर्थः। इदमेव चोदितस्य प्रयोजनं क्र्यादिकाणामिड्विकल्पस्यानेनैव सूत्रेण सिद्धत्वात्। ये तु उदितं न पठन्ति तेषां सहिना साहचर्यादिच्छार्थस्य ग्रहणं मा भूत्। उभयोरप्युकारमात्रं विकरणादिति। यथा तु वार्त्तिकं तथा क्र्यादिकस्याप्यत्र ग्रहणमिष्यते यदाह। इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेध इति। तन्मतेनेत्र योऽपि निरनुबन्धकः॥ ॥सनीवन्त॥ ॥अन्तरेकाच इति श्रयते ग्रहणं तां च सनि ग्रहणेनेह ग्रहणमिति प्रतिषेधः प्राप्तः तत्रेषां तु नित्यमिट् प्राप्तस्तत्रेदमारभ्यते॥ ॥छ छ॥ ॥छ छ॥ ॥छ॥ ।

। अर्दिधिषतीति। लघूपधलक्षणेगुणे अज्ञादेर्द्वितीयस्येति धिस् इत्यस्य द्विर्वचने रेफस्य तु न न्द्राः संयोगादय इति प्रतिषेधः। ईर्त्सतीति। आप्ज्ञप्यृधामीदिति ऋकारस्य रपरः ईकारः। धकारो णाः सः ईत्स शब्दस्य द्विर्वचनं अत्र लोपोऽभ्यासस्येति अभ्यासलोपः। बिभर्क्षतीति। भ्रस्जो रोपधयो रमन्यतरस्यां। बिभ्रक्षतीति। व्रश्चादिना षत्वं षढोः कः सि। धिप्सतीति। दंभ इच्चेति इत्वमित्वं च। हलन्ताच्चेति कित्वे नलोपः पूर्ववदभ्यासलोपः। पिपविषतीति। श्रीः स्रुयणः इत्यपर इत्यभ्यासस्येत्वं। स्मिपूङ्रञ्ज्वशां सनीति। दीर्घो लोपं तथा च भर इत्यस्य प्रभवति। मिमिविषतीति। सो तिवणो रेवेति नियमात्

॥ अथ। अर्दिधिषति ईर्त्सति। भ्रस्ज। बिभ्रज्जिषति बिभ्रक्षति बिभर्क्षति। दंभु। दिदंभिषति धिप्सति धीप्सति। श्रि। उच्छि। अपिपिषति उच्छिश्रीषति। स्वृ। सिस्वरिषति सुस्वूर्षति। यु। यियविषति युयूषति। ऊर्णुञ्। प्रोर्णुनविषति प्रोर्णुनविषति प्रोर्णुनुविषति। भर। भृञ्। इत्येतस्य भो गादिकस्य ग्रहणं प्राणानि ईशानः। बिभरिषति बुभूर्षति। ज्ञपि। जिज्ञपयिषति ज्ञीप्सति। सन्। सिसनिषति सिषासति। केचिदत्र भर ज्ञपिसनि तनि पतिनि दरिद्राणामिति पठन्ति। तनि। तितनिषति तितंसति तितांसति। पिपतिषति पित्सति। दरिद्रा। दिदरिद्रिषति दिदरिद्रासति। सनीति किं दरिद्रिता। अष्टा॥ ॥ क्लिशः क्त्वानिष्ठयोः॥ ॥ क्लिशो धातोः क्त्वानिष्ठयोर्विभाषा इडागमो भवति। क्लिशित्वा क्लिष्ट्वा। क्लिशितवान्। क्लिष्टः क्लिष्टवान्। क्लिश उपतापे क्लिश विबाधने इत्यस्य क्त्वायां विकल्पः सिद्धः। निष्ठायां तु यस्य विभाषेति प्रतिषेधः प्राप्नोति। क्लिशु उपतापे इत्यस्य क्त्वायां निष्ठायां च नित्य इडागमः प्राप्नोति तदर्थं क्त्वाग्रहणं क्रियते॥ ॥ पूङश्च॥ ॥ पूङश्च धातोः क्त्वानिष्ठयोर्विभाषा इडागमो भवति। पवित्वा पूत्वा। सोमोऽति पवितः सोमोऽतिपूतः। पूतवान्। पवितवान्। श्र्युकः किति निप्रतिषेधे

सत्याभावः। पिपासतीति। षष्ठे नेमनि नियमात्सत्रषत्वं। केचिदत्रेति। यत्त्वेतत्त्र पठन्ति तेनेऽप्युपसंख्यानमारभन्ते। तितांसतीति। तनोतेर्विभाषेति पक्षे दीर्घत्वं। पित्सतीति। सनि मीमाघुरभलभशकपतपदामच इस्। स्कोः संयोगाद्योरिति सलोपः। पूर्ववदभ्यासलोपः। दिदरिद्रासतीति केदिदरिद्रिषतीति चेति रद्रपक्षे दरिद्रातेराकारलोप ४॥ ॥ क्लि प्रा ४॥ ॥ क्लिशित्वेति। मृड मृद गुध कुष क्लिश वद वस इत्यादिना कित्वं। विकल्पः सिद्ध इत्येति। उदितो वा इत्यादिसूत्रेण। क्लिश इत्यर्थे तर्हि क्त्वाग्रहणमित्यत आह क्लिशु उपतापे इत्यस्येति॥ ४२ ॥ ॥ ७॥ ॥ ७॥ ॥

।वसतिः॥ ।उषित्वेति। पूर्ववत् कित्वं यजादित्वात् संप्रसारणं शासिवसीत्यादिना षत्वं। वस्तेर्लितिः वस आच्छादने इत्यस्य पङ्क्तिः [illegible] इत्यर्थो विशेषानि-
र्देशो न भवति तत्र अपिवत्वा निष्ठयोः सामान्यलक्षणो न इड् भवत्येव वसित्वा वसितः वसितवान् वसित्वा गणान्तपठितात् संप्रसारणाभावः॥ ॥अञ्चेः॥
॥अञ्चित्वा अस्येति। मतिबुद्धीत्यादिना वर्त्तमाने क्तः। नाञ्चेः पूजायामिति उपधालोपप्रतिषेधः। क्तस्य च वर्त्तमाने इति कर्तरि षष्ठी॥ ॥लुभो॥ ॥लुभित्वा

वसतिक्षुधोरिट्॥ ॥वसतेः क्षुधेश्च क्त्वानिष्ठयोरिडागमो भवति। उषित्वा। उषितः। उषितवान्। क्षुधित्वा। क्षुधितः। क्षुधितवान्। वसतीति
विकरणनिर्देशः शार्थ एव वस्तेस्तु [illegible] वत्वादिड्भवति अमितिः। पुनर्ग्रहणं नित्यार्थं॥ ॥अञ्चेः पूजायां॥ ॥अञ्चेर्धातोः पूजायामर्थे क्त्वा-
निष्ठयोरिडागमो भवति। अञ्चित्वा जानु जुहोति। अञ्चिता अस्य गुरवः। उदितो वेति क्त्वाप्रत्यये विकल्पः प्राप्तः निष्ठायां यस्य विभाषेति प्रति-
षेधः। नित्यार्थं वचनं। पूजायामिति किं उदक्तमुदकं कूपात्॥ ॥लुभो विमोहने॥ ॥लुभो विमोहनेऽर्थे क्त्वानिष्ठयोरिडागमो भवति। लुभित्वा
लोभित्वा। विलुभिताः केशाः। विलुभितः सीमन्तः। विलुभितानि पदानि। विमोहनमाकुलीकरणं। तत्र क्त्वायां तीषसहलुभेति विकल्पः नि-
ष्ठायामपि यस्य विभाषेति प्रतिषेधः। विमोहन इति किं लुब्धो वृषलः लुब्ध्वा लुभित्वा लोभित्वा गार्ध्ये यथाप्राप्तमेव॥ ॥जॄव्रश्च्योः
क्त्वि॥ ॥जॄव्रश्चि इत्येतयोः क्त्वाप्रत्यये इडागमो भवति। जरित्वा जरीत्वा। व्रश्चित्वा। जॄ इत्येतस्य श्र्युकः किति प्रतिषेधः प्राप्तः व्रश्चेरूदित्वात् विकल्पः
।क्त्वाग्रहणं निष्ठार्थं॥ ॥उदितो वा॥ ॥उदितो धातोः क्त्वाप्रत्यये वा इडागमो भवति। शमु। शान्त्वा शमित्वा। तमु। तान्त्वा। तमित्वा। दमु।
दान्त्वा दमित्वा॥ क्रमु। क्रान्त्वा क्रमित्वा। भ्रमु। भ्रान्त्वा भ्रमित्वा। क्षमु। क्षान्त्वा क्षमित्वा॥ ॥सेऽसिचि कृतचृतच्छृदतृदनृतः॥ ॥आर्द्धधातु-
के सकारादावसिचि कृत चृत छृद तृद नृत इत्येतेभ्यो वा इडागमो भवति। कृत। कर्त्स्यति अकर्त्स्यत्। चिकृत्सति। कर्त्तिष्यति अकर्त्ति-
ष्यत् चिकर्त्तिषति। चृत। चर्त्स्यति। अचर्त्स्यत्। चिचृत्सति। चर्त्तिष्यति अचर्त्तिष्यत् चिचर्त्तिषति। छृद। छर्त्स्यति अछर्त्स्यत् चिछृत्स-
ति छर्दिष्यति अछर्दिष्यत् चिछर्दिषति। तृद। तर्त्स्यति अतर्त्स्यत् तितृत्सति। तर्दिष्यति अतर्दिष्यत् तितर्दिषति। नृत। नर्त्स्यति अन-
र्त्स्यत् निनृत्सति। नर्त्तिष्यति अनर्त्तिष्यत् निनर्त्तिषति। स इति किं नर्त्तिता। असिचीति किं अनर्त्तीत्॥

लोभित्वेति रलो व्युपधादित्यादिना किल्त्व विकल्पः॥ ॥सेऽसिचि॥ ॥स इति सकारोच्चारणार्थः॥ असिचीति प्रतिषेधात् तेन सेऽप्यपवि विकल्पो भ-
वति। कृती छेदने कुचादिः कृती छेदने रुधादिः द्वयोरपि ग्रहणं इट्त्वस्य प्रयोजनमुक्तं। चृती हिंसाग्रन्थनयोः उछृदिर् दीप्तिदेवनयोः उतृदिर् हिंसा-
नादरयोः नृती गात्रविक्षेपे इदित्वं पूर्ववत्॥ ॥

।गमेः॥ ॥संगंस्यत इति। समो गम्यृच्छिभ्यामात्मनेपदं। गमेरिडादेशस्येति। तेन सं जिगंसत इत्यत्र न भवतीति भावः। आत्मनेपदेन समानपदस्थस्येति। इह तु नि
गमिषिते वा चरति जिगमिषिता यत इति बहिरंगत्वादात्मनेपदस्य प्रतिषेधाभावः। एतच्चअस्त्राविंत्रीयत इत्यत्र वार्त्तिककारमतेनाभ्योत। अन्यत्र सर्वत्रैवेष्य
त इति। कथं पुनरिष्यमाणोऽपि लभ्यते योगविभागात्। गमेः सकारादाविड्भवतीत्येको योगः। ततः परस्मैपदेष्विति द्वितीयो नियमार्थः। तुल्यजातीयापेक्षत्वा
न्नियमस्यात्मनेपदविषये। निवर्त्तत इति केचित्। अन्ये मन्यन्ते। परस्मैपदेष्विति सप्तमीनिर्देशादानेरतर्थाश्रयणाद्यमर्थो भवति गमेरुत्तरस्य सका

गमेरिट् परस्मैपदेषु॥ ॥सेइत्यनुवर्त्तते। गमेरुत्तरस्य सकारादेरार्धधातुके परस्मैपदेषु इडागमो भवति। गमिष्यति। अगमिष्यत्। जिगमिष
ति। गमेरिति किं। चेष्यति। इड्ग्रहणं नियमार्थं। परस्मैपदेष्विति किं। संगंसीष्ट। संगंस्यते। समगंस्यत। संजिगंसते। अधिजिगांसते। गमेरिडादेश
स्याग्रहणं गमां सनीति दीर्घत्वं सत्येवागंता। आत्मनेपदेन समानपदस्थस्य गमेरिष्यते इडागमो नेष्यते। अन्यत्र सर्वत्रेष्यते। कृत्यपि हि भव
ति परस्मैपदलुकि च। संजिगमिषिता आकरणस्य। अधिजिगमिषिता आकरणस्य। जिगमिषत्वमिति। यद्येषकारस्य पुनरिदं दर्शनं
मुपलक्षणं परस्मैपदग्रहणं परस्मैपदेषु यो गमिरुपलक्षितस्तस्मात्सकारादेरार्धधातुकस्येड् भवतीति। तन्मतेन संजिगंसिता। अधि
जिगांसिता आकरणस्येति भवितव्यं॥ २३॥ ॥२३॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥
॥छ छ॥ ॥छ छ॥ ॥

गादेरार्धधातुकस्येति। लक्ष्यन्तरे वृत्यदी इड्भवति परस्मैपदेष्वेवेति। ततश्च संगंस्यत इत्यत्रैव व्यावृत्तिः स्यात्। संगंसीष्टेत्यत्र नापि संजिगंसत इत्यादौ शपा व्य
वधानात्। एकादेशे नास्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव। संजिगंसिष्यत इत्यादौ च नैव स्यात्। तस्मादि
ष्टिरेवेयं। अत एवेष्यत इत्युक्तं। यद्येषो नाम ग्रन्थविशेषः। तन्मते नेत्यादि। अनन्तरोक्तस्य दूषणं। न पुनरयं पक्षः स्थापितः वार्त्तिकविरोधात्।
पदाहमिड्गमेरात्मनेपदेन समानपदस्थस्येट्प्रतिषेधादिति॥ ॥२३॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥छ॥
॥श्री॥ ॥श्री॥ ॥श्री॥ ॥छ॥ ॥छ॥ ॥

॥नवृद्भ्यः॥ ॥बहुवचननिर्देशाच्चतुर्ग्रहणाच्चाद्यपर्यायाप्यते। वृतेर्दीर्घिः श्रविः स्यंदिश्चलारोमीवृत्तादयः। श्रवृधुशब्दकुत्सायामस्यपिसमि रूपः। उदाहर
रणेषुवृत्सः स्यमनोरितिपरस्मैपदं चतुर्भ्यइतिनवक्तव्यमिति। किंकारणमितस्तत्राह वृद्भ्यहणांहीति। यदिघुतादिपरिवृत्तिपरस्मैपदापेक्षत्वाच्चा
समासप्रर्थता। किमायातं वृतादिपरिसमाप्तेरित्यत्राह तदेवेति। अगृह्यमाणाविशेषत्वादितिभावः। अंतरंगमपीति। अंतरंगत्वं विकल्पस्यार्द्धधा

॥नवृद्भ्यश्चतुर्भ्यः॥ ॥वृतादिभ्यश्चतुर्भ्यस्परस्यसकारादेरार्द्धधातुकस्यपरस्मैपदेषुइडागमोनभवति। वृतु॥
वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। वृधु। वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। शृधु। शर्त्स्यति। अशर्त्स्यत्। शिशृत्सति। स्यंदू। स्यं
त्स्यति। अस्यंत्स्यत्। सिस्यंत्सति। चतुर्भ्यइतिनकर्त्तव्यं। वृत्करणंहितत्रद्युतादिपरिसमाप्त्यर्थं क्रियते। कृपूसामर्थ्ये
वृदितिनदेवयं। वृतादिसमाप्त्यर्थमपिविज्ञायेत नकिंचिदनिष्टमाप्नोति। ता क्रियते। स्यंदेरूदित्त्वलक्षणमंतरंगम
पिविकल्पंप्रतिषेधोपप्रथा वाधेतेति॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

तुकमात्रापेक्षत्वात्। अयंतुप्रतिषेधोबहिरंगः सकारादिविशेषापेक्षत्वात्। बहिर्भूतपरस्मैपदापेक्षत्वाच्च। ननुवान्येष्वपिवृतादिष्वार्द्धधातु
कलक्षणोपीडंतरंगएव। अथतस्यवचनसामर्थ्यात्प्रतिषेधः। तर्हिविकल्पस्यापिभविष्यति। नैतदस्ति। येननाप्राप्तेतस्यबाधनंभवतिनाप्राप्ते
श्चार्द्धधातुकस्येडित्यस्यतत्रदित्त्वलक्षणस्यायदिपंपणत्वादूदित्त्वलक्षणमपीडंप्रतिवेधोबाधेत। तदपिनअंतरंगबहिरंगयोर्विप्रतिषेधानुप
पत्तेः॥ ॥छ॥ ॥

कथं तर्हि सत्यपि चतुर्ग्रहणे तस्य प्रतिषेधः स्यात् अत आह चतुर्ग्रहणे हीति । सति च तस्मिन् चतुर्णां प्रतिषेधेन भाव्यमिति प्रतीतिः । इतरथा सर्वस्याशब्दाभा
गादेकस्य प्रतिषेधाभावेन कश्चिद्बाधः । पारस्मैपदेष्विति सेवेति । पद्यवं यत्र वृत्तादिभ्यः परस्मादीधातुकस्य परस्मैपदमनन्तरं तत्रैव स्यात् वर्त्स्यतीत्यादौ
विवृत्सतीत्यादौ न स्यात् तत्र स्यावधानात् । एकादेशेऽपि कृते स्यादिव्यवधानमेव विवृत्सिष्यति विवृत्सयतीत्यादौ प्रत्यक्षमेव व्यवधानं

चतुर्ग्रहणे हि सतितात्पर्येण स्यादिषु सन्निधापितो भवति । परस्मैपदेष्विति सेव वर्तिष्यति विवर्तिषते । अत्रात्मने
पदेन समानपदस्थादिडागम इष्यते अन्यत्र प्रतिषेधः । कृत्यपि हि परस्मैपदं लुङि च प्रतिषेधो भवति । विवृत्सिता
विवृत्सितुं विवृत्सितव्यं विवृत्सत्वमिति ॥ ॥ तासि च क्लृपः ॥ ॥ क्लृपउत्तरस्य तासेः सकारादेश्चार्द्धधातुकस्य प
रस्मैपदेषु इडागमो न भवति । कल्प्ता श्वः कल्प्स्यति अकल्प्स्यत् । चिक्लृप्सति । परस्मैपदेष्विति सेव कल्पिता
श्वः कल्पिषीष्ट कल्पिष्यते अकल्पिष्यत चिकल्पिषते । क्लृपेरप्यात्मनेपदेन समानपदस्थादिडागमो भव
ति अन्यत्र प्रतिषेधः । कृत्यपि हि परस्मैपदं लुङि च प्रतिषेधो भवति । चिक्लृप्सिता वि क्लृप्सितुं चिक्लृप्सितव्यं चि
क्लृप्सत्वमिति ॥ ॥ २४ ॥ ॥ श्रीः ॥ ॥

कृति परस्मैपदं लुङि च परस्मैपदगन्धोऽपि नास्तीति तत्रापि न स्यादेव तत्राह अत्रापीति । इष्टिरेवेयं । विवृत्सितेत्यत इत्यादौ चोक्त एव परिहारः
॥ तासि च ॥ ॥ उदाहरणेषु लुटि च क्लृपः इति परस्मैपदं । क्लृपेरपि स्यादिभ्य इत्यथा कल्प्स्यतीत्यादावेव स्यात् न तु चिक्लृप्सिता चिक्लृप्सत्वमिति सा
दावितिभावः । इह तु न वृद्भ्यः पंचभ्य इत्यतासि चेति कर्तव्यं क्लृपिग्रहणं तु शक्यमकर्तुं न च वृत्तादिभ्योऽपि तासौ प्रसंगः परस्मैपदाभावात् । आ
त्मनेपदेन समानपदस्थत्वाद्वा ॥ २४ ॥ ॥ छ छ ॥ ॥

॥अचः॥ ॥यस्य लिङ्कादिनियमादि प्रापः सन्निषिध्यते॥ पंचसूत्र्येतआप्यतास्वादिसेवड्डे वृत्तिः॥ उपदेशग्रहोप्यत्रव समारोपपकृष्यते· गुणो
निसेहर्नेप्येषत्र दंतेशमुपालक्ष्यं· क्रतिसमतिरिसपेक्षायांतासेः सन्निधानात्रैवेतिविज्ञायतेयद्वा एवंसूत्रान्तो सीतिवर्तते· यातेतिता सावति
ऌप्रदर्शनार्थमुपन्यस्तं· लू त्वेति· तास्वदिसनुवमानेयत्रध्वापिनिसानिटस्य लिप्रतिषेधः स्यात· लुनातिश्वापं श्रुकः कित्तीतिप्रतिषेधालि
तिनिसानिद्धः॥ यपिवयपिमेति· आतोलोपइटि च· अनिङ्गहणंनिसमिसनेन विशेषणार्थमिति· असस्यनिङ्गहणोनित्यमिसनेनप्रतिषेधए

॥अचस्तास्वस्सल्यनिरोनित्यं॥ ॥तासौपेनिसानिटोधातवोऽजंतास्तेभ्यस्तासाविवथलीडागमोनभवति· याताय
याथ चेताचिचेथ· नेतानिनेथ· होताजुहोथ· अचइतिकिंभेत्ताविभेदिथ· तास्वदितिकिं लूत्वालुलविथ· थलीति
किंयातायपिवयपिम· अनिङ्गहणोनित्यमिसनेनविशेषणार्थं· नित्यग्रहणंकिं विधोताविधवितावि दुधविथ॥ ॥

ववशेष्यतनिसमिएनभवतीति· यघथ्यत्रविकल्पोनप्रकृतस्तथापीदमेवनिसग्रहणंपूर्वस्यविधेरनित्यत्वंज्ञापयेत· सेएलिद्धस्यर्थेत्वनिङ्गह
णंनभवति· कथंतास्वदिसुगतेयथातासौनभवति एवंथल्यपीतिनचयस्तासौ सेटतस्यथलिप्रतिषेधोभवन तास्वत्कृतोभवति· विधोता
विधविनेति· स्वरत्यादिसूत्रेणतासाविट्किल्पितः क्रमेरपिवक्रमिथेतिभाव्यंनहितासौनिसानिट्क्रमिः आत्मनेपदेष्वेशमागसरसेपदे

सेड्डूत॥ ॥छ॥ ॥छ॥ ॥

तासौ विभाषेटस्थलि नित्यमिडागमो भवतीति· यावान्कश्चिदिड्भावः प्रतिषेधनिबंधनो विकल्पनिबंधनो वा स सर्वः क्रादिसूत्रेण नियम्यत इत्य
स्मिन्सूत्र इतिभावः। यद्यनुप्रतिषेधाधिकारो ऽक्रादीनामेवेडनभवतीति नियमात्प्रतिषेध एव स भवति निवर्तते स्वरत्यादिलक्षणस्तु विकल्पो भवत्ये
वेति पक्षस्तदा विदुधोथ विदुधविथेत्युभयं भवति। यद्येवं नित्यमनिट् इति न वक्तव्यं अन्यस्य तासौ विकल्पितेट् तस्याप्ययं प्रतिषेधः अतो भार
द्वाजस्येति नियमाद्विकल्प एवावस्थास्यते नैवं शक्यं स्वरतेर्हि दोषः स्यात्· भारद्वाजपक्षेपि तस्य प्रतिषेधात् सस्वर्थ इत्येव स्यात्· यदा तु विकल्पि
तेट्स्थलि प्रतिषेधोयं न भवति तदा ससस्वर्थ ससरिथेत्युभयं भवति· तास्वदिति वतिनिर्देश इति· तास्वदित्यस्य वत्यंतस्य निर्देश इत्यर्थः। तास्वदित्यनुच्य
माने प्रकृतस्य तासौ यस्तु उदात्तवत्येतावदेव लभ्येत तासौ नित्यमनिट् स्थलीडन भवतीति ततश्च पस्तासावसन् असत्वादेव नित्यानिट्त्वम्।

तासौ विभाषितेटः थलि नित्यमिडागमो भवति· तास्वदिति वतिनिर्देशात्तासौ सतः थलि प्रतिषेधार्थः यो हि तासावुपसन्न असत्वा
च्च नित्यमनिट् तस्य थलि प्रतिषेधो न भवति· जघसिथ उवसिथ· उत्तरसूत्रेपि तास्वदिति वर्त्तते· अदादेशश्च घासेर्वेञादेशश्च वयि
स्तासौ न सतः॥ ॥उपदेशेत्वतः॥ ॥उपदेशे यो धातुरकारवान् तासौ नित्यमनिट् तस्मात्तासाविव थलीडागमो न भवति· श
क्ताशकथ पक्तापपक्थ यष्टा इयष्ठ· उपदेश इति किं कृष्टा चकर्षिथ· अत्वत इति किं भेत्ता बिभेदिथ· तपरकरणं किं राद्धा रा
धिथ· तास्वदित्येव जिघत्सति जघसिथ· नित्यमनिट् इत्येव अंक्ता अंजिता आनंजिथ॥ ॥२५॥ ॥श्री॥ ॥श्री॥

विप्रसज्येत· तास्वदित्युच्यमाने तु वतेः सादृश्यार्थोवगात। यथाभूतस्य तासौ नेट् तथाभूतस्य थल्यपि· इडागमाप्रतिषेधदोषो नैव प्रसज्यते· इ
उस्तासौ सतो धातोर्निषेधे विहिते थलि· अभावः सदृशो न स्यात् थलि तास्य सतो भवन्· जघसिथेति· स्थानिवद्भावादिडसत्त्वं यतीनामपि स
वैषसिदुरस्तादुः। उत्तरसूत्रेपीति· एतेनोत्तरार्थं तास्वदित्युक्तमिति दर्शयति। अदादेशो हीति· ननु च यस्य स्थानी तासावस्ति धातौ तिदादे
श्यस्यापि स्थानिवद्भावात्सत्त्वं निर्दिष्टं· नैतदस्ति· स्थानिवद्भावः शास्त्रीयेषु प्रवर्तते न च तासौ सत्त्वं नाम शास्त्रीयं कार्यं॥ ॥उपदेशे॥ ॥अन
जंतार्थ आरंभः इयष्ठेति· लिघ्यासस्योभयोषामिति अभ्यासस्य संप्रसारणं व्रश्चादिषत्वं· चकर्षिथेति· कृष विलेखने भवत्ययं गुणो कृते सं
प्रसक्ताकारवान् न तूपदेशे· जग्रहिथेति· सन्निग्रहगुहोश्चेतीट्प्रतिषेधाद्विकल्पोयं सनि नित्यानिट् न तासौ· आनंजिथेति· अनत्यादेः तस्मान्नुड्वि
हलः स्वरत्यादिसूत्रेण तासौ विकल्पितेडयं॥ २५ ॥

।ऋतो॥ ॥सस्मर्थेति· स्मृ चिंतायां· दध्वर्थेति· ध्वृ हूर्छने· सिद्धे सत्यारंभादि· अदंतानां हृद्वृ जागृ दरिद्राणां तत्राऽपि हृञ् थलि न संभवति। आत्मने पदित्वात्· ऋजस्कृ ववर्थेति निपातनाद्भारद्वाजमते भार्गेन स्मार्त्तयोरिट्प्रतिषेधार्थं तावदेतत्रोपपद्यते अस्मेकारं तास्तासो नित्यानिट्स्त्वच स्वरित्सले नैव सिद्धः प्रतिषेधः ननु च परत्वात् कृते रपरत्वे वानंजंतत्वान्नसिध्यति पूर्वं सूत्रेणाप्यसिद्धिरेव न खल्वकारोपदेशोऽस्त्वं तत्त स्मान्नियमार्थमुपयतिः अस्तु न हिदध्वर्थेत्याद्योदिध्यर्थमेव यथेवंयायविप्रभृतिषु पूर्वयोगाभ्यांनित्यं थलिप्रतिषेधप्रसंगः जहर्थेत्यादौ भारद्वाज

॥ ॥ऋतोभारद्वाजस्य॥ ॥ऋकारांताद्धातोर्भारद्वाजस्याचार्यस्य मतेन तासाविव नित्या निट्स्थलिट्‌इडागमो न भवति· स्मृ सस्मर्थ· ध्वृ दध्वर्थ· कृ चकर्थ· सिद्धे सत्यारंभो नियमार्थः॥ ॥छ॥ ॥

से तिवचनाद्विकल्पप्रसंगः। एवं तर्हि च स्तास्वरित्पत्ते च भारद्वाजग्रहणं करिष्यते तेन देवानंतरयोगेऽप्यनुवर्तिष्यते इह तु निवर्तिष्यते सत्से अयं तु भारद्वाजः स्वस्ता मता अच्चा विशतो भवति तस्य मतम् ऋकारांताद् ऋत्त्रयपि थयेविथेतीडूवतिऋकारांते नेनित्वद्विकेतु मासेमतविप र्ययः कृतो भवति॥ एवं तर्ह्युपदेशग्रहणाद्याच स्मास्वादित्सत्रापकर्षाद्दुपदेशेऽजंतत्वान्नसिद्धः प्रतिषेध इति मन्यते॥ ॥छ॥ ॥छ॥ ॥

॥६ ३॥ ॥६ ३॥ ॥

अतएवभारद्वाजस्येति।विपरीतस्तुनियमोनभवति।अतोभारद्वाजस्यैवेतियदिष्यतेनियमाश्रयणमनर्थकंस्यात्।पूर्वोक्तेनप्रकारेणविध्यर्थत्वमे
वाश्रयणीयंस्यात्।पूर्वयोर्योगयोरिति।अकारान्तेघनन्तरस्ययोगस्याप्राप्तत्वादनन्तरस्यविधिर्वाभवतीतिन्यायस्यतावदसंभवः यस्त्वनिट्प्रसंगो
चस्तस्यइति।नस्यैवनियमोयुक्तस्तत्कथंपूर्वयोर्योगयोर्द्वयोरपिविकल्पः।एवंमन्यतेद्वयोरनन्तरमस्यारंभसामर्थ्यान्नित्यस्यमानिसंभवःअतएवभारद्वाज

॥अतएव·भारद्वाजस्यमास्मभूत्ययिथववियथयेचिथशेकिथ·तद्रूपमर्थात्पूर्वयोर्योगयोर्विकल्पः तपरकरणमृकारान्तनि
वृत्त्यर्थंतथाहिसंतिविध्यर्थमेतत्स्यात्॥ ॥बभूथाततन्थजगृभ्मववर्थेतिनिगमे॥ ॥बभूथआततन्थजगृभ्मववर्थइत्येतानि
निपात्यन्तेनिगमविषयेनिगमोवेदः त्वंहिहोताप्रथमोबभूथ·बभूविथेतिभाषायां।येनान्तरिक्षमुर्वाततन्थ·आतेनिथेतिभा
षायां·जगृभ्माते दक्षिणमिंद्रहस्तं·जगृहिमेतिभाषायां·विवर्थत्वंज्योतिषावववरिथेतिभाषायां·क्रादिसूत्रादेवास्यप्रतिषेधे
सिद्धेनियमार्थंववर्थनिगमएवनभाषायामिति॥ ॥विभाषासृजिदृशोः॥ ॥सृजिदृशिइत्येतयोस्थलिविभाषाइडागमोभ
वति·ससर्जिथससृष्ठ·दद्रष्ठदर्शिथ॥ ॥इडत्त्यर्तिव्ययतीनां॥ ॥अर्त्तिअर्त्तिव्ययतिइत्येतेषांथलिइडागमोभवति·आ
रिथआरिथसंविव्ययिथ·ओजोनभ्मोलिरीसाल्पप्रतिषेधः अत्तिव्ययत्योऽतोभारद्वाजस्येतिनियमाद्विकल्पः अर्त्ते
रपिनिसंप्रतिषेधः अत्रेडग्रहणंविस्पष्टार्थंविकल्पविधानेत्वर्त्तिव्ययतिग्रहणमनर्थकंप्रतिषेधविधानेचार्त्तिग्रहण
मितिनित्योयमिड्विधिरिड्ग्रहणमन्तरेणापिप्राप्तत्वात्॥ २६ ॥ ॥

स्यनात्मनेपाभित्येवंसामान्याकारेणनियमआश्रयणीयस्ति।तथाहिमतीति।अप्रतितपरकरणेऽर्णकारान्तानामप्यत्रग्रहणंस्यात्तेषांच
तासेसेकृत्वाटचस्तास्वदिटस्याप्यसंतोविभर्थमेवेदस्यान्नकृत्सग्रहणेननियमार्थंविधिनियमसंभवेविधेरेवन्याय्यत्वादित्यर्थः॥ ॥विभाषा
॥ ॥ससर्ष्ठदद्रष्ठेति।सृजिदृशोर्झल्यमकितिपूर्वकल्पत्वान्नं।२६॥ ॥अत्रइड्ग्रहणंविस्पष्टार्थमिति।अथविकल्पेप्राप्तेनित्यार्थंकस्मान्नभव
तितत्राह विकल्पविधानेहीति।एवमपिप्रतिषेधःप्रकृतस्तन्निवृत्त्यर्थमिड्ग्रहणंस्यादत आह प्रतिषेधविधानेचेति॥ २६ ॥ ॥

॥ ॥वस्वेकाच्॥ ॥वसिति लुप्तविभक्तिको निर्देशः वसोरित्यर्थः। कृतद्विर्वचनानामिति। कथं पुनरविशेषोक्तावेषविशेषो लभ्यते एकाज्ग्रहण-
सामर्थ्यात् न हि कश्चिदकृते द्विर्वचने नैकाजस्ति यत्निवृत्त्यर्थमेकाज्ग्रहणं स्यात् चिरिजिरि चकाशिवः काशिवः काशमेकाजग्रहणं बहुलं पाघर्थ-
मित्याशाभवितिअमिति वसो संभव ३ आर्गोतिस्त्र गुण वृद्ध्या रेकाजग्रहणेनानिर्दिष्टः ननु च जागर्तिश्च त्रिविवि जागम्योन्यतरस्यामिति सामोविकल्पि

॥वस्वेकाजाद्घसां॥ ॥कृतद्विर्वचनानामेकाचां धातूनामाकारान्तानां घसेश्च वसौ इडागमो भवति। आदिवान् आशिवान्। धा-
त्वभ्यासयोरेकादेशे कृते एकाच्त्वाभ्यासलोपयोः कृतयोः कृतद्विर्वचना एकाचो भवन्ति॥ आत्॥ पपिवान् तस्थिवान्। घसः ज-
क्षिवान्। सिद्धे सत्यारम्भो नियमार्थः एकाजाद्घसामेव वसाविडागमो भवति नान्येषामिति। बिभिद्वान् चिच्छिद्वान् बभूवा-
न्। क्रादिनियमात्प्रतिषेधाभावात्प्रसक्तः स नियम्यते॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥छ॥

तत्रात्वे देपि जागृवांसो अनुगामन्निति द्विर्वचनग्रहणेच्छंदसि वेति विकल्पमिति द्विर्वचनाभावश्च नैकमुदाहरणमेकाज्ग्रहणमेकाज्ग्रहणं प्रयोजय-
तिय येनावप्रयोजनं स्या जागर्तेर्निवृत्त्यर्थमपि ह्रि सा शृणाति प्रतिषेधप्रतिपत्तिः यदि वा माप सिद्धे पममर्थः तथाहि द्विर्वचनस्यावकाशः पपाच प-
रोवकाशः यत्र कृते द्विर्वचने एकाच् पेचिवान् आदिवान् बिभिद्वानित्यादौ नैतमयप्रसंगे निसत्ता द्विर्वचनं। क्रादिनियमात् आमश्रुती नेड-
पि कृतिर्दृत्ति प्रत्ययाश्च यस्य प्रतिषेधस्य सर्वत्र भावात् क्रादिनियमादेव सर्वत्र वसोरिट् प्राप्तिः॥ ॥छ छ॥ ॥छ॥ ॥छ॥

ग्रहणमनेकाज्र्थमिति। ननु द्विर्वचनेऽकारलोपे सति तिपोऽप्येकाच्त्वादेव सिद्धमत आह द्विर्वचने हीति। इण्निमित्तः आकारलोपो नास्ति तस्मिन्भवति ततश्चानेकाच्त्वमित्यर्थः। अथाप्यामन्क्रियतामिति। आतऔणल इत्यौकारविधानसामर्थ्यादौकारविधानेन ज्ञापितमेतत्। दरिद्रातेरजित्याम्प्रत्ययोऽपि तिते नायमभ्युपगमः दरिद्रामिति। नेड्वशि कृतीति प्रतिषेधः एवं तत्र भवति। अथ त्वसि ग्रहणं किमर्थं यावता द्विर्वचने कृते त्वमिमसो हलि चेत्युपधालोपे सति सेकाच्त्वादेव सिद्धमत आह घसेरपीति। परत्वादिति। निसत्वाच्चेत्यपि द्रष्टव्यं तस्य हल्यविचविधानात्। अनङ्कत्वादिति। एवं

ग्रहणमनेकाजर्थं द्विर्वचने हि कृते शरि सत्यातो लोपेन भवितव्यं दरिद्रातेस्तु काम्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्याभवि
तव्यं दरिद्रांचकार। अथाप्याम्क्रियते तथापि दरिद्रातेरार्धधातुके लोपः सिद्धश्च प्रत्ययविधाविति प्रागेव प्रत्ययोत्पत्तेराकारलो
पे कृते नामस्यानिमित्तमिति दरिद्राविति भवितव्यं घसेरपि घस्ग्रहणमिह न क्रियते तदा द्विर्वचनात्परत्वाद् घसिभसोर्हलि च सुप
धालोपेन भवितव्यं तत्र कृते द्विर्वचनमेव न स्यात् अनङ्कत्वात् इह तु घसि ग्रहणादुपधालोपमपि परत्वादिडागमो बाधते तत्र
क्रियमाणे गमहनजनखनघसां लोपः क्ङित्यनङीति सच द्विर्वचनेऽचीति द्विर्वचने कर्तव्ये स्थानिवद्भावतीति न जक्षिवानित्यपि
सिध्यति॥ ॥विभाषा गमहनविदविशां॥ ॥गमहनविदविशस्थते तेषां धातूनां वसो वा इडागमो भवति। गमा तेषां वा
जगन्वान्। मोनो धातोः म्वोश्चेति मकारस्य नकारः। हन। जघ्निवान् ७ जघन्वान्। विद। विविदिवान् विविद्वान्। विश। वि
विशिवान् विविश्वान्॥ विशिनातोदादिकेन साहचर्यादिह विदेस्तौदादिकस्य लाभार्थस्य ग्रहणं ज्ञानार्थस्य तु नित्यं विविद्वानि
त्येवं भवति। दृशेश्चेति च वक्तव्यं। ददृशिवान् ददृश्वान् ७ ॥४॥ ॥
निवृत्ते पिनास्ति हल्निमित्तत्वादुपधालोपस्य। क्रियमाणे तु घसिग्रहणे नायं दोष इत्याह क्रियमाणे त्विति॥ ॥विभाषा॥ ॥जघ्निवा
न् जघन्वानिति। हो हन्तेर्ञ्णिन्नेषु अभ्यासाच्चेति कुत्वं। विशिना तौदादिकेनेति। पथ्यागदादिके न हन्तिना साहचर्यमस्ति तथापि शस्परविश
तिः बाधादिशिसाहचर्यमेव भवत्याद्यमिति भावः। ज्ञानार्थस्येति। सत्ताविचारणार्थयोस्त्वात्मनेपदित्वात्क्वसावसम्भव एवेति भावः। विद्व
निति। पूर्ववदिट्प्रतिषेधः॥ ७॥ ॥ ॥ ॥ ॥४ ७ ॥ ॥

॥सनि॥ ॥सनिनिमित्ते तस्य छान्दसत्वादानुपूर्व्यं च विवक्षितत्वाच्छन्दस्येवैतन्निपातनं॥ ॥ऋद्धनोः॥ ॥स्वरत्यादिसूत्रेयदुक्तं स्वरतेरनस्मा
द्विकल्पादिट्प्रादिनदेव स्मारयति स्वरतेर्वेड्वादिति। या विकल्पितरञ्जस्य सवेट्तस्य भावो वेड्वं स पुनर्विकल्पितेयसंबंधः॥ ॥यम॥ ॥स्वरंसादि
ति। व्याङ्परिभ्यो रमस्तिपरस्मैपदं। युक्तमत्र द्विवचनबहुवचनयोरुदाहरणोनत्रहि सगिरोः सतो रस्ति विशेषः एकवचने त्वयुक्तं विशेषाभावा
त्। तत्राह यमादीनामिति। स्यंतस्य रोऽस्त्यत्र नेटीति वर्त्तते॥ अपासीदित्येतत्तु प्रकृतमाभेदाहृत्तेनत्वत्र विशेषोस्ति। ननु वात्रापिस्वरे विशेषोस्ति

॥सनिंससनिवांसं॥ ॥सनिं पूर्वस्य सनोतेः सनिं ससनिवांसमिति निपात्यते। अग्ने त्वाग्निः सनिं ससनिवांसं इडागमएत्वाभ्यासलोपाभावश्च नियाजनात्। एषं वा तु पूर्वविच्छिंदस्येव नियतेति छांदस्येव निपातनं विज्ञायते भाषायां सेनिवांसमिति भवति॥ ॥ऋद्धनोः स्ये॥ ॥ऋकारान्तानां हन्तेश्च स्ये परत इडागमो भवति। करिष्यति। हन्तेः। हनिष्यति। स्वरतेर्विकल्पितेड्वाद्ध्नोः स्य इत्येतद्भवति विप्रतिषेधे न स्वरिष्यति॥ ॥अंजेः सिचि॥ ॥अंजेः सिचि इडागमो भवति। आंजीत् आंजिष्टां आंजिषुः। सिचीति किं। अंक्ता अंजिता। ऊदित्वाद्विभाषा भवति॥ ॥स्तुसुधूञ्भ्यः परस्मैपदेषु॥ ॥स्तु सु धूञ् इत्येतेषां सिचि परस्मैपदेष्विडागमो भवति। स्तु। अस्तावीत्॥ ॥सु। असावीत्। धूञ्। अधावीत्। परस्मैपदेष्विति किं। अस्तोष्ट असोष्ट अधोष्ट अधविष्ट॥ ॥यमरमनमातां सक्च॥ ॥यम रम नम इत्येतेषामाकारान्तानां च सगागमो भवति परस्मैपदपरे सिचि इडागमश्च भवति। यम। अयंसीत् अयंसिष्टां अयंसिषुः। रम। व्यरंसीत् व्यरंसिष्टां व्यरंसिषुः। नम। अनंसीत् अनंसिष्टां अनंसिषुः। आकारान्तानां। अयासीत् अयासिष्टां अयासिषुः। यमादीनां हलन्तलक्षणा वृद्धिर्भाषामाभ्यासानेटीति प्रतिषिध्यते। परस्मैपदेष्वित्येव आयंस्त।

माहि पासीदिति। घस्य घुदात्तपदं स्यात् सनितु तस्य सिज्जकत्वाच्चित्स्वरेणोदात्तत्वे एकादेश उदात्तेनोदात्त इत्युदात्तं पदं भवति। तत्रादिः सि
चोन्यतरस्यामिति पक्षे आद्युदात्तत्वं पक्षे अंतोदात्तत्वं। नैषोस्ति विशेषः अनिटः सिचः पक्षेप्युपदंत्योनमिति वचनान्माहिकार्षीमिस्यत्र यथाय
क्षे आद्युदात्तत्वं पक्षे तोदात्तत्वं च भवति एवमत्रापि भविष्यति। आयंस्तेति। समुदाङ्भ्यो यमोग्रंथ इत्यात्मनेपदं। अनं स्येत्यत्र कर्मकर्त्तरि। न दुहस्नु
नमां यक्चिणाविति चिणः प्रतिषेधः॥ ॥

।स्मिपूङ्॥ ॥ऋ इति धातोर्ग्रहणं न ऋकारान्तानां उत्तरत्र किरादीनामिड्विधानात्। पिपरिषतीति। ओः पुयण्ज्यपरे इत्यभ्यासस्येत्वं। अंजिजिष
तीति। अजादेर्द्वितीयस्येति जिशब्दस्य द्विर्वचनं नकारस्तु नन्द्राः इति प्रतिषेधात्॥ ॥किरश्च॥ ॥किर इति प्रत्ययेनैकवचनं पंचभ्य इति
बहुवचनात्तद्गणस्थावगतिः। कृ गृ दृङ् धृङ् प्रच्छ इत्येतेभ्यः दादिषु किरादयः। पिपृच्छिषतीति। रुदविदेत्यादिना सनः कित्त्वं यदि ज्यादि सूत्रेण संप्रसा

॥स्मिपूङ्रञ्ज्वशां सनि॥ ॥स्मिङ् पूङ् ऋ अंजू अशू इत्येतेषां धातूनां सनि इडागमो भवति। स्मि। सिस्मयिषते। पूङ्। पिपविषते॥ ऋ।
अरिरिषति। अंजू। अंजिजिषति। अशू। अशिशिषते। पूङो ऊकारग्रहणं पूञो मा भूत्। पुपूषतीत्येव तस्य भवति।
अशेरुदितो ग्रहणमश्नोतेर्नित्यमिडागमो ह्येव॥ ॥किरश्च पंचभ्यः॥ ॥किरादिभ्यः पंचभ्यः सनि परत इडागमो भवति। कृ। चिक
रिषति। गृ। जिगरिषति। दृङ्। दिदरिषते। धृङ्। दिधरिषते। प्रच्छ। पिपृच्छिषति। पंचभ्य इति किं। सिसृक्षति। किरतिगिरत्योरिट्स
निवेति विकल्पः प्राप्तः दृतो वेति चाप्यरोर्दीर्घत्वेनेच्छन्ति॥ ॥रुदादिभ्यः सार्वधातुके॥ ॥रुदादिभ्यः पंचभ्य उत्तरस्य वलादेः सा
र्वधातुकस्येडागमो भवति। रुदिर्। रोदिति। स्वप। स्वपिति। श्वस। श्वसिति। अन। प्राणिति। जक्ष। जक्षिति। पंचभ्य इत्येव। जा
गर्ति। सार्वधातुक इति किं। स्वप्ता। वलादेरित्येव रुदंति॥ ॥ईशः से॥ ॥ईश उत्तरस्य से इत्येतस्य सार्वधातुकस्येडागमो भवति।
ईशिषे। ईशिष्व॥ ॥२८॥ ॥६४ ७१॥ ॥

णो. किरतिगिरत्योरिति. शेषाणां त्वनुदात्तत्वात्प्रतिषेधः। दीर्घत्वमनेच्छन्तीति. इष्टिरेवेयं। ॥रुदादिभ्यः॥ ॥रुदिस्वपश्वसनिजक्षिणादादिषु रु
दादयः। अत्रैभे निर्देशो यं चमीभिर्देशो वलीयानिति रुदादिभ्य इति पंचम्या। सार्वधातुक इति सप्तम्याः षष्ठी प्रकल्प्यते सप्तमीनिर्देशस्तूत्तरत्रो
पयोगं यास्यति. प्राणितीति. अनितेरिति णत्वं. स्वपेति. अन्ये भाल्कपरस्मार्द्धातुकस्येडभवितव्यं॥ ॥ईशः से॥ ॥ईशः पंचम्येका दादिकः
सेइत्यविभक्तिको निर्देशः ईशिष्वेति. सवाध्वयोर्वा मोः. एकदेशविकृतस्यानन्यत्वात्सेशब्द एतयोः॥ २८॥

७का·प८२
६१

।।ईडजनोर्ध्वे च।। ।।ईडस्तु तोऽप्राप्ते सार्वधातुके सेट्त्वादाशिषि लुङि इति· भाषायां तु जायस इत्यत्र निरनुबन्धकत्वात् श्यनि कृतेऽनेन सर्वधातुकादि इट्भावः जन
जननइत्यस्यापीति· नन्वसेण इसे परतीत्यत्राह· तस्य कर्मव्यतिहार इति· यदि तर्हि तस्माद् इत्यात्मनेपदं संभवति तस्येव ग्रहणं प्राप्नोति नानुबंध
कत्वात् ईडिना साहचर्यादात्मनेपदिनो पि ग्रहणं भविष्यति· तदर्थं केचिद् इति पठन्त्येवं न पठंतीति चकारेणानुकृष्टमेव पूर्वसूत्रमनुवर्त्तयंति।स
काराद्वेरिति स इति सप्तम्या लुकार्थे इत्‌शास्त्रादिविधिः।यदि तर्हि ईशीरपि ध्वे शब्दे इडागमो भवति योगविभागो न कर्त्तव्यः ईशीडजनां से ध्व

।।ईशजनोर्ध्वे च।। ।।ईडजन इत्येताभ्यामुत्तरस्य ध्वे इत्येतस्य सार्वधातुकस्य से इत्येतस्य च इडागमो भवति। ईडिध्वे ईडिध्वं।
ईडिषे। ईडिष्व। जनिध्वे। जनिध्वं। जनिषे। जनिष्व। जनी प्रादुर्भावे इत्यस्य छांदसत्वात् श्यनो लुक्। उपधालोपाभावश्छांद
न जनन इत्यस्यापि श्लु विकरणस्य ग्रहणमिष्यते तस्य कर्मव्यतिहारे व्यतिजज्ञिध्वे व्यतिजज्ञिषे इति भवति। ध्वे शब्दे ई
शेरपि इडागमइष्यते। ईशिध्वे ईशिध्वमिति तदर्थं केचिद् ईडजनोः स्वे चेति सूत्रं पठंति। सकारादेर्ध्वेशब्दस्य सूत्र उपाद
नो ध्वशब्द ईशेरनुकर्षणार्थो विधीयते। ईशीडजनां से ध्वयोरिति चैकमेव सूत्रं न पठितं तं विचित्रा हि सूत्रस्य कृतिः पाणि
नेरिति। ध्वे इति कृतटेरेत्व ग्रहणाल्लङि· ध्वमि न भवति व्यमिडा लोट्पुनरेकदेशविकृतमनन्यवद्भवतीति भवितव्यं।।
।।लिङः सलोपोनंत्यस्य।। ।।सार्वधातुके यो लिङ् तस्यानंत्यस्य सकारस्य लोपो भवति। कः पुनरनंत्यो लिङः सका
रः योधायुट्सीयुट्सुटां। कुर्यात्। कुर्युः। कुर्वीत कुर्वीयातां कुर्वीरन्।।
योरिति चक्रमं एवं हि पृथग्विभक्तिर्नोच्चारयितव्या भवति चकारश्च न कर्त्तव्यो· तत्राह· ईशीडजनां से ध्वयोरिति चेति। लङि ध्वमित्यस्य
न भवतीति· लोट्यपि तर्हि ध्वमित्यस्य न प्राप्नोति तत्राह लोट्पुनरिति·।। ।।लिङः।। ।।सार्वधातुके यो लिङिति नैवायं सप्तमी सार्वधा
तुकपरस्य लिङो संभवात् तस्माद्विधार्यो सप्तमी ज्ञाता वै केवच नं सार्वधातुकेषु मध्ये यो लिङ् सार्वधातुकसंज्ञस्तस्येत्यर्थः।। ।। ।।

एाम०
६१

।कुर्यादिति। अत उत्सार्वधातुक उत्वं ये चेत्युकारलोपः अत्र यासुट्सुटोः सकारस्य लोपः कुर्युरिति सेर्जुस् यासुट् सकारलोपः उस्यपदान्तादिति पर
रूपत्वं कुर्वीतेति सीयुट्सुटोः सलोपः कुर्वीरन्निति झस्य रन् अत्र सीयुट् एव सलोपः॥ ॥अतोयेयः॥ ॥सार्वधातुक इति प्रकृतमर्थात् षष्ठ्यन्तेन संबध्य
ते तदाह अकारान्तादंगात् उत्तरस्य सार्वधातुकस्येति अत्र पदत्रयं संबध्यते या षष्ठी सार्वधातुकस्यावयवस्य या शब्दस्येत्यर्थः इय् इत्ययमिति सूत्रे लक्षा
र पुञ्चारणार्थः पचेदिति इयादेशे कृते शवकारेण सह गुणः वलादिषु वलि लोपः यकारस्य च अत्र णयं चेयमित्याद्रौ पचेयुरित्यत्रेत्यादि प

॥अतं स्यैवेति किं। कुर्युः कुर्याः। सार्वधातुक इत्येव। क्रियात् क्रियास्तां क्रियासुः। कृषीष्ट कृषीयास्तां कृषीरन्॥ ॥अतो येयः॥ ॥अ
कारान्तादंगादुत्तरस्य लिङः सार्वधातुकस्य या इत्येतस्य इय् इत्ययमादेशो भवति पचेत् पचेतां पचेयुरित्यत्रोस्यपदान्तादिति प
ररूपं भवितं। अत इति किं चिनुयात् तपरकरणं किं याज्ञात् सार्वधातुक इत्येव चिकीर्ष्यात् चिकीर्ष्यास्तां चिकीर्ष्यासुः। ननु
चातो लोपेनात्र भवितव्यं पचेदित्यत्रापि तर्हि अतो दीर्घो यञीति दीर्घत्वे न भवितव्यं तदनेनानारभ्यमाणे विध्यंतरं बाधितमस्य
वदीर्घत्वस्येवातो लोपस्यापि दीर्घ इयि बाधकः स्यात् स्यादेतदेवं यदि दीर्घः सार्वधातुके विधीयते अथ तु तिङि विधीयते तदा येन
नाप्राप्तिन्यायेन दीर्घस्यैव बाधकः स्यात् न पुनरतो लोपस्य ये यस्येति विभक्तिकोनिर्देशः परतीति वा षष्ठी निर्देशात् लोपस्यात्रा
सिद्धत्वमनाश्रित्यादुरादः सौत्रोऽयं निर्देश इति केचिदत्रातो यासिप इति सूत्रं पठन्ति तेषां सकारान्तस्य स्थानिनाथ रूपसमासः
॥ ७९ ॥ ॥श्री॥ ॥छ॥ ॥
स्त्वपस्यावकाशः चिनुयुः सुनुयुः इयादेशस्य तु पचेदित्यादि पचेयुरित्यत्रोभयप्रसंगे परत्वादियादेशः पदिपूर्वयोरुपंस्यात् याशब्दाभावादिया दे
शो न स्यात्। एवमतो लोपस्यापि बाधकः स्यादिति एतच्च मध्येयकारादिति न्यायमनाश्रित्योक्तं तदाश्रयणे तु तो लोपस्यैव बाधकः स्यात् दीर्घ
स्य परत्वात् स्यादेव स्यादेतदेवमिस्यादि दीर्घविधौ तु हलः शाप्यमः सार्वधातुक इति प्रकृतं भूसुवोस्तिङीति च येय इत्यत्र विभक्तिकोनिर्देश इति
येप इत्यस्य सिद्धत्वादायेयाः इत्यविभक्तिकोनिर्देश इत्यर्थः परतीति चेति याशब्दात्र षष्ठी अतो धातोरित्याकारलोपः केचित्तु अतो यासिपः इति सकारा
न्तानुकारणं पठन्ति॥ ७९॥ ॥छ॥ ॥

त्स्यातोङितः॥ ॥आकारमात्रस्य ङितः तोसंभवात् आतो ङितः तद्गति अधिकरणेन षष्ठी ङितः तो वयवस्यात् इत्यर्थः। उदाहरणेषु सतिं ता आत्मनेपदं गांकुटादि सूत्रे
यत्र यत्र शब्दप्रयोगात् आङ्गिष्यमाणोपतिः सप्तमीसमर्थाद् आह ङ्मः ङि तीव डि दूदिति अन्यथा कुटादिवत् ममित्र सन्नो ङितः आत्मनेपदप्रसंगादि सुतर्कं
सार्वधातुकमपिदिति अपित्तद्वानुवर्त्तते नतु पूर्वस्य कार्यप्रसंगे सार्वधातुकस्य ङितः त्वं नस्व कार्यप्रतीतिसमुच्चानुदाहरणानि लङ् लिङ् लोट् एषु प्रसमुदाह
र्तुं अपचेतामकक्षिपतामिति अस्ति अत्राप्यस्य अनिवद्भावे नहि त्वमत आह सार्वधातुकमपिदिति त्रेताङि मिमाते मिमाथे इति अतति परकालो
भावस्य योगात् दतिलोपात्स्यत्वात् स्यमेव विधिः स्यात्॥ ॥आने मुक्॥ ॥अत्र आन इति सप्तम्यन्त वरितार्था पूर्वत्र कृतार्थाया आत इति पंचम्याः षष्ठी
प्रकल्पयति तस्मिन्निति निर्दिष्टे पूर्वस्येति तत्र विशेषणविशेष्यभावे कामचारादतोलादिशेष्यतेनत्वतांगमित्यभित्वभिप्रायेणाह अकारमात्रभक्तोय

॥आतो ङितः॥ ॥आकारस्य ङित् इयवस्य कारान्तादङ्गादुत्तरस्य इयद् इय् आदेशो भवति पचेते यजेते पचेथे यजेथे पचेताय
जेतां पचेथां यजेथां सार्वधातुकमपिदिति ङित्त्वे ङिति वडि दूदिति नांगी क्रियते अपितु ङितः तद् वडि दूदिति पूर्वसूत्र एव तत्र कुटि
षतीति प्रसिद्धपेतथांगीकरणं आत इति किं पचेते यजंते ङितः तद् इति किं पचापहै यजावहै अतइत्येव विन्वाते सुन्वाते तथाक
रणं किं मिमाते मिमाथे॥ आने मुक्॥ ॥आने परतो गस्यातामुगागमो भवति पचमानः यजमानः अकारमात्रभक्तोयं मु
क् अनुपदेशग्रहणेन गृह्यतइति अउपदेशादिति लसार्वधातुकानुदात्तत्वं भवति॥ ॥श्री॥ ॥श्री॥ ॥७॥

मिति अंगस्यावयवायो कारस्तस्य मुगित्यर्थः। किमेवं सति भवतीत्यत्राह अनुपदेशग्रहणेनेति। उपदेशेऽत अनुपदेशः यदिलकारान्तोंगभक्तः
स्यात् तदा तद् हेवांगं न स्वरद्ध्यात् तद्वयवं लकारं स्वरद्धात्मेकवेति स्वरोनस्यात् नध स्वरविधौ व्यंजनमविद्यमानवत् किं कारणं हलः स्वरमात्रे व्यंजन
मविद्यमानवदिति परिभाषया भाष्यकारेण निक्षिप्तत्वात् अन्यथा श्रिचित्वानिसादेः स्वनुद्भ्रामतुविति स्वरप्रसंगात् यदिस्तु तरयमभक्तोमका
रो विकरणावयवः क्रियेत अभक्ते मुक्ति स्वरो नस्यादिसेवा पदिस्तु तरयंपरादिः क्रियेत आनस्य मुङितिपरादित्वे दीर्घत्वप्रसंगः अतो दीर्घोयञीति
दीर्घत्वं प्राप्नोति। पाक्षिक एव दोषः कृतास्मिन् पक्षे यदि सार्वधातुरस्येवं तत् अपतिङ्सेवं तत्र स्वरदानदोषः तदयं भक्तस्तत्रापि पूर्वातः तत्राप्य
कारस्य मुगिति स्थितं॥ ॥७ ७॥ ॥७ ७॥ ॥७ ७॥ ॥७ ७॥ ॥७ ७॥ ॥७॥ ॥

यद्येवमिति। यद्यकारान्तात्रभक्तत्वान्न द्रूहलो नरस्यात तत्रस्थ्यर्थः। अध्यर्द्धमात्र इति। अर्द्धमधिकं यस्याः सा अध्यर्द्धा अध्यर्धमात्रा यस्य स अध्यर्धमात्रः। लसार्वधातुकानुदात्तत्वमपि तर्हि न प्राप्नोतीति। तद्धि भावपि तपरनिर्देशात् तथा चेति। एतद्धि मात्रत्वेपि भवति तदाकाशंका अध्यर्द्धमात्रत्व इति भा वः॥ ॥इदितम्॥ ॥आ सर इति पंचम्यवरितार्था पूर्वत्र कृतार्था याः आन इति सप्तम्याः षष्ठीं प्रकल्पयति॥ ॥अष्टनः॥ ॥सौत्रत्वान्निर्देशस्याः लोपो न कृतः। भक्तिनिर्देशोपमिति यथा श्रुतनिरनुनासिका कारभक्तिनिर्दिश्यत इत्यर्थः। जातिनिर्देशात्तु दुष्परत्यर्थः। आकृतिनिर्देशो वेति।

यद्येवमानोदित इत्ययमपि विधिः प्राप्नोति तपरनिर्देशान्न भविष्यति। मु किमत्स्यं अर्धमात्रो भवति। लसार्वधातुकानुदात्तत्वमपि तर्हि न प्राप्नोति। नैष दोषः उपदेशग्रहणं क्रियते तेनोपदेश ऊर्ध्वं सत्यपि कालभेदे भवितमंतथा पञ्चावः पचाम इत्यत्रापि भवति॥ ॥ ईदितः॥ ॥आ सउत्तरस्य कृता न इत्येतस्य ईकार आदेशो भवति। आसीनो यजते॥ ॥अष्टन आ विभक्तौ॥ ॥अष्टन्नित्येतस्य विभक्तौ परत आकार आदेशो भवति। अष्टाभिः अष्टाभ्यः अष्टानां अष्टासु विभक्ताविति किं अष्टत्वं अष्टता। आ इति भक्तिनिर्देशोयमाकृति निर्देशो तु नकारस्थाने अनुनासिक आकारः स्यात्। विकल्पेनायमाकारो भवति इत्येतज्ज्ञापितं अष्टनो दीर्घादिति दीर्घग्रहणात् अष्टाभ्य औशिति च कृतात्व निर्देशात् तेन अष्टभिः अष्टभ्यः अष्टानां अष्टसु इत्येतदपि भवति॥ तदंतविधिश्चात्रेष्यते प्रियाष्टौ प्रियाष्टानः प्रियाष्टौ इति यथा स्यात्॥ ३०॥ ॥श्री॥ ॥४॥ ॥

आकृतिर्जातिर्न संख्यानं जातिनिर्देशे हि सुद्दापा जातेरा देशमशक्यत्वात् तदाधारभूतानां भक्तीनां विधानं तत्र यद्यपि दीर्घेत्वात् सामर्थ्यान्न ह्रस्वप्लुतभक्तीनां प्रसंगः दीर्घभक्तयस्तु सर्वाः प्रसक्ता स्तत्रान्तर्यतो नुनासिकभक्तिरेव स्यात् पूर्वेण सवर्णदीर्घेप्यननुनासिक एव स्यात् विकल्पेन चायमित्यादि। यथा च दीर्घग्रहणाकृतात्वनिर्देशाश्चास्मिन्नर्थे लिंगं तथा तत्रैव व्याख्यातं। तदंतविधिश्चात्रेष्यत इति। अंगाधिकारेन समर्थस्तेनोपसर्जनेष्टनि भवति तत्रापि विकल्पितत्वात् प्रियाष्टा च नद्युत्तरपदस्य चेति वचनान्न एकवचनेनिर्देशात् स्वरूपस्य ग्रहणं नार्थस्य तेनोपसर्जनेष्टनि भवति तत्रापि विकल्पितत्वात्ति प्राप्नोति प्रियाष्टा नो प्रियाष्टान इत्यापि भवति तत्रापि भसंज्ञाविषये आत्वपक्षे आतो धातोरित्याकारलोपमिच्छंति प्रियाष्टः पश्य इत्यादि। आत्वाभावपक्षे त्वल्लोपे

गरायोहलि॥ ॥मजेर्ह्रद्धि रित्यतः प्रार्ग्विभक्त्यधिकार इति पूर्वसूत्रांते ग्रंथोयं पठितव्यः॥ ॥युष्मदस्मदोः॥ ॥युष्मदस्मदितिपंचम्यान्त इति
ष्ठस्थानात्ताव हलीत्यधिकारादृष्यत्र न स्यादिति। न च आदेशो हलादिरिति प्रसक्तोप्यमि पर्यंतु आपमादेशः। उत्तरत्रेति। यो चीतिय त्वमादेशो माभूत्वम
हमित्यादौ शेषे लोप इति शेषमव स्यार्थंचा न तदिहैव क्रियत इति। लाघवे विशेषाभावात्॥ ॥द्वितीयायां च॥ ॥उदाहरणो युडः प्रथमयोरमिति

॥रायो हलि॥ ॥रैइत्येतस्य हलादौ विभक्तौ परत आकारादेशो भवति· राभ्यां राहमिः हलीति किं रायौ रायः विभक्ताविति किं रैत्वं रैता·
मृजेर्वृद्धिरित्यतः प्राग्विभक्त्यधिकारः॥ ॥युष्मदस्मदोरनादेशे॥ ॥युष्मद् अस्मद् इत्येतयोरनादिष्टायां विभक्तौ परत आकार आ
देशो भवति· युष्माभिः अस्माभिः युष्मासु अस्मासु· अनादेश इति किं युष्मत् अस्मत्· हलीत्यधिकारादृष्यत्र न स्यात् उत्तरत्र तु अ
नादेशग्रहणेन प्रयोजनं यो चीति तदिहैव क्रियते॥ ॥द्वितीयायां च॥ ॥द्वितीयायां च विभक्तौ युष्मदस्मदोराकारादेशो भवति·
त्वां मां युवां आवां युष्मान् अस्मान् आदेशार्थं वचनं शसो न इति नकारः॥ ॥प्रथमायाश्च द्विवचने भाषायां॥ ॥प्रथमायाश्च
द्विवचने परतो भाषायां विषये युष्मदस्मदोराकार आदेशो भवति· युवां आवां प्रथमायाइति किं युवयोः आवयोः द्विवचन इति किं
त्वं अहं यूयं वयं भाषायामिति किं युवं वस्त्रा णीवीवसावसार्थे॥ ॥योचि॥ ॥अजादौ विभक्तौ परतो अनादेशे युष्मदस्मदो
र्यकार आदेशो भवति· त्वया मया त्वयि मयि युवयोः आवयोः अवीति किं युवाभ्यां आवाभ्यां· युष्मदस्मदोरनादेश इत्यत्र यदिहलीत्य
नुवर्त्तते शाकामकर्त्तुमचीति· तेन अनादेश इत्येव लक्ष्यते मन्यन्ते॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥छ ॥

विभक्तेरभावः॥ ॥प्रथमायाः॥ ॥युवयोरिति। ननु च योचीति यत्वमत्र बाधकं भविष्यति प्रथमा द्विवचनेपि तर्हि शेषे लोपो बाधकः स्यात्
अथ न स्यवचनादबाधः यत्वस्यापि बाधः स्यात् पुरस्तादपवादन्यायेन वा यत्वस्यैवाबाधः स्यात्॥ ॥योचि॥ ॥शकामकर्त्तुमचीत्येतदिति। कथं अनादि
ष्टायां विभक्तौ विधीयमानं यत्वमुत्सर्गस्तत्रैव हलादावात्वमपवादः। त्वत्मदिति। एकवचनस्य चेति ङसेरदादेशः॥ ॥छ छ॥ ॥छ॥

॥शेषे॥ ॥उपयुक्तादन्यः शेषस्तस्मिन्संग्रहश्लोकः पंचम्याश्चैव द्विपंचम्यादीनां संबंधी निपात्यद्विवचनमितिः अंएनाच्छेषस्तत्र शेषे लोपो वि
धीयत इति अद्विवचनानीत्येतद्वाषापेक्षं द्रष्टव्यं छंदसि तु युवं वस्त्राणीति द्विवचनमपि शेष एव॥ शेषग्रहणं विस्पष्टार्थमिति॥ कथं विभक्तिमा
त्रे लोपः तस्मान्नादिष्टायां विभक्तावतोपल्लमयवादः अस्यापि हलादौ वा त्व मपवादस्त्वसंकरेणात्वयत्वलोपाः सिध्यंति अनादेशग्रहणं
त्वाक्रियमाणे ग्रहणेयत्वलोपयो विषयविभागार्थं कर्तव्यमेवासंनिपातलक्षणादिति॥ विभक्तिसंनिपातकृतं युष्मदस्मदोरकारांतत्वं त

॥शेषे लोपः॥ यद्युक्तादन्यः शेषस्तस्मिन् शेषे विभक्तौ युष्मदस्मदोर्लोपो भवति कश्च शेषः यत्राकारयकारश्च न विहितः पंच
म्याश्च चतुर्थ्याश्च षष्ठी प्रथमयोरपि यात्वद्विवचनान्यत्र शेषे लोपो विधीयते॥ त्वं अहं यूयं वयं तुभ्यं मह्यं युष्मभ्यं अस्म
भ्यं त्वत् मत् युष्मत् अस्मत् तव मम युष्माकं अस्माकं शेषग्रहणं विस्पष्टार्थं शेषे लोपे कृते त्रिपां टापकस्मान्न भवति
तं त्राहत्वगीः अहं त्राहणी सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति अलिंगो वा युष्मदस्मदी इति केचित्तु शेषे
लोपं टिलोपमिच्छंति कथं च स्वमाणादेशापेक्षः शेषः ते चादेशामपर्यंतस्यते न मपर्यंताद्योन्यः स शेष इति तत्राद्यं टिलोप

इति॥ ॥३१॥ ॥४८॥ ॥४८॥ ॥

द्विरायोर्निमित्तं स्यात्तम्न्नं निपातं विहन्यात्॥ एतच्च दादिशाद्वत्स्त्रीलिंगात्वमभ्युपेत्योक्तं इदानीं च लिंगमेव नास्तीत्याह अलिंगे वेति॥ केचि
त्त्विति॥ टाग्निहत्सर्थमेव तएव मिच्छंति॥ कथमिति॥ यत्राकारो यकारश्च न विहितः स शेषस्तत्र विधीयमानो लोपः अलोंत्यस्येत्यंतस्यैव युक्त इ
ति प्रश्नः अनंतरोक्तं शेषग्रहणं स्ववैपर्थ्यमाहृदि कृत्वाह स्वमाणेति॥ स्वमाणादेशापेक्षः स्वमाणादेशः कः पुनरसाविस्या
ह ते चेति॥ मपर्यंताद्योन्यः स शेष इति सच टिरेव॥ तत्राद्यं लोप इति॥ स्थानिनोधिकरणत्वविवक्षया सप्तमी॥ किमर्थं पुनर्लोप इत्युक्ते तेनास
दाघत्वेनेव सिद्धं नासिध्यति द्विपर्यंता त्यदादय इति वचनात्॥ यदा चोपसर्जनं युष्मदस्मदी नदा स्यदाघत्वं नास्ति यानि टिलोपपक्षे तु सुत

।।मपर्यंतस्य।। ।।मपर्यंतस्येत्यवयवषष्ठ्या निर्देशात् युष्मदस्मदोरित्यवयविषष्ठी विज्ञायते मः पर्यंतो ऽवधिर्यस्य स मपर्यंतः यद्यपि द्वयोर्द्वे मिप
र्यंतौ तथाप्यभेदविवक्षयैकवचनं। मपर्यंतस्येति किमिति। समुदायपर्ययोरप्यादेशे आदेशानामपवादत्वाद्दोषाभाव इति प्रश्नः।। साकच्कस्य मा भूदि
ति। तत्रास्य अयमिति तस्य तद्ग्रहणेन ग्रहणात् प्रसंगः। सर्वस्य मा भूदिति। साकच्कस्य मा भूदिति तु नोक्तं यस्मात् अकच्विधावुक्तं त्वयका मयका त्वयि मयि
त्रसु बंतस्यात्र अकच् टेरकजिति। अनिष्टं रूपं स्यादिति। त्वाम्येस्य निष्टरूपं। अथ परिग्रहणं किमर्थं मांतस्येत्येवोच्येत युष्मदस्मदोर्ये मांतो भागस्त
स्येत्यर्थः। तत्राह मांतस्येत्येव सिद्धे किमिति। अस्मिन् साकच्कस्यादेशाभावे युवकाम् आवकामिति रूपे ग्रा। अवधिद्योतनार्थमिति। पर्यंतशब्देनाव
धिद्योतयामीत्यर्थः। अन्यथा मांतस्येत्युच्यमाने युष्मदस्मदोः समानाधिकरणं विशेषणं संभाव्येत प्रत्येकं संबंधाच्चैकवचनं ततश्च यत्र मां

।।मपर्यंतस्य।। ।।मपर्यंतस्येत्ययमधिकारः यदित ऊर्ध्वमनुक्रमिष्यामो मपर्यंतस्येत्येवं तद्वेदितव्यं। वक्ष्यति युवावौ द्वि
वचने युवां आवां मपर्यंतस्येति किं युवकां आवकामिति साकच्कस्य मा भूदिति· त्वमावेकवचने त्वया मया मपर्यंतस्ये
ति किं सर्वस्य मा भूत· तथा च सति त्वमयोरकारस्यायोचीति पकारे कृते अनिष्टं रूपं स्यात· मांतस्येत्येव सिद्धे किमिदं पर्यंतग्रह
णं कृतं· अवधिद्योतनार्थं तन्मांते मा भूद्वराते स्या।। ।।छ छ।। ।।छ छ।। ।।छ छ।। ।।छ।। ।।

ते युष्मदस्मदी स्यातां वादेशः स्यात् अथापि वैयधिकरण्यमाश्रीयते तथापि यत्र मांते तत्र भेदाभावाद् आदेशानस्युः व्यपदेशिवद्भावेनोपि प्राति
पदिकेन प्रतिषिद्धः पर्यंतशब्देन त्ववधिद्योतनेन तदुपादानसामर्थ्याद्युष्मदस्मदवयवेपि युष्मदस्मच्छब्दौ वर्तेते वर्तेते इति सर्वत्रादेश सिद्धे वै
यधिकरण्येन वा संबंधे परिग्रहणासामर्थ्याद्व्यपदेशिवद्भावी प्रातिपदिकेनेति प्रतिषेधाप्रवृत्तौ मांतस्यावयवस्यादेशः सिद्धः। अयमभिप्रायः परस्मै
हप्रतिशेषे पर्यंतशब्दः तेन सामानाधिकरण्यासंभवाद्वैयधिकरण्येनैवान्वयः यदा तु मांते युष्मदस्मदी तदानेवादेशाभावं तितदि दमु
क्तं मांते मा भूदिदानिदेति।। ।।यदा युष्मदस्मदी मांते तत्र तदैव मा भूत तदा अपि वा मा भूदित्यर्थः।। ।।छ।। ।।छ।। ।।छ।। ।।

कपुनर्मतिपुष्मदस्मदोः इत्याह एयंतयोरिति। युष्मानाचष्टे युष्मयति अस्मयति। णिचीष्ठवद्भावे टिलोपः। प्रत्ययोत्तरपदयोश्चेत्यत्रैकवचनाधि
कारात्त्वमादेशाभावः। क्विपि णिलोपः। ननु च विभक्त्यादेशेभ्योऽमित्यत्र च णिलोपस्य स्थानिवद्भावाद्व्यवधानमत आह स्थानिवत्त्वं चेति। णेः क्वौ
लुप्तत्वान्न तल्लोपस्यात्र स्थानिवत्त्वमस्तीत्यर्थः। क्वौ लुप्तं न स्थानिवदिति वचनेन तु क्वौ विधिं प्रति न स्थानिवदित्येवमिति भावः। तत्र योऽमन्यते मांत
योरप्यादेशाभावं नीति तन्मतेनोदाहरणानि कृदन्तत्वाद्विभक्तयः एकदेशविकृतस्यानन्यत्वाद्युष्मदस्मदाश्रयविभक्त्यादेशाः प्रकृत्यादेशा
श्च त्वाहयः तत्र त्वाहौ सौ विसर्गादिविषये ते भवन्ति अन्यत्रादेशविभक्तौ लोपः अजादौ यत्वं हलादावात्वं त्वं युषां यूयं युषां युषां युषा नयुष्माभ्यां
याभ्यां युष्माभिः तुभ्यं युषाभ्यां युष्मभ्यं युषत् तव युष्मोः युषाकं युष्मि युष्मोः युषासु एवमस्मदोऽपि द्रष्टव्यं मपर्यन्तेऽपि स्वयातु शेषस्मात्सोपमा

॥ ॥ एयंतयोः क्विपि मांतत्वं विद्यते युष्मदस्मदोः। स्थानिवत्त्वं च णेरत्र क्वौ लुप्तत्वान्न विद्यते ॥ ३२ ॥

णेर्मास्यत्वस्याभावात्तल्लोपाभावः युष्मभ्यं युष्मदित्यादि भवति यदा तु त्वामाचष्टे मामाचष्टे इति विग्रहः क्विप् क्विप तेन सप्रत्ययोत्तरपद
योश्चेति त्वमयोः प्रकृत्येकार्थितिप्रवृत्तिभावादस्मतिटिलोपश्चातः उपधायाः इति वा दिः यदि निष्ठितं मं गतततो हलभावः त्वद् मद् इति स्थिते
मपर्यन्ताभावात्त्वाहौ सौ विसर्गादौ प्रवर्तेते त्वाद्विपक्षे त्वामिति भवति पक्षान्तरे तु त्वमिति द्विवचने तु त्वां जसि त्वं द्वितीयादिषु तु त्वां त्वां त्वान्
त्वया त्वाभ्यां त्वाभिः त्वं त्वाभ्यां त्वभ्यं त्वत् त्वाभ्यां त्वत् त्वत्त्वयोः त्वाकं त्वयि त्वयोः त्वासु एवमस्मदोऽपि। यदा तु द्विवचनान्तान्निपाते तदापि युष्म
यत इतीति णिचि भवति विभक्त्यभावाद्युवावयोरभावः एकार्थत्वाभावात्प्रत्ययोत्तरपदयोश्चेत्यस्याप्यभावः विभक्तौ तु यवावादेशौ। त्वाहौ
सौ विसर्गादिविषये तु न एव भवन्ति ये तु मांतयोरादेशौ नेच्छन्ति तेषां सौ शेषे लोपपक्षे युष्मम् अस्मम् इति भवति पक्षान्तरे तु युष्मान् अस्मान् इति एवमन्य
त्रापि द्रष्टव्यं गहलोपं प्रक्रिया नर्कि रस्तु यरम्यते ३२ ॥ ॥

७का-प्र८०२
६५

॥युवावौ॥ ॥द्विवचनस्यार्थग्रहणमिति। वक्तीति वचनं कृत्यल्युटो बहुलमिति कर्तरि ल्युट्। द्वयोरर्थयोर्वचनं प्रथमा द्विवचनान्तं चैतत् यदाह द्विवचने युष्मदस्मदी इति। के पुनस्ते इत्याह द्व्यर्थाभिधानविषये इति। एतच्च वचनग्रहणाल्लभ्यते। कथं द्वित्व इति वक्तव्ये विभक्तौ विलेव द्वित्वे यो विभक्तिस्तस्यामित्यर्थः। अर्थग्रहणे सति यदिष्टं संपद्यते तद्दर्शयति यदेति। या विभाषिकस्य द्विवचनस्य ग्रहणे तस्यामिति विषये भागायुवा वादेशौ न स्याताम् इत्यभिप्रायः इति भावः। आदेशान्तरेण न बाध्येते इति। बाधस्तु परत्वादित्यत्रैव वक्ष्यते। अतिक्रान्तं युवामिति। सौत्रमि

॥युवावौ द्विवचने॥ ॥द्विवचनस्यार्थग्रहणं। द्विवचने ये युष्मदस्मदी द्व्यर्थाभिधानविषये तयोर्मपर्यन्तस्य स्थाने यु व आव इत्येतावादेशौ भवतः। युवां आवां युवाभ्यां आवाभ्यां युवयोः आवयोः। यदा समासे द्व्यर्थे युष्मदस्मदी भवतः समासार्थस्त्वन्यसंख्यस्तदा एकवचनं बहुवचनं वा भवति तदापि युवावौ भवतः। परिशिष्टादेशा विषयादेशान्तरेण न बाध्येते। अतिक्रान्तं युवां अतियुवां अत्यावां। अतिक्रान्तान् युवां अतियुवान् अतिक्रान्तेन युवां अतियुवया अत्यावया। अतिक्रान्तैर्युवां अतियुवाभिः अत्यावाभिः। अतिक्रान्ते युवां अतियुवभ्यं अत्यावभ्यं। अतिक्रान्तात् युवां अतियुवत् अत्यावत्। अतिक्रान्तानां युवां अतियुवाकं अत्यावाकं। अतिक्रान्ते युवां अतियुवयि अत्यावयि। अतिक्रान्तेषु युवां अतियुवासु अत्यावासु। त्वाहादीनां तु विषये परत्वात्त एव भवन्ति। क्रान्तो युवां अतित्वं अत्यहं। अतिक्रान्ताय युवां अतितुभ्यं अतिमह्यं। अतिक्रान्तस्य युवां अतितव अतिमम॥ ॥श्री४॥ ॥

वादेशान्तरेणाबाधः द्विवचनस्य तु पारिभाषिकस्य ग्रहणेऽपि सिद्धिरिति प्रथमायामतिक्रमः। उत्तरत्रापि द्विवचनस्यातिक्रमे यमेव हेतुः। न त्ववा नादेशे विभक्तौ हलादौ द्वितीयायां चात्वं अजादौ पत्वं शेषे लोपः। डे प्रथमयोरमिसाद्यो विभक्त्यादेशा अस्मय्यथायथं द्रष्टव्याः। परत्वादिति। त्वाहादीनामवकाशः परो बह्वर्थे युष्मदस्मदी अतिक्रान्तो युष्मान् अतित्वम् अत्यहं युवावयोरवकाशः युवामावां द्व्यर्थत्वे सति सत्युभयप्रसङ्गे विप्रतिषेधः॥ ॥श्री४॥ ॥

रामं०
६५

यदापि साति पारिभाषिकस्य ग्रहणे तत्रापि प्रसंगः स्यात् निष्पत्तिः स्यादिति भावः। अतिक्रान्तो त्वामति त्वामिति प्रथमायाश्च द्विवचने भाषायामि
त्यात्वं। यदात्र पारिभाषिकस्य ग्रहणं तदा त्वमावेकवचने इत्यत्रापि पारिभाषिकस्यैकवचनस्य ग्रहणमपि त्विति मत्वेदमुदाहृतं अथापि तत्रार्थ
ग्रहणं तथापि वद्धर्येति प्रसंगः स्यात्। अतिक्रान्तो युष्मान् युष्मानिति पूर्ववदात्वं। एवं नेयमिति। अतियुष्मां अतियुष्माभ्यां अतियुष्मयोः ए
वमस्मदः॥ ॥यूयवयौ जसि॥ ॥परमयूयमिति। अत्र यारम्परयोगोपप्यासंभवद्दृष्ट्वा तदन्तविधिस्तु भवतीति। अंगाधिकारे तस्य च तदुत्त

॥यदा तु युष्मदस्मदी एकत्वबहुत्वयोर्वर्तेते समासार्थस्तु द्वित्वे तदा युवावौ न भवतः। अतिक्रान्तो त्वां अति त्वां अतिमां अ
तिक्रान्तो युष्मान् अतियुष्मां अत्यस्मां एवं सर्वत्र ज्ञेयं॥ ॥यूयवयौ जसि॥ ॥युष्मदस्मदोर्मपर्यन्तस्य जसि परतो यूयव
य इत्येतावादेशौ भवतः। यूयं वयं परमयूयं परमवयं अतियूयं अतिवयं तदन्तविधिरत्र भवति॥ ॥त्वाहौ सौ॥ ॥युष्मद
स्मदोर्मपर्यन्तस्य सौ परतः त्व अह इत्येतावादेशौ भवतः। त्वं अहं परमत्वं परमाहं अतित्वं अत्यहं॥ ॥तुभ्यमह्यौ
ङयि॥ ॥युष्मदस्मदोर्मपर्यन्तस्य तुभ्य मह्य इत्येतावादेशौ भवतः ङयि परतः। तुभ्यं मह्यं परमतुभ्यं परममह्यं अ
तितुभ्यं अतिमह्यं॥ ॥तवममौ ङसि॥ ॥युष्मदस्मदोर्मपर्यन्तस्य तव मम इत्येतावादेशौ भवतः ङसि परतः त
व मम परमतव परममम अतितव अतिमम ३३ ॥ ॥श्री४॥ ॥

इयदस्यैवेति वचनात्। यदापि तदन्तस्य तदापि न सर्वस्य युष्मदस्मदोर्मपर्यन्तस्यैव सन्निकारात॥ ॥त्वाहौ सौ॥ ॥त्वमिति। यद्यप्यत्र त्व
मित्येकवचन इति त्वादेशः सिद्धः तथाप्यहादेशस्तावद्विधेयः तत्र चाहः सौ विधीयमाने युष्मदोपि प्रसंगः अस्मदो हः सौ विधीयमा
ने गौरवं स्यात्। तस्मात्त्रापि त्वादेश एव विधेयः किंचातिक्रान्तो युवां युष्मान् वा अतित्वमित्यत्र त्वादेशस्य शंकापि नास्ति॥ ३३ ॥ ॥

॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

।।त्वमौ।। ।।एकवचन इत्यर्थनिर्देश इत्यादि· एतच्च द्विवचन इत्यर्थनिर्देश इत्येतदनुसारेण योज्यं अर्थग्रहणे परिहारं संपद्यते तद्दर्शयितुमिदं इति· पारिभाषिकस्य
त्वेकवचनस्य ग्रहणेऽत्र न स्यादिह त्वमौ प्राप्तिः· अतिक्रान्तो त्वामिति तदापि त्वमौ भवत इत्यस्योदाहरणं। अतित्वामिति पूर्ववदत्वं· एवमहमुदाहर्त्तव्यमिति·
एतदतित्वमत्यहमित्यनेनापि संबध्यते· अतियूयं अतितुभ्यं अतित्वं एवमस्मदः अतित्वामतिमामिति समिनं तु संबंधः स एव· अतिलोपश्च अति
त्वान् अतित्वाभ्यां अतित्वाभिः अतित्वभ्यं अतित्वत् अतित्वयोः अतित्वाकं अतित्वयि· अतित्वाकं अतित्वयि· अतित्वासु· एवमस्मदः अत्रानंतरं
यद्यपि युष्मदस्मदी द्वित्वबहुत्वयोर्वर्त्तेते समासार्थस्यैकत्वात्तदा त्वमौ न भवतः अतिक्रान्तं युवामतियुवां अत्यावां अतिक्रान्तं युष्मान् अतियुष्मान्।

त्वमावेकवचने।। ।।एकवचन इत्यर्थनिर्देशः एकवचने युष्मदस्मदी एकार्थाभिधानविषये तयोर्मपर्यन्तस्य स्थाने त्वम इत्येतावा
देशौ भवतः त्वां मां त्वया मया त्वत् मत् त्वयि मयि यदा समासे एकार्थे युष्मदस्मदी भवतः समासार्थस्य त्वन्यसंख्यत्वाद् द्विवच
ने वा भवति तदापि त्वमावादेशौ भवतः आदेशान्तराणां तु त्वाहौ साविमेवमादीनां विषये पूर्वविप्रतिषेधेन त एवेष्यन्ते· अति
क्रान्तस्त्वां अतित्वं अत्यहं अतित्वां अतिमां एवमन्यदुदाहर्त्तव्यं।। ।।प्रत्ययोत्तरपदयोश्च।। ।।एकवचन इत्यनुवर्त्तते प्रत्यये उत्तरपदे
च परत एकवचने वर्त्तमानयोर्युष्मदस्मदोर्मपर्यन्तस्य त्वम इत्येतावादेशौ भवतः त्वदीयं त्वदीयो मदीयः अतिशायने त्वत्तरो मत्त
रः त्वामिच्छति त्वद्यति मद्यति त्वयि। वाचरति त्वद्यते मद्यते उत्तरपदे त्वत्पुत्रः त्वत्पुत्रः मम पुत्रो मत्पुत्रः त्वन्नाथो मन्नाथः एकव
चन इत्येव युष्माकमिदं युष्मदीयं युष्माकं पुत्रो युष्मत्पुत्रः विभक्ताविल्यधिकारात्पूर्वयोगो विभक्तावेव तनोत्यत्रापि प्रत्ययोत्तरप
देव यथा स्यादित्ययमारंभः ननु चात्राप्यन्तर्वर्त्तिनी विभक्तिरस्तीति तस्यामेवादेशौ भविष्यतः।। ।।छ।। ।।छ।। ।।छ।। ।।

अत्यस्मां एवं नेयमिति पठितमंपूर्वानुसारेणास्माहमानत्वान्न पठितं।। ।।प्रत्ययो।। ।।एकवचने वर्त्तमानयोरिति। एकार्थाभिधानविषययोरित्य
र्थः वस्तुकथने चेतत् ननु शब्दार्थकथनं एकवचने इत्यस्य यथा द्विवचनान्तत्वात्· त्वदीय इति· त्यदादीनि चेति वृद्धसंज्ञा वृद्धाच्छः त्वत्तर इति· पार
म्यवत्यकर्षयोगः। विभक्तावित्यधिकारादिति· ननु च पूर्वसूत्रे विभक्ताविति न संभन्त्स्यते· कथमाद्वृद्धेरनुवर्त्तमानं न संबध्येत· एवमपि योगविभा
गो न कर्त्तव्यः त्वमावेकवचने प्रत्ययोत्तरपदयोरित्येक एव योगः कर्त्तव्यः एवं हि चकारो न कर्त्तव्यो भवति· नैवं शक्यं एवं हि युवामावन्यथासंख्यं प्रसज्ये
त· युष्मदः प्रत्यये मद उत्तरपद इति· अथ क्रियमाणेऽपि योगविभागे यावत्तानिमित्तयोः साम्यं कस्मादेव यथासंख्यं न स्यात् नैष दोषः चका
रेणात्र क्रियतेऽसदृशयोरपि द्वेति निमित्ते समुच्चेष्यति· ननु चेति चोदकः। प्रकृतिप्रत्यययोः पूर्वेणोत्तरपदयोश्च मध्येयावन्तीति सा न वर्त्तिनी विभक्तिः।।

परिहरति नैवं शक्यमिति॰ ल॰ घुमिति शेषः॥ किं कारणमित्याह॰ तस्या लुका भवितव्यमिति॰ लुक् सुपो धातुप्रातिपदिकयोरित्यनेन॰ अंतरंगावि
सादेशोदकः॥ विभक्तिमात्रापेक्षत्वादंतरंगत्वं लुकः पश्चादुत्पन्नप्रत्ययमुत्तरपदं चापेक्ष्य धातुत्वप्रातिपदिकत्वयोः संजातयोः आमुवन्व
हिरंगः॥ यद्यप्ययं नित्यः तथापि नित्यांतरांतरंगाणामेव बलीयः पश्चोक्तं परिनित्यांतरंगप्रतिपदविधयो विरोधिनः संनिपाते तेषां मिथः प्रस
गे परं बलीयस्त्वमिति। एतदेवेत्यादिना परिहरः॥ किमेतस्य ताभवने प्रयोजनमित्याह तेनेति॰ प्रथमेनादिशब्देन गोमत्स्यतीत्यादेर्ग्रहणं द्वितीये
न दीर्घहल्ड्याब्भ्यो हल्लोपयोः हल्ड्याब्भ्य इत्यादिलोपे हि प्रत्ययलक्षणेन नुमादिस्यादेवं लुकि तु न लुमतांगस्येति प्रत्ययलक्षणप्रतिषेधान्न भव
ति॰ ज्ञापनस्य प्रयोजनांतरमाह॰ एवं चेति॰ पुनः शब्दोदयतीति॰ अयेति॰ असति हि प्रयोजने ज्ञापकं भवति अस्ति चात्र प्रयोजनं किं एषामेवला

॥ नैवं शक्यं लुका तस्या भवितव्यं बहिरंगो लुक् अंतरंगा आदेशा प्रथमं तौ भविष्यतः एतदेव तत्यदादिशवचनं ज्ञापकं अंतरंगानपि
विधीन्बहिरंगो लुक्बाधत इति तेन गोमान् प्रियो यस्येति गोमत्प्रियः रसेव मारीतुमादि लुका बाध्येते: एवं च सति त्वाहौ सौ विसे
वमाद्योपि मत्स्यपोत्तरपदयोरादेशा न भवंति॰ त्वप्रधानमेषां त्वत्प्रधानाः मत्प्रधानाः यूयं पुत्रा अस्य युष्मत्पुत्रः अस्मत्पुत्रः
तुभ्यं हितं त्वद्धितं॰ तव पुत्रः त्वत्पुत्रः॥ अथ किमर्थमयं त्वाहादीनां बाधनार्थमेतल्लविज्ञापने॰ लक्ष्यस्थित्यपेक्ष याज्ञा
पकार्थेत्येतस्मिन्नुत्तरमिष्टं संगृह्यते॥ ॥३४॥ ॥६७॥ ॥

हादीनामादेशांतराणां बाधनं॰ सत्येतस्मिन्प्रयोजने नेनज्ञापनमुपपद्यत इति। परिहरति लक्ष्यस्थित्यपेक्षयेति॰ गोमत्प्रिय इत्यादिकं लक्ष्यं
लोके साधुभावेन स्थितं तदादेशांतरबाधनार्थे किंचिज्ज्ञाप्यमाने न संगृहीतं स्यात् तच्चापेक्ष्य प्रयोगमूलत्वाद्व्याकरणस्यैतस्मात्तदये
क्षपानेतदादेशांतराणां बाधनार्थमुक्तं विज्ञातुमिति॰ अपरस्त्वाह यद्येतदादेशांतराणां बाधनार्थं स्यात्तमपर्यंतस्येत्यस्यानुवृत्ति
रपार्थिका स्यात् कथमुत्सर्गसमानदेशत्वादपवादानां क्रमनादिसुतथा हष्टत्वादिति॰ नायं नियमः उत्सर्गसमानदेशा अपवादा
इति श्नमादिषु व्यभिचारात् न हि श्नम्बुज्जकचः शबादिभिः समानदेशास्तस्माद्यद्यवश्यमुपपद्यते वक्तव्यमेवं च वक्तव्यमिह लाद
कोऽप्यनुवर्त्ततिमपर्यंतस्येति च तत्र त्वाहाद्यनुवृत्तेरैव तच्छान्दसे सिद्धे मपर्यंतानुवृत्तिरत्र प्रायणार्थो सती ज्ञापकमुक्तस्यार्थस्येति॰ व
यं तु ब्रूमः प्रपर्यंतस्येत्येवानुवर्त्ततस्यादेशो विधेयोपदिवांतरंगा आदेशाः सुः प्रत्ययोत्तरपदयोर्मपर्यंतस्य मध्यापि संभवत इति तस्या

॥त्रिचतुरोः॥ ॥त्रिचतुरोरेव विशेषणमिति श्रुतत्वात्॰ नांगस्येति॰ विपर्ययात्॰ तेन किं सिद्धं भवतीत्याह तेनेति॰ प्रियतिसेति अनङ् सोत्र दुश्शनस्पुरुदंसोनेहसां चेत्यनङ्॰ प्रियतिसाविति॰ अतो ङि॰ सर्वनामस्थानयोर्गुणं परमपि बाधित्वोत्तरसूत्रेण एरादेशः॥ प्रियतिस्त्रिति॰ ङको विविभक्ताविति ग्रहणेन ज्ञापितं लुमताङ्गस्येति निषेधे प्रत्ययलक्षणं भवतीति तेन स्वमोर्नपुंसकादिति नित्ये लुकि कृतेपि तिसृभावः॥ प्रियतिसृणी इति॰ एरादेशात् पूर्वं ङको विविभक्ताविति ग्रहणेन ज्ञापितं लुमतापि क्वचित् प्रत्ययलक्षणं भवतीति तेन स्वमोर्नपुंसकादिति नित्ये लुकि कृतेपि तिसृभावः॥ प्रियतिसृणी इति॰ एरादेशात् पूर्वं विप्रतिषेधेन नुमिति कश्चित् वदते॰ न घ्नतश्चेति कस्य भवतीति॰ सम

॥त्रिचतुरोः स्त्रियां तिसृचतसृ॥ ॥त्रिचतुर इत्येतयोः स्त्रियां वर्त्तमानयोस्तिसृ चतसृ इत्येतावादेशौ भवतः विभक्तौ परतः तिस्रः चतस्रः तिसृभिः चतसृभिः स्त्रियामिति किं त्रयः चत्वारः त्रीणि चत्वारि॰ स्त्रियामिति चैतत् त्रिचतुरोरेव विशेषणं नांगस्य तेन यदा त्रिचतुः शब्दौ स्त्रियामंगं तु लिंगान्तरे तदाप्यादेशो भवत एव॰ प्रियास्तिस्रो ब्राह्मण्यो यस्य प्रियतिसा ब्राह्मणः प्रियतिस्रौ प्रियतिसृः॥ प्रियतिसृ ब्राह्मणकुलं प्रियतिसृणी प्रियतिसॄणि॰ प्रियचतसा प्रियचतस्रौ प्रियचतस्रः प्रियतसृ प्रियचतसृणी प्रियचतसॄणि॰ न घृतश्चेति समासांतो न भवति॰ विभक्त्याश्रयत्वेन तिसृ भावस्य बहिरंगलक्षणस्यासिद्धत्वात्॰ यदा तु त्रिचतुः शब्दौ लिंगान्तरे स्त्रियामंगं तदा आदेशौ न भवतः प्रियास्त्रयो येषां प्रियाणि त्रीणि वा यासां ब्राह्मणीनां ताः प्रियत्रिः प्रियत्र्यौ प्रियत्रयः प्रियचतुः प्रियचत्वारौ प्रियचत्वारः तिसृभावे संज्ञायां कन्युपसंख्यानं कर्त्तव्यं तिसृकानाम ग्रामः॥ ॥

समानदशायामकारांतस्य तत्र ग्रहणमिति भावः॥ कथं भावे हेतुर्विभक्त्याश्रयत्वादित्यादि॰ एवं तावत् स्त्रियामित्यनेन त्रिचतुरोर्विशेषणा दस्याः विप्रतिषेधे सति अतिरिपिप्रियरि इति साहचर्याच्चेति॰ तिसृकेति॰ स्वार्थिकप्रत्ययः अल्पत्वे कुत्सितत्वे संज्ञायां वा॰ तत्र विभक्तेर्लुकि कृते तत्र विधीयमानस्तिसृभावो न स्यादिति वचनं॥ तत्र स्वार्थिकप्रत्ययांतत्वाद् बहुवचनांतत्तिसृकाशब्दः संज्ञोत्थे केग्रामस्यैकस्य विशेषसंज्ञारूढिरिति नास्ति बहुवचनप्रसंगः इत्यन्ये॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

चतस्रीति· यथा प्रियतिस्रावित्यत्र सर्वनामस्थानलक्षणां गुणं बाधित्वा रादेशो भवति तथा ङावपि प्राप्नोति तथा चोक्तं सूत्रे प्रियतिस्रीति
ङावपि रादेशं समुदाहरिष्यति पूर्वविप्रतिषेधं च वक्ष्यति· अत्रोच्यते: अस्मादेव निर्देशाद् द्वन्द्वप्रधानयोरेव रादेशः इह तु स्त्रस्य प्रधानत्वात्तद्भावे गु
णा इति· चतस्र इति· अत्र स्थानिवद्भावाच्चतुरः शसीत्यन्तोदात्तत्वे सति उदात्तयणो हल्पूर्वादिति शस उदात्तत्वप्रसंगः स निपातनस्वरेण बा
ध्यते। यथैव तर्हि निपातनस्वरः शसि स्वरं बाधते तथा षट्त्रिचतुर्भ्यो हलादिरित्येतं विभक्तिस्वरमपि बाधेत तत्राह: चतसृणामित्यत्र
त्विति· तत्र कारणमाह हलादिग्रहणसामर्थ्यादिति· तत्र हलादिग्रहणस्य चतस्रः पश्येत्येतदेव व्यावर्त्यं नान्यत्किंचित्· एतच्चतत्रे

चतसर्याद्युदात्तनिपातनं कर्त्तव्यं चतस्रः पश्येत्यत्र चतुरः शसीत्येष स्वरो माभूत्· चत
सृणामित्यत्र षट्त्रिचतुर्भ्यो हलादिरित्येष एव स्वरो भवति· हलादिग्रहणसामर्थ्या
न्निपातनस्वरो बाध्यते॥ ३५ ॥ श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

वोपपादितं· यदि च निपातनस्वरो विभक्तिस्वरस्यापि बाधकः स्यात्तदान्तरेणापि हलग्रहणं विभक्तेः स्वरो न भविष्यतीति किं हलादिग्रह
णेन तत् क्रियमाणं ज्ञापयति निपातनस्वरो विभक्तिस्वरं न बाधत इति· अन्ये त्वाहुः हलादिग्रहणादेव चतस्रः पश्येत्यत्र चतुरः श
सीत्यस्य प्रवृत्तिरवसीयते· यदि स्यात्तत उदात्तयणो हल्पूर्वादिति शस एव विभक्तेरुदात्तत्वमिति तथा हि तत्रापि हलादिग्रहणमनर्थ
कं स्यात्· तस्मादाद्युदात्तनिपातनमेव न कर्त्तव्यमिति· तत्राद्युदात्तस्य चतुरः शसीत्यस्यान्तर्यतमाद्युदात्तस्य चतस्रादेशो भवति च
तसृणामित्यत्र षट्त्रिचतुर्भ्यो हलादिरिति विभक्तेरुदात्तत्वं भवति॥ ॥३५॥ ॥छ छ॥ ॥छ छ॥ ॥ ॥

॥अचिर ऋ॥ ॥पूर्वसवर्णो लेखादि॰ तिसृ स्पष्ठ्येस्त्र प्रथमयोः पूर्वसवर्णस्य स्यात्प्रवादः॥ प्रियतिसृः स्वमित्यत्र अत उदित्ता प्रियतिस्त्रि प्रियतिस्त्रौ
प्रियतिसृ स्त्रीति ष्टं नी त्यत्र अतो ऽदि॰ सर्वनामस्थानयोरिति गुणस्यानुपयत्र विध्यंतरस्याप्राप्तिः प्रियतिस्रा प्रियतिस्रे प्रियतिस्रौ रि ति तत्र ऋकोयणाचीति
बाधित्वमिति विध्यंतरस्य विषयः रहमार्यते तत्र मध्येपवादाः पूर्वान्विधीन्बाधंत इति ऽत्व पूर्वसवर्णो बाधत इति गुणं गुणविषये तु रत्वात्स एव स्या

॥अचिर ऋतः॥ ॥तिसृचतसृ स्त्रीत्येतयोर्ऋतः स्थाने रेफ आदेशो भवत्यजादौ विभक्तौ परतः तिस्रस्तिष्ठ
न्ति तिस्रः पश्य॰ चतस्रस्तिष्ठन्ति चतस्रः पश्य॰ प्रियतिस्र आनय प्रियचतस्र आनय॰ प्रियतिस्रः स्वं प्रिय
चतस्रः स्वं॰ प्रियतिस्रि निधेहि प्रियचतस्रि निधेहि॰ पूर्वसवर्णोत्वादि॰ सर्वनामस्थानगुणानामयमपवादः॥ प
रत्वादिहि॰ सर्वनामस्थानगुणं पूर्वविप्रतिषेधेन बाधते॰ आचीति किं तिसृभिः चतसृभिः ऋत इति किं तिसृ
चतस्रोः प्रतिपदार्थे अन्यथाहि तदपवादः त्रिचतुरोरैवायमादेशो विज्ञायेत॥ ॥श्री४॥ ॥श्री४॥

दित्यत्र आह परमपि हीति॰ ऋत इति किमिति॰ तिसृचतस्रोरनुवृत्तेरलोन्त्यस्येत्येव सिद्धमिति प्रश्नः॥ तिसृचतस्रोः प्रतिपदार्थमिति॰ ति
सृचतस्रोरादेशयोरजादावपि विभक्तौ प्रतिपत्तिर्यथा स्यादित्यर्थः अन्यथा हीति॰ ऋत इत्यस्य त्वभावे नैव षष्ठी निर्दिष्टत्वात्त्रिचतुरोरेवा
यमादेशः स्यात्स च नाप्राप्तयोस्तिसृचतस्रोर्विधीयत इति तयोरपवादः स्यादित्यर्थः॥ ॥७॥ ॥७२॥ ॥४॥ ॥

॥जरायाः॥ ॥अतिजरंसीति॥ अति॰ अतिजर इति स्थिते यदि पूर्वं नुमागमः स्यात्सोऽयमक्तोंऽगमेव न भवेत् अथवा नस्वयं तं तु जराशब्दं वरमात्येवेति सत्यपि तदंतविधौ निर्दिश्यमानस्मादेशा भवंतीति जरशब्दांतस्याभावयवो गोजरशब्दः तस्य विभक्त्यानंतर्ये ऽभिधीयमानो जरसादेशो न प्राप्नोति अथापि स्यात् तथापि सकारांतस्य नुमः श्रवणं स्यात् तस्मात्परत्वान्नुमं जरसादेशएवोक्तः तत्र कृते हलंत लक्षणो नुम अतिजरसं पश्येत्यत्र अतिजरस्अम् इति स्थिते एकदेशविकृतस्यानन्यत्वाज्जरशब्दस्य जरसादेशे कृते स्वमोर्नपुंसका दिलुके प्राप्नोति न च तदानीमभावस्य प्रसंगः अनदंतत्वात् ननु चातिजरशब्दस्यादंतत्वात्स्यामवस्थायाम भावेन बाधितस्य लुकः

जरायाजरसन्यतरस्याम्॥ ॥जर इत्येतस्य जरसित्ययमादेशो भवति अन्यतरस्यामजादौ विभक्तौ परतः जरसा दंताः शीर्यंते जरया दंताः शीर्यंते जरसैलापरिदग्धुः जरयैलापरिदग्धुः अचीत्येव जराभ्यां जराभिः नुमो जरसादेशो विप्रतिषेधे न अतिजरांसि ब्राह्मणकुलानि इहातिजरसं ब्राह्मणकुलं पश्येति लुग्न भवति आनुपूर्व्यात्सिद्धत्वात् अतिजरस् अम् इति स्थिते लुगभावो जरसभावश्च द्वावपि युगपत्प्राप्नुवंति तत्र लुकाबहिरंगत्वाद नभावेन बाध्यते अभावोऽपि परत्वाज्जरसादेशेन न च पुनर्लुक्शास्त्रप्रवर्तते प्रसंगशावसरत्वादित्येवमेव भवति अतिजरसं ब्राह्मणकुलं पश्येति प्रथमैकवचने तु तृतीयाबहुवचने अतिजरं ब्राह्मणकुलं तिष्ठति अतिजरैरिति च भवितव्यमिति गोनर्दीयमभ्यं तं संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति अन्ये त्वनित्यत्वादस्याः परिभाषाया अतिजरसं ब्राह्मणकुलं तिष्ठति अतिजरसैरिति भवितव्यमिति मन्यंते॥ ३६ ॥

पुनः प्रसंगो न युक्तः प्रसंगाव सरत्वात् नैतदस्ति नात्राभावः प्रवृत्तः परत्वान्नित्यत्वाच्च जरसादेशेन बाध्यते तत्र कृते लुक्प्रसंगः एवं तर्हि संनिपातपरिभाषया लुङ् भविष्यति अजादि संनिपा तेन जरसादेशो निष्पन्नो लोसहतेत स्य लुको निमित्ततां प्रतिपत्तुं यद्येवमतिजरसं ब्राह्मणकुलं तिष्ठति जरसैरिति न सिध्यति कथं भिःसित्त्वा कारांतसंनिपातेनाजादिरादेशः इतोऽकारांतत्व विघाति नाजरसादेशस्य निमित्तं न स्यात् इष्टमेवैतत्संगृहीतं अतिजर मतिजरैरिति भवितव्यमेष गोनर्दीयस्य पक्षः तदिदमुक्तं तेर् दुसादि इहेति वा क्तोप पापे अतिजरसं ब्राह्मणकुलमिस्यादि भवितव्यमिति तं गोनर्दीयस्य मतं मपुनर्लुकशास्त्रप्रवर्तितरइति पउक्तेयच्चोक्तं अतिजरंब्राह्मणकुलमित्यादि तत्रोभयत्रापि हेतुः संनिपातलक्ष णा इति न पुनर्लुक्शास्त्रमित्यत्र पुनः शब्दस्यायमर्थः पूर्वं या लुकप्राप्तिः सा भावेन बाधिता या तु जरसादेशे कृते पुनः प्राप्तिः सापि

॥त्यदादीनाम्॥ ॥द्विपर्यन्तानामित्यादि॥ इष्टिरेवेयं यत्तु अत्ते शेषो लोपवचनं ज्ञापकमिति तद् युक्तं उपसर्जनार्थत्वादनिष्टमिति यद्वा तु शेषे लोपः स्थितो
पर्यन्तस्तु सुतराम ज्ञापकं पाठादेव पर्युदस्ता इति तथा च सर्वादिसूत्रे वार्त्तिकं संज्ञोपसर्जनीभूतानां प्रतिषेधः पाठात्पर्युदास इति तेन पाठोपजीव
नेन प्रवर्त्तमानमिदमपि संज्ञोपसर्जनीभूतानां न भवति त्यदादीति त्यदादीनामर्थः प्रधानं यत्र स समासे तत्रैव स्यात् न हि ते पाठात्पर्युदस्ताः॥
॥किमः॥ ॥तेनाकार एव किमो न विधीयत इति कथं पुनरकारविधाने क इत्यादि रूपसिद्धिः यावतां सप्राप्नोति न चान्त्यस्य पूर्वेण सिद्धः

॥त्यदादीनामः॥ ॥त्यदित्येवमादीनां अकारादेशो भवति विभक्तौ परतः त्यद् स्यः त्यौ त्ये तद् सः तौ ते
यद् यः यौ ये एतद् एषः एतौ एते इदम् अयं इमौ इमे अदस् असौ अमू अमी द्वि द्वौ द्वाभ्यां द्विपर्यन्ता
नां त्यदादीनामिदं अत्वमिष्यते इह न भवति भवत् भवान् संज्ञोपसर्जनीभूतास्त्यदादयः पाठादेव प
र्युदस्ता इति इह न भवति त्यद् त्यदौ त्यदः अतित्यद् अतित्यदौ अतित्यदः त्यदादिप्रधाने तु शब्दे भवत्येव
परमस्यः परमत्यौ परमत्ये॥ ॥किमः कः॥ ॥किम इत्येतस्य क इत्ययमादेशो भवति विभक्तौ परतः कः कौ
के साकच्कस्याप्ययमादेशो भवति तेनाकार एव किमो न विधीयते किमोऽदिति॥ ॥श्री॥ ॥७॥

द्विपर्यन्तानां त्यदादीनामित्युक्तत्वात् अपरे पुनरेतच्चोद्यभयादेवं पठन्ति तेनाकार एव इमो न विधीयत इति अथ समर्थः इम इत्येनावतत्र समस्त
त्यदादीनामित्येव त्यदादीनां संबन्धिन इमोऽकारो भवति तत्र नानर्थके लोऽन्त्यविधिरिति सर्वस्यैवेमोऽकारो भवति तेषामेवं पठतामुत्तरत्र
किमो ग्रहणं कर्त्तव्यं न कर्त्तव्यं उत्तिष्ठते इति वक्ष्यामि इम इत्येव तत्र नो वा ति इम इत्येव इमो वकारादेशो भवति तस्मात्साकच्कार्थमेव कादेशो वि
हितः॥ ॥७॥ ॥७॥

॥कुति॥ ॥तिशब्दस्य विभक्तिसंज्ञकस्याभावात्तकारे इकार उच्चारणार्थः कुहेति वाहच्छन्दसीति प्रत्ययः॥ ॥क्वाति॥ ॥क्वेति किमो विप्रत्ययस्य
घः अथादेशान्तरकरणं किमर्थं न प्रकृतः कुशब्द एव विधीयते एवं च कृत्वा योगविभागोपि न कर्तव्यः कुतिहास्विति सेवाक्वकारूपसिद्धिः प्रण
देशे कृते क्वेति सिद्धं अगुणत्वात् ह्रस्वे पुनर्दीर्घो वेति वचनान्न भविष्यतीति यण आदेशत्वं नागत्वाद्भवस्येव तत्राह आदेशान्तरकरणमगु
णानिवृत्त्यर्थमिति निष्फलत्वदुर्ज्ञानमिति भावः एवं तर्हि किमोद्दिति लोपे तात् किमोद्व्दिति निक्रमं दिलोपे कृते क्वेति सिद्धमत आह कि
मोद्दिति चेति कथं पुनः प्रसज्यते स्यमिद्धिः यावता ककारस्य लघुत्वमाप्नोति दिलोपस्यासिद्धत्वान्न भविष्यतीति कथमसिद्धत्वं असिद्धं
वहिरङ्गमन्तरङ्गे दिलोपो हि डित्प्रत्ययापेक्षत्वाद्वहिरङ्गः अत्वं तु तदनपेक्षत्वादन्तरङ्गं साकं कार्थमिति साकं क्वेहि प्रत्ययान्तरे विहि

॥कुतिहोः॥ ॥तकारादौ हकारादौ विभक्तौ परतः किमित्येतस्य कु इत्ययमादेशो भवति कुतः कुत्र कुह॥ ॥
क्वाति॥ ॥अतीत्येतस्यां विभक्तौ परतः किमित्येतस्य क इत्ययमादेशो भवति क्व गमिष्यसि क्व भोक्ष्यसे आदेशा
न्तरवचनमगुणार्थं निवृत्त्यर्थं किमोद्दिति च प्रत्ययान्तरेण विधीयते साकं कार्थं॥ ॥तदोः सः सावनन्त्ययोः
॥ ॥त्यदादीनां तकारदकारयोरनन्त्ययोः सकारादेशो भवति सौ परतः त्यद् स्यः तद् सः एतद् एषः अदस्
असौ अनन्त्ययोरिति किं हे स सः॥ ३७ ॥ ॥७॥ ॥७॥ ॥

नेकक्वेतिस्यात् यथान्यासे तु तत्रापि क्वेत्येव भवति॥ ॥तदोः सः॥ ॥साविति प्रथमैकवचनस्य ग्रहणं न सप्तमीबहुवचनस्य सुशब्द
इति सौ चिल्लोपे चेति सादिति निर्देशान्नाप्युभयोः तथा हि सितिसीत्येव ब्रूयात् सकारादौ विभक्ताविति अनन्त्ययोरिति किमिति विशे
षणाविशेष्यभावे कामचारात् सदादिषु नकारान्तस्यासंभवाच्च सरादिभिन्नदोर्विशेषणादनन्त्ययोस्तावसिद्धं अन्त्यस्य तु त्यदाद्यत्वेन
विष्यतीति प्रश्नः अत्वस्य मोन्यत्र सावकाशत्वात् सौ परत्वादिदमेव स्यादिति तु तरं नेत्र केवले सौ एवं द्विगौ विशेषाभावी त्वं तु द्वौ द्वि
यांच प्रत्युदाहृतं किमर्थं पुनस्तदोरित्युच्यते न तवर्गग्रहणमेव क्रियेत नोः सः सावनन्त्यस्येति नकारस्यापि तर्हि प्राप्नोतीति तस्मान्नुट
त्रिस्त्रनेषः अनयं अनसाविति नुडयं यदादिस्तद्ग्रहणे न गृह्यते ३७ ॥ ॥

७का॰प॰२

७०

॥अदसः॥ ॥अमुक इति॰ अदकस सु इति स्थिते औत्वप्रतिषेधात्त्यदाद्यत्वं दकारस्य मत्वं सकस्य उत्वं स्यचाकचोकारस्य उत्वं॰ उत्तरपदभूता
नामित्यादि॰ समासाद्या विभक्तिः स्यघ तेत्तस्ये क्षत्वा दादेर्यो वहिरङ्गा ततश्चान्तरङ्गत्वादेकारादेशे कृते तस्माद्विवर्णाकारादेशे क्रियमाणे
सुपरम्परपरमस्य मित्यादि निष्ठ्यप्रसंगः तस्मादकृतसंधिकार्याणामेवामी आदेशा वक्तव्याः एतच्चैव द्रस्यपरस्येत्यत्र ज्ञापयिष्यते॰
अदसः सोऽर्भवि दित्यादि॰ अदस औ इत्येतावदेव सूत्रमुक्त॰ सा विभक्ति अदस इति पंचमी तया पूर्वसूत्रे कृतार्थायाः सप्तम्याः षष्ठ्याः प्रक
ल्पिताया अदसः उत्तरस्य सो औकारो भवतीत्यर्थः तत्र त्यदाद्यत्वे कृते अत इति प्राप्ते किं सुलोपो विधीयते॰ ह्रस्वाल्लुप्येत संबुद्धिः यदि सो
रौकार एव विधीयते न दाहस्य अस्त्रामित्यत्र त्यदाद्यत्वे ह्रस्वात्परस्याः संबुद्धे रौकारस्य लोपः स्यात् न हलः नैष दोषः हलः सुलोपो विधीयते॰ पश्चा

॥अदसश्चौ सुलोपश्च॥ ॥अदसः सौ परत औकारादेशो भवति सोश्च लोपो भवति॰ असौ॰ असौ॰ औत्वप्रतिषेधः साकच्का
द्वा वक्तव्यः सादुत्वं च औत्वप्रतिषेधः साकच्काद्वा वक्तव्यो यदा चौत्वप्रतिषेधः तदा सकारादुत्तरस्य उत्वं भवति॰ असुकः असकौ॰
उत्तरपदभूतानां त्यदादीनामकृतसंधीनामादेशा वक्तव्याः परमाहं परमायं परमानेन॰ अदसः सोऽर्भवि दौत्वं किं सुलोपो विधी
यते ह्रस्वाल्लुप्येत संबुद्धिर्न हलः प्रकृतं हि तत॰ आपएत्वं भवेत्तस्मिन्न झलीत्यनुवर्तनात्॰ प्रसज्येतांश्च कादित्वं शीभावश्च प्रस
ज्यते॥ ॥इदमो मः॥ ॥इदमः सौ परतो मकारस्यान्तादेशो भवति॰ इयं अयं॰ इदमो मकारस्य मकारवचनं त्यदाद्यत्वबाधनार्थं॥ ॥
दश्च॥ ॥इदमो दकारस्य स्थाने मकारादेशो भवति विभक्तौ परतः इमौ इमे इमं इमौ इमान्॰ इह सा विभक्तिर्न संबध्यते उत्तरसूत्रे सा
विभक्तिवचनात्॰॥ ॥

चैतत्र हल्ग्रहणस्यांकर्तव्यं नेत्याह॰ प्रकृतं हि तत्॰ हलङ्याब्भ्यो दीर्घादित्यत्र॰ ननु तेदं प्रथमानिर्दिष्टं षष्ठीनिर्दिष्टं न
वेहार्थः एवं तर्हि इह ह्रस्वादिति पंचमी हल्लिति प्रथमायाः षष्ठी प्रकल्पयिष्यति तस्मादित्युत्तरस्येति॰ एवं सूत्रवद्याप्रथमायाः स्वयस्य कथं वि
न्ते वीही मविष्यति॰ आपएत्वं भवेत्तस्मिन् इह तर्हि स्त्रियां संबुद्धौ अम्मा औ इति स्थिते आङि चापः संबुद्धौ चेत्येत्वं प्राप्नोति। प्रकृते रेव लौत्वेटापो
भावादेत्वाभावः न झलीत्यनुवर्तनात। नैष दोषः॥ बहुवचने झल्येदित्यतो झली। तितत्रानुवर्तते झलादौ संबुद्धाविति औत्वे कृते अम झलादि
त्वान्न भविष्यति। प्रसज्येतांश्च कादित्वं। इह तर्हि स्त्रियामकच् अमक औ इति स्थिते प्रत्ययस्थात्कात्पूर्वस्येतीत्वं प्राप्नोति प्रकृते रेव लोकारे
टापो भावादित्वाभावः शीभावश्च प्रसज्यते। इह च स्त्रियां अमा औ इति स्थिते औङ आपः इति शीभावः प्राप्नोति। औत्वविधानं तु पुंसि चरितार्थं। पाक्षिकश्च दोषः। यदौङ आप इति पूर्वाचार्यनिर्देशात्स्त्रियां नास्तीति स्मरणे तु पक्षयोरप्ति॥

॥ग॥॰

७०

दाम्नरुत्त॥ ॥अमुकः इति। अदकस सुः इति। स्थिते औत्वप्रतिषेधात् त्यदाद्यत्वं दकारस्य मत्वं मकारादुत्तरस्य वाकारस्य उत्वं उत्तरस्यदस्मत
वामिसादि समासाद्याविभक्तिः हृत्यघते तत् दृष्टेष्यत्वात् हादेशो वहि ततश्चातरात्व॥ यः सौ॥ ॥स्त्रियामयं यकार इति। नपुंसके लुस
मोर्नपुंसकादिति लुमता लुप्तत्वान्सोरभावः॥ ॥हलि लोपः॥ ॥अन्ग्रहणमनुवर्त्तत इति। यद्यपि तत्र प्रथमा तत्तथापि हलीति सप्त

॥यः सौ॥ ॥इदमो दकारस्य यकारादेशो भवति सौ परतः इयं उत्तरसूत्रे पुंसीति वचनात् स्त्रियामयं यकारः॥
॥ इदोऽय् पुंसि॥ ॥इदम इद्रूपस्य पुंसि सौ परतः अय् इत्ययमादेशो भवति। अयं ब्राह्मणः पुंसीति किं इयं ब्राह्मणी
॥ ॥अनाप्यकः॥ ॥इदमोऽककारस्य इद्रूपस्य स्थाने अन इत्ययमादेशो भवति आपि विभक्तौ परतः अने
न अनया। अकः इति किं इमकेन इमकया। आपीति प्रत्याहारः तृतीयैकवचनात्प्रभृति सुपः पकारेण॥ ॥हलि लोपः॥
॥हलादौ विभक्तौ परत इदमोऽककारस्य इद्रूपस्य लोपो भवति। आभ्यां एभिः एभ्यः एषां एषु। नानर्थकेऽलोन्त्यस्य विधि
रिति सर्वस्यायमिद्रूपस्य लोपः अथवा नोपमत्तोंऽसलोपः अनाप्यक इति अन्ग्रहणमनुवर्त्तते॥ ॥मृजेर्वृद्धिः
॥ ॥विभक्ताविति निवृत्तं मृजेरिगन्तस्येको वृद्धिर्भवति। मार्ष्टा मार्ष्टुं मार्ष्टव्यं। मृजेरिति धातुग्रहणं मिथं धातोश्च कार्य
मुच्यमाने धातुप्रत्यय एव वेदितव्यं। कंसपरिमृड्भ्यां कंसपरिमृड्भिरित्यत्र न भवति ३८ ॥ ३ ॥

प्यात स्य षष्ठी प्रकल्प्यते॥ ॥मृजेर्वृद्धिः॥ ॥धातोश्च कार्यमुच्यमानमिति। वस्तुतो धातोर्यत्कार्यमुच्यते तदिह धातोरुच्यमानमिति
विवक्षितं मृधातुः स्वरूपे रोवादत्यत्तोमावाग्राहितेनानुरूप तस्य च इगुपधस्यानन्तरस्यामित्ययमभ्यमारामो धातुप्रत्यय एव भवति
न तु प्रमृड्भ्यामित्यादौ। तत्प्रत्यय इति। धातोरित्येवं विहितो कंसपरिमृड्भ्यामिति। अत्र तदन्तविधिना प्रसंगः॥ ॥ ३८ ॥ ॥छ॥
॥ ॥२३॥ ॥२ ३॥२३॥ ॥

॥ ॥अचोञ्णिति॥ ॥तंडुलनिश्वाय इत्यत्रैपरिमाणमाषंसर्वेष्प्रवृत्ति ह्वज गौः गावौगावइति अत्रगौरित्येतत्साक्षादुदाहरण
मितरत्राकारदेशेकृते लउपधायाइत्यनेवसिद्धं सखायौसखायइति अत्रापिसखाफविसेतदुदाहरणंजसितुजसिचेतिगुणोत्रपादेशो
वकृतेपूर्ववसिद्धं औलमिति बलनामरूपंदर्शं नमितखौत्वैरायांति किमर्थंपुनरिदमुच्यते यावत्ताजेतरयो तशब्दाभ्यांप्रज्ञाघणिजेत्र

॥ ॥अचोञ्णिति॥ ॥अजंतस्यांगस्यञ्णिति णितिचवृद्धिर्भवति एकस्तंडुलनिश्वायः द्वौशस्यनिष्पावौ
कारः हारः णीति गौः गावौगावः सखायौसखायः जैत्रंयौत्रंऔलंजयतेर्यौतेश्वउणादयोबहुलमितिष्णु
णप्रत्ययः अवतेरपित्रणः॥ ॥अतउपधायाः॥ ॥अंगस्योपधायाअकारस्यञ्णितेञ्णितिणितिचप्र
त्ययेवृद्धिर्भवति पाकः त्यागः रागः पाचयति पाचकः पाठयति पाठकः अतइतिकिं भेदयतिभेदकः
उपधायाइतिकिं चकासयतिचकासकः॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥४॥ ॥

यौत्रमितिसिद्धं औलमितिउणादयोबहुलंनिष्पातिपदिकानि तंडुलनिश्वायश्चापकोल्लावकाइत्यादौतुगुणोऽपवादश्चकृतयो
रतउपधायाइत्येवसिद्धं एवंकारुत्पादौ गोजोणिदित्येतद्धोतऔदितिवृद्धत्वं गोतऔकारदेशोभवतिसर्वनामस्थानेपरतः कथं
सखायौसखायः सख्युरसंबुद्धौ इत्येतत्साख्युरेदितिवक्ष्यामि अत्रोच्यते णितीतिनावदुत्तरार्थवक्रांकिंचाप्रियमाचष्टेप्राप
यतीत्याद्यौप्राघादेशेषुवृद्धिर्नस्यात् अथनेदीर्घांताविधीयेरन् तदतिगुरुस्यादितियथान्यासमेवास्तु॥ ॥७॥ ॥ ॥

॥तद्धितेष्वचामादेः॥ ॥अचामादेरचो वृद्धिरिति नानुवर्त्तते कृ परिभाषोपस्थानादिकिएवस्थानित्वेन भवितव्यं पघपितुल्यजातीयस्य निर्द्धा
रणं भवति यथा गवां कृष्णा संपन्नक्षीरतमेत्युक्ते गोरेव प्रतीयते तथात्राप्यचामादेरजेव तथापि सा सा स्वरइति निर्देशाभावात् इक्परिभाषोपस्थि
ष्टेतैव इग्लक्षणस्य चेति। तस्मात्स्थानिनिर्देशार्थमच इति वक्तव्यं। न वक्तव्यं प्रकृतमनुवर्त्ततेऽचो ञ्णितीति। तत्र निर्दिष्टस्थानिकत्वादिक्परिभा
षायाः अव्यापारः। अथ लाङ्गुलेर्जागतस्य कस्मात्तु जगच्छन्दोवचनस्येदं विपाणि हन्ते पथ्या कमममचो ञ्णितीति अत उपधाया इति वृद्धिः कस्मान्न भवति न
त्राह। लाङ्गुलेर्जागतस्येति। अंतोपधालक्षणा वृद्धिं बाधत इति परत्वादिति भावः। अंत्योमधालक्षणायाह देवकाशः गोः यावकः अस्मात्स्य
वकाशः मुष्ठुता सोऽस्तुतः लाङ्गुलेर्जागतस्येत्र उभयप्रसंगे परत्वादादिवृद्धिर्भवति। सकृद्गतिन्यायपक्षाश्रीयते न पुनः प्रसंगविज्ञानं एवं च कृत्वा

॥तद्धितेष्वचामादेः॥ ॥तद्धिते ञिति णिति च प्रत्यये परतः अंगस्याचामादेरचः स्थाने वृद्धिर्भवति। गार्ग्यः वात्स्यः दा
क्षिः प्लाक्षिः णिति। औपगवः कापटवः लाङ्गुलेर्जागतस्येत्यचामादिवृद्धिरंत्योपधालक्षणां वृद्धिं बाधते॥ ॥किति च
॥ ॥किति च तद्धिते परतोंगस्याचामादेरचः स्थाने वृद्धिर्भवति। नाडायनः चारायणः आक्षिकः शालाकिकः॥ ॥
॥इति वामनकाशिकायां वृत्तौ सप्तमस्याध्यायस्य द्वितीयः पादः॥ ॥ ३९ ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

पुष्करसच्छन्दस्यानुशतिकादिषु पाठोऽर्थवान् भवति पदित्वादिद्वद्धिविषये त्योपधाह्वद्धिः स्यात्तदोपधालक्षणायैव वृद्धाया पौष्करसादिः सि
द्धत्वादनुशतिकादिषु तं न पठेत्। ननु च ठगर्थं तत्र पाठः स्यात्। पुष्करसदा चरति पौष्करसादिकः न ह्यत्रोपधालक्षणा वृद्धिः प्राप्नोति अ
ञ्णित्वात्। नैतदस्ति न ह्यस्मात् चरत्यर्थे ठगुत्पद्यते अनभिधानात्। यद्वा प्रातिपदविहिते बाह्वादिलक्षण इञि उभयपदवृद्धिः नान्यत्र
तिठगर्थः पाठो न भवत्येव तत्र लादिवृद्धिः प्रतिषिध्यते तत्रांत्योपधालक्षणा वृद्धिः कस्मान्न भवति मत्सो भक्तिवे यस वरां तान्बलघुप
र्वादिलक्षणा मा पादिभवं वै पापदमिति तत्राप्येवोपरत्वात्तद्बाधकाविति सिद्धं॥ ॥किति च॥ ॥नाडायनः चारायण इति। नडादिभ्यः फ
क् आक्षिकः शालाकिक इति दामत्यर्थे ठक्॥ ॥छ॥ ॥इति श्रीहरदत्तमिश्रविरचितायां पदमंजर्यां सप्तमस्याध्यायस्य द्वितीयः पा
दः॥ ३९ ॥ ॥

।।देविका।। ।।अत्र विशेषणविशेष्यभावे कामचाराद्देविकादिभिरङ्गं विशेष्यते तेन न वातातिप्रसङ्गस्तत्रापि सामानाधिकरण्येन वैयधिकरण्येन वेति चला रः पक्षाः तत्र देविकादिभिः सामानाधिकरण्येनाङ्गस्य विशेषणे तदन्तविधिसद्भावाद्देविकाद्यन्तस्याङ्गस्याचामादेराकारो भवतीत्ययमर्थः स्यात्तत्र केवलानां स्यात् न हि तदेव तदन्तं भवति व्यपदेशिवद्भावोपि प्रातिपदिकेन निषिद्धः यदि तु प्रत्ययविधिविषयः स प्रतिषेधः तदा केवलानां भवतु त्र केवलानां स्यात् न हि तदेव तदन्तं भवति व्यपदेशिवद्भावोपि प्रातिपदिकेन निषिद्धः सुदेविकायां भवः सौदेविक इति अत्र सोरकारस्याकारः स्यात् तदा दौ तु न स्यात् देविकाकूले भवाः दाविकाकूलाः शालय इति तन्दन्ते चातिप्रसङ्गः सुदेविकायां भवः सौ... अथ वैयधिकरण्येन विशेषणं देविकादीनां ... किंचिद्देविकादीनामङ्गं यत्र च न ते वयवभूताः ततश्च केवलानां स्यात् न हि स एव तस्यावयवो...

।।देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्।। ।।देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसाम् इत्येतेषामङ्गानां अचामादेरचः स्थाने वृद्धिप्रसङ्गे आकारो भवति ञिति णिति किति च तद्धिते परतः। देविकायां भवमुदकं दाविकं दाविकाकूलाः शालयः पूर्वदेविका नाम प्राच्यां ग्रामः तत्र भवः पूर्वदाविकः उदकं देविकाकूले भवाः शालयः दाविकाकूलाः शालयः पूर्वदेविका नाम प्राचां ग्रामः तत्र भवः पूर्वदाविकः प्रा चां ग्रामनगराणामिति उत्तरपदवृद्धिः साप्याकार एव भवति। शिंशपा। शिंशपाया विकारः चमसः शांशपश्चमसः पलाशादिभ्यो वेत्यण्। अनुदात्तादिलक्षणो वाञ्‌ शिंशपास्थले भवाः शांशपास्थलाः पूर्वशिंशपा नाम प्राचां ग्रामः तत्र भवः पूर्वशांशपः दित्यवाट्। दित्यौहम् दात्यौहं दीर्घसत्रे भवं दार्घसत्रं श्रेयसि भवं श्रायसं वहीनरस्येद्वचनं वृद्धिविषये अचामादेरचः स्थाने वहीनरस्यैकारादेशो भवति वहीनरस्यापत्यं वैहीनरिः।

... केवलानां भवतु न तदन्तस्येति प्रसङ्गः सर्वत्रैव केवलानां भवति व्यपदेशिवद्भावोपि प्रातिपदिकेन प्रतिषिद्धः यदि तु प्रत्ययविधिविषयः स प्रतिषेधः तदा केवलानां भवतु न तदन्तानामिति प्रसङ्गः परिहृतः तदा दौव वले तदा दाव प्रसङ्ग एवमस्मिन्पक्षे परिहृतः अथाङ्गं समानाधिकरणो विशेषणं ... देविकादयस्तेषामचामादेराकार इति तदा केवले तदा दौवनदोषः प्रसङ्गः स्यादेवान्तदेवतर्हि अधिकरणो विशेषणं ... अङ्गस्य येऽवयवभूता देविकादयस्तेषामचामादेराकार इति तदा केवलेतदा दौवन दोषः प्रसङ्गः स्याद् एवं तर्हि ... सुदेविकादावप्राप्त्याभावान्निष्प्रसङ्गः किं तर्हि उत्तरपदभूतानामपि तेषामाकारप्रसङ्गः तत्र प्राग्ग्रामे पूर्वशांशपः इत्यादावपि स्थादेवाकारः सुदेविकादावप्राप्त्याभावान्निष्प्रसङ्गः
तदेवमेते चत्वारोपि पक्षा दुष्टाः।। ।।छ।। ।।

अथापरः पक्षः अंगेन द्विविकारादि भिन्नाचामादिर्विशेष्यते अंगस्याचामादेराकारो भवति स चेद्द्विविकारादीनां संबंधी भवतीति अत्र पक्षे
केवलेतदादेशांगेनास्ति दोषः नापि सो द्विविकमित्यत्र पूर्वपदस्योत्तरपदस्य वा प्रसंगः किंतु प्राग्ग्रामे एवं श्रंश यदस्यादावुत्तरपद
भूतानां द्विविकारादीनामाकारेण स्यात् । नैष दोषः । प्राचां ग्रामनगराणामित्यत्रैतदनुवर्तिष्यते तत्र च वाक्यभेदेन संबंधः प्राचां ग्राम
नगराणामुत्तरपदस्याचामादेर्वृद्धिर्भवति द्विविकारादीनां तूत्तरपदानामचामादेराकार इति । अयमपि द्वित्रिकायपक्षो न भवति यदयं प
क्षो भविष्यत् उत्तरपदवृद्धावप्येतेन तदनुवर्त्यत इत्येवावक्ष्यत । कस्तर्हि द्वित्रिकारस्य पक्षोयमभिधीयते । परिभाषेयमांतर्यपरिभा
षायवा द्विनीरे विकारादेरचामादेर्यत्र वृद्धिः प्रसज्यते । तत्रोपतिष्ठते तेन सर्वमिष्टं प्रसिध्यतीति । अनारभ्यमाणे एतस्मिन् द्विविकारादी
नामादेरचो वृद्धिर्भवतीत्यांतरतम्यवचनादैकारः प्राप्नोति न दृषवादेनाकारः प्राप्यते तत्रोगंवाभवं तु द्वेविकारादयः पूर्वपदमुत्त
रपदं वा सर्वथापत्र द्विविकारादीनामचामादेरचो वृद्धिप्रसंगः तत्राकारो भवतीति परिभाष्यते । ननु च अंगस्येति वर्तते । सत्यं नैव
मस्याभिसंबंधः अंगस्याचामादेराकारो भवति स चेद्द्विविकारादीनां संबंधीति किं तर्हि द्विविकारादीनामचामादेराकारो भवतीति तच्चेदंग
स्य संबंधीति । अथैवमभिसंबंधे किंमावर्त्तेन किंचित् अन्यत्र उत्तरस्य तु संबंधो वक्तुमर्हत्येतावता । साध्याकार एव भवतीति
उक्तोत्र हेतुः । वहीनरस्येति विवहोस्यास्तीति वही वही चासौ नरश्च वहीनरः अन्येषामपि दृश्यत इति दीर्घत्वं । वैहीनरिरिति । अत्रा
कारवृद्धिः प्राप्ताकारेण बाध्यते तेन एत्वैकारवृद्धिर्भवत्येव न हि तस्यानाप्राप्तायामिकारो विधीयते । एवं च कृत्वा सूत्रेप्यकार
एवंविधेपस्त स्याव कारवृद्धौ सिद्धमिष्टं तथा तु नकृतमित्येवा केचिदिति । विहीनो नरो विहीनरः पृषोदरादित्वात् नशब्दस्य लो
प४॥ ॥१॥ ॥श्री४॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥केकयमित्रयु॥ ॥लौकिकं हि तत्र गोत्रं गृह्यत इति। मित्रयुशब्दो भेदेऽयं चारात्तद्यस्य संतानेयं दावर्त्तते न परमप्रकृतावेव तद्देदमुच्यते यद्गर्गाद्या
दिषु यञ्यस्कोटिलाद्दृढ्यां लुग्भि यतेन ह्यापारिभाषिके यो गोत्रेन दोषः। अत्र यद्यपि वृद्धिप्रसंगे यमादेश उच्यते तथापि वृद्धिर्न बाध्यते विषयभेदात्
अचामादेर्वृद्धिः यादेरियादेशः अंगं भूभयोर्विशेषणं न कार्यि॥ ॥नय्वाभ्यां॥ ॥अत्रार्थद्वयविधानाद्वाक्यभेदस्तस्यैव द्योतकस्तु शब्दः पूर्वाविभ्यनेन स
बंधादैचाविति प्राप्तेप्येकवचनं सौत्रं हि तेनानुक्रियाविशेषणत्वादेकवचनं ताभ्यां तु पूर्वमिति। ऐजागमो भवतीति। टित्वाद्यागमलिंगाभावेपि पूर्वशब्दे
न देशविशेषे भवत्वाद्यामद्स्युच्यते आगच्छतीत्यागम इति। वैयसनमिति। गतिकारकोपपदानां प्राक् सुबुत्पत्तेः समासः तु उत्तरपदविषयमित्यवोचो
मतेन वैयसनादिषु घोः पदान्तत्वं स्वश्वशब्दः शिवादिः। याष्टीक इति। शक्तियष्ट्योरीकक्। अनुचात्राचामादेः स्थाने योद्योताभ्यामित्साश्रयणादेव

॥केकयमित्रयुप्रलयानां यादेरियः॥ ॥केकयमित्रयु प्रलय इत्येतेषां यकारादेरियादेशो भवति तद्धिते ञिति णिति किति च प
रतः। कैकेयस्यापत्यं कैकेयः। जनपदशब्दात्क्षत्रियादञ्प्रत्ययः। मित्रयुभावेन श्लाघते मैत्रेयिकया श्लाघते। गोत्रचरणाद्वुञ्। घ
त्वाकारस्तद्वेत्तेति विदुञ्। लौकिकं हि तत्र गोत्रं गृह्यते लोके च ऋषिशब्दो गोत्रमित्यभिधीयते। प्रलयादागतं प्रालेयमुदकं॥ ॥नय्वा
भ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्॥ ॥यकारवकाराभ्यां पदान्ताभ्यामुत्तरस्याचामादेरचः स्थाने वृद्धिर्न भवति तद्धिते ञिति णिति कि
ति च परतः ताभ्यां तु यकारवकाराभ्यां पूर्वमैजागमो भवति। यकारादैकारः वकारादौकारः। व्यसने भवं वैयसनं व्याकरणमधीते वै
याकरणः स्वश्वस्यापत्यं सौवश्वः। याभ्यामिति किं लार्थस्यापत्यं लार्थिः। पदान्ताभ्यामिति किं याष्टिः प्रहरणमस्य याष्टीकः। यत इमे छा
त्रा याताः। प्रतिषेधवचनमैचो विषयप्रक्लृप्त्यर्थं हि मा भूत्। दाध्यश्विः शिवमीधाक्षिरिति। न ह्यत्र याभ्यामुत्तरस्याचो वृद्धिप्रसंगोस्ति। वृद्धे
नपविद्यतित्राह यत इति। इणो गतौ लटः शत्रादेशः शपो लुक् इणो यणादेशः॥ भावात्प्रतिषेधोपि नास्तीत्यप्रसंगः॥ ॥२॥ ॥
सत्यपि प्रतिषेधे वैयसनमित्याद्यौ व्यसन अ इति स्थिते वृद्धिश्च प्राप्नोति ऐजागमश्च तत्र वृद्धिरनित्या शब्दान्तरप्राप्तेः सा ह्येचि कृते तस्यैव प्राप्नोति
तमभ्यासतितस्य तद्व्यहरणेन ग्रहणात् ऐजागमस्तु नित्य इति स एव तावद्भवति तत्र कृते यद्यपि पुनः प्रसंगविज्ञानाद्वृद्धिस्ताभ्यां तर्हि ऐका
रस्यैकार औकारस्यौकार इति न कश्चिद्दोषः। किं प्रतिषेधेन तत्र न्व सति तस्मिन्वैयाकरणो भार्या अस्य वैयाकरणभार्य इत्यत्र वृद्धिनिमित्तस्येति पुंव
द्भावप्रतिषेधः स्यात् सति तु प्रतिषेधे न भवति। कथं न भवति यावता वृद्धिनिमित्तं ञ्णकारयोरन्तं तद्धित इति बहुव्रीहिः विद्यते चात्र णकारः
सत्यं विद्यते निमित्तं तु न भवति कुर्वद्रूपे हि निमित्तशब्दोमुख्य इत्युक्तं॥

ननु च माभूत्तद्धितेष्वचामादेरित्यस्या वृद्धेर्निमित्तं य एवत्वमोर्जितात्वं हिताश्रयणे ऽज्विधीयते तस्यैव वृद्धिसंज्ञकस्य निमित्तं णकार इति स्यादेवयुं
वङ्गावप्रतिषेधः उच्यते न ह्येव स्तुतेया वृद्धिस्तस्यायान्निमित्तं णकार इत्यस्तु इति प्रतिषेधः किं तर्हि वृद्धिरित्येवं या विधीयते तन्निमित्ते अतः युवङ्गा
वप्रतिषेधानिवृत्त्यर्थं वृद्धेः प्रतिषेधो वक्तव्यः अत एव न वक्तव्यः एकस्मिन्नेवैशेषविहितानां चैषां मध्ये विहिताया वृद्धेर्बाधको भविष्यतः सत्यपि सं
भवे बाधनं भवतीति न्यायात् ततश्च पूर्वविप्रतिषेधेन युवङ्गावप्रतिषेधो न भविष्यतीति घाभ्यां एवमेव जित्येवास्तु नार्थः प्रतिषेधेनेत्यत आह प्रतिषेधवच
नमिति प्रतिषेधवचने ऽसति याभ्यां घाभ्यां परस्य वृद्धिः प्राप्ता प्रतिषिध्यते ताभ्यामेव पूर्वावैचौ भवतीत्यर्थो भवति असति हि तस्मिन् यौ को
वनयोगश्चैयातां तस्मादैचौ विशिष्टो विषयः प्रकॢप्तो ऽयथा स्यादित्येवमर्थं प्रतिषेधवचनं क्रियत इत्यर्थः दाध्यश्विर्माध्वश्विरिति· दधिप्रिया
श्वोपस्य सदृक्षश्वः एवं मध्वश्वः ताभ्यामतदृष्ट ४ ननु वावाचामादेरित्यनेन योर्विशेषणत्वाम् अचामादेस्त्वः स्थाने योर्घाविति एवमपि हि
अशीति क्रधीष्टः तद्धितार्थ इति समासः तमधीष्ट इति मध्वतेष्टन्याशीतिकः अत्र प्राप्नोति· सति तु प्रतिषेधे तद्धितेष्वचामादेरित्यनु
वृत्तेर्याभ्यां परस्य तद्धितेष्वचामादेरिति वृद्धिः प्राप्ता प्रतिषिध्यते ताभ्यामिति विज्ञायते अत्र तु संख्यायाः संवत्सरसंख्यस्य चेत्येवमुत्तरप
दवृद्धिर्विधीयत इति तस्या निषेधाभावादैजभावः सिद्धः। स्यादेतत् अचामादेरित्यनुवर्तमानं सत् पर्यवसितं वृद्धेर्विशेषणं अचामादेरित्येवं या वृ
द्धिः तस्याः प्रसंगे तत्स्थानादेशो घाभ्यां पूर्वमैचौ भवत इत्यर्थः इह तु नैवं वृद्धिप्रसंग इत्यैचौ न भविष्यत इति· एवमपि घावविशेषितौ स्यातां तत
श्च दाध्यश्वादौ प्रसंगः न च सकृच्छ्रुतमचामादेरित्येतद्द्वयोरप्यविशेषयितुमर्हतीति येनाचामादेः स्थाने यौ घौ ताभ्यां पूर्वावैचौ भवतः सति तस्मि
न्नचामादेरित्येवं वृद्धेः प्रसंग इत्याश्रयणान्न कापि दोषः स्यात्· न च तमाह नैकशेषाणामन्यतमाश्रयणे प्रमाणमस्ति तस्मात्सुष्ठूक्तं प्र
तिषेधवचनमैचोर्विषयप्रकॢप्त्यर्थमिति· ॥ ॥२॥ ॥४ ४॥ ॥४ ४॥ ॥४ ४॥ ॥४ ४॥ ॥४ ४॥ ॥

१का-प१०२

७४

उत्तरपद वृद्धेरपीति · एतच्च तत्रास्याधिकाराल्लभ्यते · यत्रलिति · एतदप्युत्तरपदेन घोर्विशेषणाल्लभ्यते उत्तरपदस्य यो घोताभ्यां परस्य वृद्धिर्न भवति ताभ्यां च पूर्वमैत्तामस्तु इति · इह स्वश्व अजश्व यजो · इ स्व अज श्व वजो तयोरिदं ऐयजं ऐवजं इति स्वोरम त्वालाद् तत्र भवति तत्वाच्चोगग्रह णेनाग्रहणादेय ज्ञीयमो वज्ञीयमित्यादौ शेषनिषातो न स्यात् · शेष विवक्षायां च द्वचस्तो न स्यात् प्रातिपदिकग्रहणादुदुत्तात । उच्यते · यद्येवं विधमभि धानमस्तितत: पूर्वत्राद्द्वा वर्णितम: तत्रैको वप ववचन: अपरो भवस्या वचन: आभ्यां पूर्वौ वैवौ भवत: तौ चोणस्य वयवाविति । अत्र संयु ह श्लोकौ: नाप्रा मायाहि वृद्धः प्रतिपद् विधिरैच्चा घकोनजकिमर्थीयाभ्यां पौ घोपरस्येच्च प्रसजति तत एवैष पूर्वोपथा स्यात् · मात्रा स्वश्वादिके

॥ उत्तरपदवृद्धेरयं प्रतिषेध इष्यते पूर्व त्र अलिदे भव: पूर्वत्रैयलिंद: यत्र तु उत्तरपदसंबंधिनौ घौ न भवत: तत्र नेष्यते प्रतिषेध: द्वे अशीती भृतो भूतो भावी वा द्व्याशीतिक: ॥ ॥ द्वारादीनां च ॥ ॥ द्वार इत्येवमादीनां च य्वाभ्यामुत्तरस्याचामादेरचः स्थाने वृद्धिर्न भवति पूर्वौ तु ताभ्यामैजागमौ भवत: । द्वारे नियुक्तो दौवारिक: द्वारपालस्येदं दौवारपालं ॥ ॥ श्री ॥४॥ ॥

मवदिति न तु विहितौ याववचां स्थाने आर्दधौ ताभ्यामैजि ह्येवं न भवति इति चेद्द्वे अशीती अधीष्टे · स्याद् द्व्याशीतिकं गाघ च इति विहितस्ये चरैचैं प्रसंगे यौ न स्यातां विशिष्टो श्रुतमपि च सहको भयं भेत्तुमर्हः · स्यादेतस्योत्तरस्याप्यधिकृतिरिह यघो: पदस्योत्तरस्येवं पूर्वत्रैयालिंदे भवति न च भवेद्द्वे अशीती अधीष्टे ॥ ॥ द्वारादी ॥ ॥ दौवारिक इति · तत्र नियुक्त इति ठक् · द्वारपालस्येदं दौवारपालमिति · संज्ञापूर्वको विधिरनित्य इति वृद्धलक्षणष्ठो न भवति कलापिनो णोस्त्राग्रहणस्याधिकविधानार्थत्वाद्वा · कथं पुनर्द्वारशब्दस्य पाठे द्वारपालशब्दस्य विधिरयं भवति तत्राह ॥ ॥

एम० ७४

पाद्विमाषा ॥ ॥ अत्राह विभाषेयं स्त्रियामिति नानुवर्त्तते पंचकोष्ट्रेस्यादयं तरंगत्वान्नित्यप्रत्ययं ह्रावहयो चमते नोभयत्र विभाषायि नमवृ
तद्वारादिविधिश्चात्र भवतीति · अत्रव कार्णादे शिकादित्त्र एवोक्तं ज्ञापकं चात्रवक्ष्यति · सौवरो ध्याय इति · स पुनः शंतनु प्रणीतः फिषिस्या
दिकः । सौवर्यः स सम्पस्तदंतसप्तम्या इति भाष्ये शोभनो ध्यायः स्वाध्याय इति · आङ् त्रम च्छेप्र सेप्सवः अ से षामपि दृश्यत इति वाउ चार
पद्वादेर्दीर्घत्वं · एवमपीस्यादि · पद्यत्र स्वशब्दः पद्यते किमायातं स्वाध्यायशब्दस्यतत्राह · नद्वारादावपिहीति स्वार्थिकस्वाभाविकादयत्र भाष्य

तद्वारादिविधिश्चात्र भवति स्वरमधिकृत्य कृतो ग्रंथः सौवरः सौवरो ध्यायः सौवर्यः सप्तम्प इति । मल्कशे भवो वैयल्कशः स्वस्ती
त्याह सौवस्तिकः स्वर्भवः सौवः अव्ययानां भमात्रे टिलोपः स्वर्गमनमाह सौवर्गमनिकः स्वाध्याय इति केचित्स ठंति तदनर्थ
कं शोभन अध्याय इत्येतस्मा व्युत्पत्तौ पूर्वेणैवसिद्धं अथाप्येवं व्युत्पत्तिः क्रियते स्वो ध्यायः स्वाध्याय इत्येवमप्यत्रैव स्वश
ब्दस्य पाठात्सिद्धं तदादावपि हि वृद्धिरियं भवत्येव स्फ्यकृतस्यापत्यं स्फैयकृतः स्वादुमृदुनः इदं सौवादुमृदवं श्वन् शुन इदं शौवनं
अतितिप्रकृतिभावः शुनो विकारो मांसं शौवं मांसं प्राणिरजतादिभ्योञित्यत्र श्वादंष्ट्रायां भवः शौवादंष्ट्रो मणिः स्वस्येदं सौवं
स्वग्रामे भवः सौवग्रामिकः अध्यात्मादित्वाट्ठञ् अपदांतार्थोयमारंभः । द्वार । स्वर । स्वाध्याय । व्यल्कश । स्वस्ति । स्वर् ।
स्फ्यकृत । स्वादुमृदु । श्वन् । स्व ॥ ॥ न्यग्रोधस्य च केवलस्य ॥ ॥ न्यग्रोधशब्दस्य केवलस्य यकारादुत्तरस्याचामादेः
चः स्थाने वृद्धिर्न भवति तस्माच्च पूर्वमैकारआगमो भवति । न्यग्रोधस्य विकारो नैयग्रोधश्चमसः । केवलस्येति किं न्यग्रो
धमूले भवाः शालयो न्याग्रोधमूलाः शालयः । न्यग्रोहतीति न्यग्रोध इति पक्षे नियमार्थं अव्युत्पत्तिपक्षे विध्यर्थं ॥
॥ न कर्मव्यतिहारे ॥ ॥ कर्मव्यतिहारे यदुक्तं तन्न भवति । प्रतिषेधागमयोरयं प्रतिषेधः । व्यावक्रोशी व्यावचर्ची व्यावहा
सावर्त्तते । कर्मव्यतिहारेणच स्त्रियामिति णच् प्रत्ययः । तदंतात्स्वार्थे अञ् स्त्रियामञि सत्यतो
प्रयोगात्साधवः । स्फैयकृत इति · अपिवादादयाः · शौवादंष्ट्रो मणिरिति · शुनो दंतदंष्ट्रेति दीर्घत्वं पूर्ववदयाः ॥ ॥ न्यग्रोधस्य ॥ ॥ नीचै
र्नतैः प्ररोहैर्वर्द्धन इत्यर्थः । अव्युत्पत्तिपक्षे तु विध्यर्थमिति · अपदांतत्वाद्य कारस्य · अथास्मिन्नपिपक्षे केवलग्रहणं किमर्थं यावता न्य
ग्रोधस्येतु अनेन नकः प्रसंगोपन्तदादौ स्यात् · ज्ञापनार्थंतु · एतज्ज्ञापयति अस्मिन्प्रकरणे यानुपात्तानि तान्नि तदादिष्वपि भाज्नो वा विशे

॥स्वागत॥ ॥आवकोशी सांटोमवपूर्वोधातुः कर्ममतिहारे दृष्टः इति अवहारशब्दोपि कर्ममतिहारे वर्त्तते ततश्च पूर्वेणैवात्र सिद्धे सूत्रारम्भा
दोनर्थक इत्याशङ्क्याह· अवहारशब्दोयमिति· द्वारादिषु स्वशब्दस्य पाठात् प्रसंग इति· तदादेरपि तत्र ग्रहणं भवतीत्युक्तमेव॥ ॥श्वादेः॥ ॥
तत्रैवेत्यादि· यदि तत्र तदादिविधिर्न स्यात् एतद्वचनमनर्थकं कथं· केवलः श्वन् शब्दो द्वारादिषु पठ्यते तत्र कः प्रसंगोपत्तदादेः स्यात् त
दादिविधिर्भवतीति· अस्मिन्प्रकरणे यदुक्तं तदुक्तं तद्वृद्धिभाजो वा विशेषणमित्यभिन्नार्थं ज्ञापकमित्यर्थः॥ ॥इकारादिग्रहणं चेत्यादि·

॥स्वागतादीनां च॥ ॥स्वागतादीनामैवमादीनां यदुक्तं तन्न भवति। स्वागतमित्याह स्वागतिकः स्वध्वरेण चरति स्वाध्वरिकः स्वां
गस्यापत्यं स्वांगिः· व्यंगस्यापत्यं व्यांगिः· व्यडस्यापत्यं व्याडिः· व्यवहारेण चरति व्यावहारिकः व्यवहारशब्दोयं लौकिके वृत्ते वर्त्त
ते न तु कर्ममतिहारे स्वपतौ साधुः स्वापतेयः· द्वारादिषु स्वशब्दस्य पाठाद् ऐच् प्राप्तिः। स्वागत। स्वध्वर। स्वंग। व्यंग। व्यड। व्यवहा
र। स्वपति॥ ॥श्वादेरिञि॥ ॥श्वादेरङ्गस्य इञि परतो यदुक्तं तन्न भवति। श्वभस्त्रस्यापत्यं श्वाभस्त्रिः· श्वादंष्ट्रिः· श्वन्शब्दो द्वारादिषु
पठ्यते तत्र च तदादिविधिर्भवतीत्येतदेव वचनं ज्ञापकं। इकारादिग्रहणं च कर्त्तव्यं श्वागणिकाद्यर्थं श्वगणेन चरति श्वागणिकः
श्वायूथिकः। तदन्तस्य चायमुत्सृज्यते इति प्रतिषेधः श्व तेश्वाभस्त्रेरिदं श्वाभस्त्रं॥ ॥पदान्तस्यान्यतरस्यां॥ ॥श्वादेरङ्गस्य
पदशब्दान्तस्यान्यतरस्यां यदुक्तं तन्न भवति। श्वापदं शौवापदं॥ ॥उत्तरपदस्य॥ ॥उत्तरपदस्येत्ययमधिकारो हनस्तो
चिण्णलोरिति प्रागेतस्मात् यदित ऊर्ध्वमनुक्रमिष्याम उत्तरपदस्येत्येवं तद्वेदितव्यं वक्ष्यति अवयवादृतोः पूर्ववार्षिकं अप
रहैमनं अपरहैमनं॥ ॥७॥ ॥७॥ ॥

श्वादेरितीति विकल्पमित्यर्थः तत्र वर्णग्रहणे सप्तमीनिर्देशात् तदादिविधिः। श्वागणिक इति· श्वगणाट्ठञ्जितिठञ्· तदन्तस्येति इञन्तस्य·
श्वाभस्त्रमिति· इञश्चेत्यण्· तन्निमित्तो वृद्धिप्रतिषेधः ऐजागमश्चाभिन्नकक्षत्वाद् इशक्य इञाश्रयेण प्रतिषेधे न निवारयितुमिति वच
नारम्भः॥ ॥उत्तर॥ ॥उत्तरस्याचामादेरित्यनुवृत्तेरुत्तरपदस्याचामादेर्वृद्धिर्वैदितव्या· ननु चावयवादृतोरित्यादौ अवयवादित्या
दिका पंचमी तत्रान्तरेणाप्युत्तरपदग्रहणमुत्तरपदस्यैव भविष्यतीत्यत आह॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

यत्रेति। आदिपदे नद्द्वाराः संध्यन्ते पूर्वपदस्य च अनुशतिकादीनां च देवताद्वन्द्वे चेत्येते तेषां ग्रहणं। एषु योगेषु पंचमीनिर्देशाभावात् सप्तम्यन्ताधि
कारेऽनयामाचामादेशो चो वृद्धिः स्यात् नोत्तरपदस्य वचनं तु निष्प्रयोजनार्थं स्यात् न एव प्रोष्ठपदानां नात्र प्रोष्ठपदानामेव ग्राम इति वचन सामर्थ्या
द्वा पूर्वपदस्यैवानाद्यचो वृद्धिविधानार्थं स्यात्। तस्मादेतदर्थमवश्यमधिकारः कर्तव्यः किं मिरनीयं पंचमीनिर्देशे ष्वस्यानुपयोग एव नेत्याह। पं
चमीनिर्देशेष्वपीति। द्वन्द्वमपदेशार्थमिति। उत्तरपदाधिकारे विहितायां वृद्धिरिति व्यपदेशो यथा स्यादित्येवमर्थमित्यर्थः। क्व पुनरेवं विधे
न व्यपदेशेन प्रयोजनमित्यत आह उत्तरपदवृद्धौ सर्वं चेत्यत्रेति। सर्वभासः सर्वकारकस्यादौ सा भवतीत्येवमर्थं तत्रैवमाश्रितं॥ ॥अवयवादृतोः॥

यत्र पंचमीनिर्देशो नास्ति जे प्रोष्ठपदानामित्येवमादौ तदर्थमुत्तरपदाधिकारः पंचमीनिर्देशेष्वपि विस्पष्टार्थं वृद्धे
र्व्यपदेशार्थं उत्तरपदवृद्धौ सर्वं चेत्युत्तरपदाधिकारे या वृद्धिरित्येवं विज्ञायते॥ ॥अवयवादृतोः॥ ॥अवयववा
चिन उत्तरस्य ऋतुवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः। पूर्ववार्षिकं अपर
हैमनं पूर्वं वर्षाणामपरं वर्षाणामिति एकदेशिसमासः तत्र भव इत्येतस्मिन्नर्थे वर्षाभ्यष्ठक् हेमंताच्च सर्वत्राण् च तल
लोपश्चेत्यण् प्रत्ययः। तत्र ऋतोर्वृद्धिमद्विधावयवादिति तदंतविधिः अवयवादिति किं पूर्वासु वर्षासु भवं पौर्व
वर्षिकं कालाट्ठञिति ठञ् अवयवपूर्वस्येव तदंतविधिर्नान्यस्य ४

॥ऋतोर्वृद्धिमद्विधावयवात्॥ ऋतोः ऋतुवाचिनः शब्दाद् वृद्धिमद्विधौ वृद्धिनिमित्ते प्रत्यये विधीयमाने तदंतविधिः अनुशासनादपि प्राप्त
यो भवतीत्यर्थः। किं सर्वत्रनेत्याह अवयवादिति। अवयववत्वान्नात्परो यदा ऋतुवचनस्तदेत्यर्थः। येत्ववयवानामितिष्ठी वहुवचनात्तं प
दं तितेषां न समीचीनोऽर्थः। तथा च सुसर्वार्द्धदिक्शब्देभ्य इति पंचम्या निर्देशात् पूर्वासु वर्षासु भव इति। तद्धितार्थ इति समासः। अन्ये त्वादि
कशब्दत्वाद्विशेषणसमासं मन्यंते। अथात्रापि तदंतविधिना वर्षाभ्यष्ठगेव कस्मान्न भवत्यत आह अवयवपूर्वस्येव हीति॥ ॥४॥ ॥

॰का॰प॰८॰२

७६

॥सुसर्वार्द्धात्॥ ॥जनपदवाचिन इति। तदन्तग्रहणं तु न भवति जनपदस्त्रेम इति येधात्। सुसर्वार्द्धेत्यादि जनपदवाचिनः शब्दस्यानन्तरप्रत्य
ये विधीयमाने तदन्तस्यापि ग्रहणं भवति यदि सुपञ्चालेभ्यः परः स भवतीत्यर्थः॥ ॥दिशोऽ॥ ॥पूर्वपाञ्चालक इति। तद्धितार्थे समासः। पौर्वपञ्चा
लक इति। अवयववाच्यत्र पूर्वशब्दः एकदेशिसमासात् वुञ्प्रत्ययः अदिक्शब्दत्वात् दिग्दृष्टि न भवति। यद्येवं वुञ्यपि न भवितव्यं अदिक्

॥सुसर्वार्द्धाज्जनपदस्य॥ ॥सुसर्व अर्द्ध इत्येतेभ्य उत्तरस्य जनपदवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति
किति च परतः सुपाञ्चालकः सर्वपाञ्चालकः अर्द्धपाञ्चालकः जनपदतदवध्योश्च अवृद्धादपि बहुवचनविषयात् इति वुञ्
सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्येति तदन्तविधिः॥ ॥दिशोऽमद्राणाम्॥ ॥दिग्वाचिन उत्तरस्य जनपदवाचिनो मद्रवर्जितस्याचामा
देरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः पूर्वपाञ्चालकः अपरपाञ्चालकः दक्षिणपाञ्चालकः पूर्ववत्तदन्तविधिः प्र
त्ययश्च। दिश इति किं पूर्वपञ्चालानां पूर्वपञ्चालाः तत्र भवः पौर्वपञ्चालकः अमद्राणामिति किं पौर्वमद्रः आपरमद्रः मद्रेभ्योऽञि
त्यञ्प्रत्ययः॥ ॥प्राचां ग्रामनगराणाम्॥ ॥प्राचां देशे ग्रामाणां नगराणां च दिश उत्तरेषामचामादेरचो वृद्धिर्भवति तद्धिते ञि
ति णिति किति च परतः॥ ग्रामाणां। पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः अपरैषुकामशमः पूर्वकार्ष्णमृत्तिकः अपरकार्ष्ण
मृत्तिकः नगराणां पूर्वस्मिन् पाटलिपुत्रे भवः पूर्वपाटलिपुत्रकः अपरपाटलिपुत्रकः पूर्वकान्यकुब्जः अपरकान्यकुब्जः ग्रामत्वा
देव नगराणामपि ग्रहणे सिद्धे भेदेन यदुभयोरुपादानं तत्संबन्धभेदप्रतिपत्त्यर्थं। दिक्पूर्वपदो हि समुदायः पूर्वेषुकामशम्या
दिर्ग्रामनामधेयं पाटलिपुत्रादिः उत्तरपदमेव नगरमाह। तत्र ग्रामग्रहणेन नगराणामपि ग्रहणे सति वाचिनां ग्रामनामधेय
वत्त्वात् दिक्शब्दादुत्तरस्य वृद्धिर्भवतीत्येवमभिसंबन्धः क्रियते इतरत्र तु दिश उत्तरेषां नगराणामित्येव॥

शब्दत्वादेव। अस्य त्वविशेषः सुसर्वार्द्धदिक्शब्देभ्य इति तदन्तविशेषणं बहुवचनं क्रियते दिशि दृष्टः शब्दो दिक्शब्द इत्येवं यथा विज्ञायेत वृद्धि
र्दिशो नु दिश इत्येतावदुच्यते। असमस्त एवं तमेव प्रस्तुत ग्रहणं पठन्ति॥ ॥प्राचाम्॥ ॥प्राचामिति नाचार्यनिर्देशः जनपदादिभिर्देशोः साहचर्यात्॥

एम॰
७६

॥३ ३॥ ॥८ ३॥ ॥

।पूर्वैषुकामशम इति। पूर्वा चासौ विषुकामशमी चेति दिक्संख्ये संज्ञायामिति समासः। ततो भवार्थे दिक्पूर्वपदादसंज्ञायां ञ इति ञ प्रत्ययः।
पूर्वपाटलिपुत्रक इति। पूर्ववत्समासः। रोपधेतोः प्राचामिति वुञ्। यद्यप्येकमेव यथा पाटलिपुत्रं तथापि पाटलिपुत्रस्यैकदेशे पाटलिपुत्रशब्द
स्य वृत्तेः पूर्वत्वविशेषणात् पुत्रकमेव। ञ नायत्र संति स ग्रामः ततश्च नगरमपि ग्रामः ये हि ग्रामे विषये तेषां ते साधीयस्तेन नगरेपि न क्रियंते
यथा ग्राम सोग्राम कुक्कुट इति सुतरां नगरेपि न भवन्ति ते ग्रामेनाप्येयमिति साधीयो नगरेपि नाधीयते शास्त्रेपि। उदीच्यग्रामाच्च बह्वचो
ऽन्तोदात्तात् वाहीकग्रामेभ्यश्च ठिक् शब्दा ग्रामजनपदाख्यानचानराटेषु नगरमपि गृह्यते तस्मादिहापि नार्थो नगरग्रहणेन स्यात् अत आह ग्रा
म लाटे चेति। सर्वं धमे दृष्टा निपत्स्यतीति। अंगस्येति प्रकृतं उत्तरपदस्येति च तत्र ग्रामाणामित्येतद्धेस्यप्यनेन संबध्यते ग्रामनगराणामिति नामांग

पूर्वैषुकामशम इत्येवमादिषु कृतायामुत्तरपदवृद्धौ एकादेशो भवती
ति ज्ञापितं नेन्द्रस्य परस्येति प्रतिषेधेन॥ ॥ ५ ॥ ॥ ७ ॥ ॥ ७ ॥

नामिति। नगराणामित्येतदुत्तरपदस्येत्यनेन नगरवाचिनामुत्तरपदानामिति न चायं संबन्धभेदः सह तु यात्ते ग्रामशब्दे संभवतीति
ग्रामनगरग्रहणं क्रियते तत्र दिक्पूर्वपदो हीसादिना संबन्धभेदः आश्रयणीयस्तत्र हेतुर्दर्शितः। तत्रैसादिना तु स एव संबन्धभेदः। इ
ह पूर्वैषुकामशम इति समसनाक्रियानन्तरं पूर्वोत्तरपदयोर्गुणः प्राप्नुवन्नन्तरङ्गः उत्तरपदवृद्धिस्तु पश्चादुत्पन्ने तद्धिते इत्यबहिरंगा
त्र गुणो हृते पूर्वोत्तरयोर्यथा भावाद्वृद्धिर्न प्राप्नोतीत्यन्तरङ्गत्वाद्वा बाह्यत्वादुभयत्र आश्रयणे प्रतिषिद्धः अत्र हि दिग्वाचि पूर्वपदमुत्तरप
दं च ग्रामपदमाश्रीयते तत्राह पूर्वैषुकामशम इत्येवमादिष्विति। यथा नेन्द्रस्य परस्येति ज्ञापकं तथा तत्रैव वक्ष्याम इति॥ ५ ॥ ॥
॥ ३ ॥ ॥ ३ ॥ ॥

।।संख्यायाः।। ।।संवत्सरश्च संख्या च संवत्सरसंख्यं समाहारद्वन्द्वः। द्विसांवत्सरिक इति। प्राग्वतेष्ठञ् तस्याध्यर्धपूर्वेति लुङ् न भवति अनार्ह
यत्वात्। द्विषाष्टिक इति। ननु च अधीष्टो भृत इत्यत्र कालादिति वर्त्तते तत्कथं द्विषष्ट्यादिशब्देभ्यः प्रत्ययः इत्यत आह द्विषष्ट्यादिशब्द इति। का
लवृत्तिः शब्दस्तत्र गृह्यते तेन मासादय एवेति भावः। ननु च परिमाणान्तस्यासंज्ञाशाणयोरित्यत्र परिच्छेदहेतुत्वमात्रं गृह्यते न त्वारोहपरि
णाह तच्च यो न मीयते तदेव प्रस्थादि अन्यथा शाणाम् इति प्रतिषेधोऽनर्थकः स्यात् कालस्यापि परिच्छेदहेतुर्भवत्येव ततश्च संवत्सरग्रहणम
नर्थकं परिमाणान्तस्येत्येव सिद्धत्वादित्यत आह संवत्सरग्रहणमिति। द्वैसमिक इति। अधीष्टादिषु समायाः खः द्विगोर्वेति पक्षे ठञ्। न केव

।।संख्यायाः संवत्सरसंख्यस्य च।। ।।संख्याया उत्तरपदस्य संवत्सरशब्दस्य संख्यायाश्च अचामादेरचः स्थाने वृद्धिर्भवति
तद्धिते ञिति णिति किति च परतः। द्वौ संवत्सरौ अधीष्टो भृतो भूतो भावी वा द्विसांवत्सरिकः त्रिसांवत्सरिकः संख्यायाः द्वे षष्टी अ
धीष्टो भृतो भूतो भावी वा। द्विषाष्टिकः द्विसाप्ततिकः द्विषष्ट्यादिशब्दः सर्वेषु संख्येयेषु वर्त्तमानः कालाधिकारविहितं
प्रत्ययमुत्पादयति। परिमाणान्तस्येत्येव सिद्धे संवत्सरग्रहणं परिमाणस्याग्रहणार्थं तेन द्वैसमिकः त्रैसमिकः इत्युत्तर
पदवृद्धिर्न भवति। द्विवर्षा। त्रिवर्षा माणविकेत्यपरिमाणविस्ताचितेति पर्युदासो न भवति।। ।।श्री४।। ।।छ।। ।।

लं वृद्धिविषयमेव ज्ञापकं किं तर्हि सार्वत्रिकमित्याह द्विवर्षा माणविकेति। द्वे वर्षे भूता इति पूर्ववट्ठञ् तस्य वर्षाल्लुक् चित्तवति नित्यमिति लु
क्। पर्युदासो न भवतीति। प्रतिषेधस्य। तेन प्रतिषेध एव भवति। अथ संख्याग्रहणं किमर्थं यावता संख्ययापि परिच्छिद्यते तत्र परिमाणान्त
स्येत्येव सिद्धं। केचिदाहुः। संख्याग्रहणमपि ज्ञापकार्थमेव परिमाणग्रहणेन संख्यापि न गृह्यत इति तथा च परिमाणविस्ताचितेत्यत्र वृ
त्तावुक्तं कालः संख्या च परिमाणं न भवति द्विवर्षा त्रिवर्षा द्विशता त्रिशतेति। अपर आह। शाणाच्छब्देन निमित्तभावेनानुमितिमं
कार्पितं मा बाधीति परिमाणान्तस्येति संख्याग्रहणं कृतमिति।। ।।

॥वर्षस्य॥ ॥यस्येत्याद्वियस्यपित्र्य ज्योतिगवर्षाद्दारभ्यत्रीणिवर्षाणिधान्यं भावितावत्तं कालं जीवनायपर्याप्तं स सोमयागेऽधिकारी नम्नन इत्यर्थः॥
गमर्हीतेर्हीति। वाक्यार्थात्तत्राभविष्यत्यानपदार्थ इत्यर्थः॥ द्विवार्षिको मनुष्य इति। वर्षाल्लुक् चित्तवति प्रिसमिति निल्लं लुक् भवति पटनार्थ एव
मद्दिश्यते अन्यत्र चित्तवत्सपि विकल्प एव॥ ॥परि॥ ॥द्विकौडविक इति कुडव प्रस्थपेकुडवः प्रस्थचतुर्थभाग इत्युणादिषु मुसन्निः कु
रपमिसेतरव्युत्पत्तिं शब्दान्तरं दृष्टं मततः प्राग्वतेष्ठञ् अनार्हीयत्वाद्धुगभावः॥ द्वाभ्यां सुवर्णाभ्यां मितिताशाणप्रतिषेधात्सिद्धित्तिमा

वर्षस्याभविष्यति॥ ॥संख्याया उत्तरपदस्य वर्षशब्दस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः सचेत्तद्धितो
भविष्यत्यर्थे न भवति। द्वे वर्षे अधीष्टो भृतो भूतो वा द्विवार्षिकः॥ अभविष्यतीति किं यस्य त्रैवार्षिकं धान्यं निहितं भृत्यवृत्तये। अधि
कं वापि विद्येत स सोमं पातुमर्हति। त्रीणि वर्षाणि भावीति त्रैवार्षिकं। अधीष्टभृतयोरभविष्यतीति प्रतिषेधो न भवति गम्यते
हि तत्र भविष्यत्ता न तु तद्धितार्थः। द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः॥ ॥परिमाणान्तस्यासंज्ञाशा
णयोः॥ ॥परिमाणान्तस्य संख्यायाः परं यदुत्तरपदं तस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः
संज्ञायां विषये शाणे चोत्तरपदे न भवति। द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः॥ द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकं वि
भाषाकार्षापणसहस्राभ्यामित्यत्र सुवर्णशतमानयोरुपसंख्यानमिति लुको विकल्पः। द्वाभ्यां निष्काभ्यां क्रीतं द्वित्रिपूर्वान्नि
ष्कात् द्विनैष्किकं। असंज्ञाशाणयोरिति किं पञ्च लोहितिकं पञ्च कलापिकं पञ्च लोहिन्यः परिमाणमस्य पञ्च कलापाः परि
माणमस्येति विगृह्य तदस्य परिमाणमिति योगविभागाट्ठक् प्रत्ययः तद्धितान्तस्यापि स तु द्वाय संज्ञा द्वाभ्यां शाणाभ्यां क्रीतं द्वै
शाणं शाणाद्वा द्वित्रिपूर्वाण्णा मर्त्येवेति अण् प्रत्ययः। असंज्ञाशाणकुलिजानामिति केचित्पठन्ति द्वैकुलिजे प्रयोजनम
स्य द्वैकुलिजिकः॥ ६॥ ॥श्री॥ ॥
घनमित्यपरिमाणं तेनोन्मानस्यापि भवति। लोहिनी गुञ्जा ताभिः पञ्चभिः परिमितमाकार विशेषयुक्तं द्रोणपञ्चलोहितिकं। कलापः को
शीधान्यविशेषः योगविभागेनेति। एवं सूत्रत्रिषु तदस्य परिमाणं संख्यायाः संज्ञेत्येकयोगेन न पठितव्या द्वाभ्यां तत्र योगविभागयोजनं
देवमुक्तं। तद्धितान्तस्यापमिति। पश्चात्तु अर्धपूर्वद्विगोरित्यत्र वार्त्तिकं न यथा तद्धितलुक् द्विगुसंतिसंज्ञेति तत्रैवावाचामादेशणाइत्यपघत्रे

गर्ग्यायणा॥ ॥सर्वस्यद्वे॥ संज्ञाच संवत्सरस्यैकस्य समाहारद्वन्द्वः। द्विसांवत्सरिक इति। प्राग्वतेष्ठञ् तस्य द्विगोर्लुगनपत्ये इति लुक्। भवति अनार्हीयि
त्वात्। द्विषाष्टिक इति। अनुतमधीष्टो भृतो भूतो भावी इति वर्तते तत्कथं द्विषष्ट्यादिभ्यो ऽपि प्रत्यय इत्यत आह। द्विषष्ट्यादि इत्यादि इति। कालस्य
प्तिः शब्दस्तत्र गम्यते नमासादयः एवेति भावः। ननु च परिमाणान्तस्यासंज्ञाशाणयोरित्यत्र परिशिष्टे इहेतु तत्त्वमात्रं गृह्यते न त्वारोहतत्वपरिणाम
॥ ॥जे प्रोष्ठ॥ ॥जइति जातार्थो निर्दिश्यत इति। उपलक्षणं जइत्यादौ ह्युत्तरपदैकदेशस्य प्रयोगः भीमसेनो भीम इतिवत्॥ ॥बहुवचननिर्देशादि

॥जे प्रोष्ठपदानां॥ ॥जइति जातार्थो निर्दिश्यते तत्र यस्तद्धितो विहितस्तस्मिन् ञिति णिति किति च परतः प्रोष्ठपदानामुत्तरप
दस्याचामादेरचो वृद्धिर्भवति प्रोष्ठपदानाम नक्षत्रं ताभिर्युक्तः कालः इत्यण् तस्य लुबविशेषे इति लुप्। प्रोष्ठपदासु जातः संधि
वेलाद्यृतुनक्षत्रेभ्यो ऽण्। प्रोष्ठपादो माणवकः॥ जइति किं। प्रोष्ठपदो मेघो भरणी मभिवर्षति। प्रोष्ठपदा नामेति बहुव
चननिर्देशात्पर्यायेभ्योपि गृह्यते भद्रपाद इति॥ ॥हृद्भगसिंध्वन्ते पूर्वपदस्य च॥ ॥हृत् भग सिंधु इत्येवमन्तेङ्गे पूर्वपदस्योत्तरपदस्य चाचामा
देरचो वृद्धिर्भवति तद्धिते ञिति णिति किति च परतः। सुहृदयस्येदं सौहार्दं सुहृदयस्य भावः सौहार्द्यं सुभगस्य भावः सौभाग्यं दौभा
ग्यं सुभगाया अपत्यं सौभागिनेयः दौर्भागिनेयः कल्याण्यादिषु सुभगा दुर्भगेति पठ्यते सुभगा मन्त्रे इति उद्गात्रादिषु पठ्यते तत
त्रोत्तरपदवृद्धिर्नेष्यते॰ महते सौभगाय छन्दसि सर्वविधीनां विकल्पितत्वात्॰ सक्तुप्रधाना सिंधवः सक्तुसिंधवः सक्तुसिं
धुषु भवः साक्तुसैंधवः सिंधुशब्दः कच्छादिषु पठ्यते तेन तदन्तविधिरिष्यत इत्यण्प्रत्ययः॥ ॥अनुशतिकादीनां च॥ ॥
अनुशतिक इत्येवमादीनां चाङ्गानां पूर्वपदस्य चोत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति णिति किति
च परतः अनुशतिकस्येदं आनुशातिकं अनुहोडेन चरति आनुहौडिकः॥

ति। पद्यपि ङ्णो तिषां बहुत्वाद्बहुवचनान्तः प्रोष्ठपदाशब्दस्तथापि तस्येव शब्दरूपापेक्षयात्रैकवचनं साध्यं मन्यते॥ ॥हृद्भगा। ॥सुहृद
इति। सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातितः सुहृच्छब्दः। पठ्यते सुहृदयस्येदमिति पाठः न तु हृदयस्य हृल्लेखेत्यादिना हृद्भावः। सौहा
र्दमिति। वाशोक ष्यञ् रोगेष्विति हृद्भावः। सिंधुर्जनपदः नदी वचनस्यापि ग्रहणं तथा समुद्रवचनस्यापि॥ ॥अनुशतिका॥ ॥
आनुशातिकमिति। शतेन कृतं शतिकं शलाचव्यन्ता वशत इति ठन् अनुगतः शतिकेन अनुशतिकः न तस्येदमित्यण्। आनुही

आनुसंवरणमिति। तत्र च दीयते कार्यं भववदित्यण्। आनुसांवत्सरिकमिति। बकचौ तो दानाद्वज। कुरुकतशब्दो गर्गादिः सार्वलौकि-
कमिति लोकसर्वलोकात्यञ्ठ। सार्वभौम इति सर्वभूमिपृथिवीभ्यामणञौ। प्रयोगाधिदेवाधिदेवाधिभूतेत्यध्यात्मादय ४। कुलरापाचेत।

अनुसंवरणे दीयते आनुसांवरणं। अनुसंवत्सरे दीयते आनुसांवत्सरिकं। अङ्गारवेणु नाम कश्चित्तस्यापत्यं आङ्गारवैणवः
असिहत्य तत्र भवं आसिहात्यं। असिहत्य इति केचित्पठन्ति तन्नो विमुक्तादित्वादण्। असिहत्यशब्दो मिन्नाये। तिआसिहा-
त्यः। असिहेति। केवमपरे पठन्ति। अस्यहेति प्रयोजनमस्य आसिहेतिकः ४ अतएव वचनाद्दस्य समुदायस्य प्रातिपदि-
कत्वं विभक्तेश्चालुक्। वध्योग इति विदादिः। तस्यापत्यं वाध्योगः। पुष्करसत् अनुहरत् एतौ बाह्वादिषु पठ्येते। पौष्करसादिः आ-
नुहारतिः। कुरुकतकौरुकात्यः। कुरुपञ्चालेषु भवः कौरुपाञ्चालः जनपदस्य पुरायो जनपदग्रहणेन नग्रहणमतदितिवुञ्नभव-
ति। उदकशुद्धस्यापत्यं औदकशौद्धिः ४ इहलोक ४ परलोक ४ तत्र भव ऐहलौकिकः पारलौकिकः लोकोत्तरपदस्य चेति ठञ्।
सर्वलोक ४ तत्र विदित इति सार्वलौकिकः ४ सर्वपुरुष एवेदं सार्वपौरुषं। सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः प्रयोग तत्र
भवः प्रायोगिकः ४ परस्त्रीया परस्त्रैणेयः कल्याण्यादीनामिनङ्। राजपुरुषात्ष्यञि राजपौरुष्यं ष्यञीति किं राजपुरुषस्यापत्यं
राजपुरुषायणिः उदीचां वृद्धादगोत्रादिति फिञ्। सूत्रनडस्यापत्यं सौत्रनाडिः आकृतिगणश्चायमिष्यते तेनेदमपि सिद्धं
भवति। अभिगममर्हति आभिगामिकः ४ अधिदेवे भवमाधिदैविकं आधिभौतिकं चतस्र एव विधाश्चातुर्वैध्यं स्वार्थे ष्य-
ञ्। अनुशतिक। अनुहोड। अनुसंवत्सर। अङ्गारवेणु। असिहत्य। वध्योग। पुष्करसत्। अनुहरत्। कुरुकत। कुरुपञ्चाल। उद-
कशुद्ध। इहलोक। परलोक। सर्वलोक। सर्वपुरुष। सर्वभूमि। प्रयोग। परस्त्री। राजपुरुषात्ष्यञि। सूत्रनड।। ७ ।। ।।४।।

नड इति। अपपाठोयं तत्र हि सिद्ध्यत्यग्रहणं कल्याण्यादिषु परस्त्रीशब्दः पठ्यते तस्मात्कल्याण्यादीनामिनङिति पाठः। चातुर्वर्ण्यादिस्वा-
र्थे ष्यञ्जन्तः पुनश्च तस्रो विधाश्चत्वारो वेदाः।। ७ ।। ।। ४ ४ ।। ।। ४ ४ ।। ।। ४ ४ ।। ।। ४ ४ ।। ।। ४ ।।

७का॰प॰८०२

७९

॥देवता॥ ॥अग्निवरुणौदेवताअस्यआग्निवारुणं अग्निमरुतौदेवताअस्यआग्निमारुतं इद्वृद्धाविमग्निशब्दस्य इत्त्वं योदेवताद्वंद्वस्तादियः सूक्तंभ
जते स्तुत्यतया ससूक्तसंबंधी। हविर्यस्मै निरूप्यते सहविः संबंधी। अर्थद्वारकं चेदं द्वंद्वस्य विशेषणं। स्कांदविशाखंइति साप्यदेवतेसएव। ब्राह्मप्रजा
पत्यमिति। पस्तुत्तरपदद्वारपः। ननु सामस्यदेवतेमत्रनजातिवचनो देवताशब्दः किंतर्हि यस्येह विनिरूप्यते याचामंत्र स्तुसासादेवता यतेनचैवंभूतोत्र
द्वंद्वार्थः। एवंभूतत्वेवाय यथा तद्धिताभवंतितथा यमपि विधिः प्राप्नोति। अत्राङुः तद्धितः क्वचिदन्यत्रापि भवति ज्ञात्देवतासज्ञः स्थालीपाक इतिहि

॥देवताद्वंद्वेच॥ ॥देवताद्वंद्वेच पूर्वपदस्योत्तरपदस्याचामादेरचः स्थाने वृद्धिर्भवतितद्धिते ञितिणितिकितिवापरतः।
आग्निवारुणीमनड्वाहीमालभेत। आग्निमारुतंकर्म। योदेवताद्वंद्वः सूक्तहविः संबंधी तत्रायंविधिरिष्यते नभवति स्कंदवि
शाखौदेवते स्यस्कांदविशाखः ब्रह्मप्रजापती ब्राह्मप्रजापत्यं॥ ॥नेंद्रस्यपरस्य॥ ॥इंद्रशब्दस्यपरस्य यदुक्तं तन्नभवति।
सौमेंद्रः। आग्नेंद्रः। परस्येतिकिं ऐंद्राग्नमेकादशकपालं निर्वपेत। इंद्रशब्दे द्वावचौ तत्र तद्धितेऽलस्तेस्यस्येतिलोपः।
अपरस्य पूर्वेणासहैकादेशस्तत्रानकार इंद्रशब्दः संपन्नः इस्यप्राप्तिरेववृद्धेः तत्रेदं प्रतिषेधवचनं ज्ञापकं बहिरंगमपि पूर्वो
त्तरपदयोः पूर्वकार्यंभवति पश्चादेकादेशः इति तेन पूर्वेषुकामशमरस्यादिसिद्धंभवति॥ ॥श्री॥ ॥श्री॥ ॥

मास्सेदृष्टमिति॥ ॥नेंद्रस्य॥ ॥आग्नेंद्रं सौमेंद्रमिति। अजाद्यदंतमिती द्रशब्दस्य पूर्वनिपातो नभवति प्राविकल्पात्तस्य। इंद्रशब्द इत्यादिइं
द्रश्चमरुच्चैतयोरेकमंत्रनानां तेनसह द्वंद्वे इंद्रशब्दस्य पूर्वनिपाते नभाव्यं यथा ऐंद्रामारुतीमेदकामालभेतेति। वाग्निंद्रावित्यादिकस्तुद्वंद्वः सूक्त
हविःसंबंधीनभवतीतिभावः॥ ॥छ छ॥ ॥छ॥ ॥छ छ॥ ॥छ॥ ॥छ॥ ॥छ छ॥ ॥छ॥ ॥छ॥ ॥

रा॰म॰

७९

॥ दीर्घात्॥ ॥ अत्रहीत्यादि। उदाहरणोषुदेवताद्वंद्वेचेत्यानङ्कृते दीर्घात्परो वरुणशब्दः॥ ॥ प्राचांना॥ ॥ प्राचांदेश इति। आचार्यग्रहणं
तन भवति उत्तरसूत्रे विभाषितमितिवचनात्॥ ॥ जंगल॥ ॥ जंगलं वनप्रायो देशः कुरुषु जंगलं कुरुजंगलं॥ धेनुर्नवप्रसूता विश्व

॥ दीर्घाच्चवरुणस्य॥ ॥ दीर्घाच्चवरुणस्य॥ दीर्घादुत्तरस्यवरुणस्यपदुक्तं तन्न भवति। ऐंद्रावरुणं मैत्रावरुणं दीर्घादि
ति किं। आग्निवारुणीमनड्वाहीमालभेत अत्र हि अग्नेरीदग्नेः सोमवरुणयोरित्येत्यानङपवादस्य इद्धावितिप्रतिषे
धो विधीयते तेन दीर्घात्परो न भवति॥ प्राचांनगरांते॥ ॥ प्राचीदेशेनगरांते गेपूर्वपदस्योत्तरपदस्य चामादेरचो वृद्धि
र्भवति जिति णिति किति वा परतः। सुह्मनगरे भवः सौह्मनागरः पौंड्रनागरः। प्राचामिति किं मद्रनगरमु
दक्षु तत्र भवः माद्रनागरः॥ ॥ जंगलधेनुवलजांतस्यविभाषितमुत्तरं॥ ॥ जंगलधेनुवलज इत्येवमंतस्यांगस्य
पूर्वपदस्य चामादेरचो वृद्धिर्भवति विभाषितमुत्तरं उत्तरपदस्य विभाषितां तद्धिते ञिति णिति किति वा परतः। कुरुजंगलेषु
भवं कौरुजंगलं कौरुजांगलं। वैश्वधेनवं वैश्वधैनवं। सौवर्णवलजः सौवर्णवालजः॥ ॥ अर्द्धात्परिमाणस्यपूर्व
स्य तु वा॥ ॥ अर्द्धशब्दात्परस्य परिमाणवाचिन उत्तरपदस्य चामादेरचः स्थाने वृद्धिर्भवति पूर्वस्य तु वा भवति तद्धिते ञि
ति णिति किति वा परतः। अर्द्धद्रोणेन क्रीतं आर्द्धद्रौणिकं अर्द्धकौडविकं आर्द्धकौडविकं॥ ८ ॥ गश्रीः॥ ॥

धां धेनुर्विश्वधेनुः। सुवर्णविकारो वलजं सौवर्णविलजं उत्तरमित्युत्तरपदं लक्ष्यते तस्य नित्यसंनिहितत्वात्तद्रूपेण विभाषितत्वमनुपपन्ने वि
भाषितवृद्धिकत्वाद्विभाषितमिति गौणेनादृश्य॥ ॥ अर्द्धात्॥ ॥ अर्द्धद्रौणिकमिति। प्राग्वतेष्ठञ् वा वचनमनर्थकं विभाषितमित्यनु
वृत्तेः। तत्रैवं वक्तव्यं पूर्वस्य तितिथा तु न कृतमित्येव॥ ८ ॥ ॥

।।नातः।। ।।आर्द्धप्रस्थिकमार्द्धकंसिकमिति। एवंविवृज्य। कंसादिठंस्तु न भवतीति तदन्तविधेरभावात्। प्राग्वतेः संख्यापूर्वपदानां तदन्तविधिर्न
चार्द्धशब्दः संख्यावाची। किंच स्यादिति। आकारो वृद्धिरेव तत्र सत्यपि तिवावृद्धिप्रतिषेधे नास्ति विशेष इति मन्यते। किं पुनः कारणं पुंवद्भावप्र
तिषेधो न स्यादित्यत आह यत्र हीति। तदुक्तं कुर्वद्भूयेनि मित्तशब्दो मुख्य इति। परस्येति किं। पूर्वस्य मा भूत्। अत इति विशेषणोपादानसामर्थ्या
त्पूर्वस्य न भविष्यतीति न हि पूर्वस्यार्द्धशब्दस्याकारान्तस्य वृद्धिर्भागास्ति। किंच। यदि पूर्वस्य प्रतिषेधः स्यात्पूर्वस्य तु वेत्येतदनर्थकं स्यात् इतं हि
प्रयोजनं तदन्तविधिर्मा भूदिति। अन्यथा अकारान्तस्योत्तरपदस्येत्येवं विज्ञायेत न तत्र को दोषः इह प्रतिषेधः स्यात्। आर्द्धद्रौणिकं आर्द्धकौडविके

।नातः परस्य।। ।।अर्द्धात्परस्य परिमाणाकारस्य वृद्धिर्न भवति पूर्वस्य तु वा भवति तद्धिते ञिति णिति किति वा परतः। अर्द्धप्रस्थि
को। आर्द्धप्रस्थिकं। अर्द्धकंसिकं आर्द्धकंसिकं। अत इति किं। आर्द्धकौडविकः। तपरकरणं किं। इह मा भूत्। अर्द्धखार्यां भवा आर्द्ध
खारी। किंच स्यात्। आर्द्धखारी भार्या अस्य। आर्द्धखारीभार्यः वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकार इति पुंवद्भावप्रतिषे
धो न स्यात् यत्र हि तद्धिः प्रतिषिध्यते स वृद्धिनिमित्तं न भवतीति पुंवद्भावेन प्रतिविध्यते यथा वैयाकरणीभार्या अस्य वै
याकरणभार्य इति।। ।।प्रवाहणस्य ढे।। ।।प्रवाहणस्य ढे परतः उत्तरपदस्याचामादेरचो वृद्धिर्भवति पूर्वस्य तु वा भवति।
प्रवाहणस्यापत्यं प्रावाहणेयः प्रवाहणेयः शुभ्रादिभ्यश्चेति ढक्प्रत्ययः।। ।।छ छ।। ।।छ।। ।।छ।। ।।

मिति। पूर्वस्य विधिरर्द्धमुष्टिना ह्रीत आर्द्धमौष्टिकः इत्यादौ चरितार्थः तस्मात्तदन्तविधिनिरासार्थं परस्येत्युक्तं।। ।।प्रवाहणस्य।। ।।प्रवाह
णशब्दस्य ढे परत उत्तरपदस्येति अधिकारो षष्ठी प्रावाहणशब्द अवयवभूतं यादुत्तरपदं तस्येत्यर्थः। ननु वृद्धिमदेवात्र स्वत एवोत्त
रपदं कस्मै प्रयोजनाय अस्य पुनर्वृद्धिर्विधीयते। उच्यते। यदा पूर्वपदे वृद्धिर्न भवति तदापि उत्तरपदेपि वृद्धिर्न स्यात् वृद्धिनिमित्तस्येति पुंव
द्भावप्रतिषेधो न स्यात् प्रवाहणेयीभार्य इति। मा भूदेवं जाते श्रेत्येवं भविष्यति गोत्रं च चरणैः सहेति जातित्वं एवं तर्हि एतज्ज्ञापयति अनित्योयं
प्रतिषेध इति तेन हास्तिनीनां समूहो हास्तिकमित्यत्र भस्याढ इति वा रकच्छसोश्चेति वा प्राप्तस्य पुंवद्भावस्य प्रतिषेधो न भव
ति। प्रवाहयतीति प्रवाहणः एयं ताङ्हेर्नघारेल्युः रोर्विभाषेति णत्वं।।

॥ तत्प्र॥ ॥ प्रवाहणोपि निर्दिष्टः एस्यपस्यैतदुज। प्रवाहणोपकमिति गोत्रचारणाद्वुञ्। किमर्थमिदमुच्यते यावता पूर्वेणैव विकल्प उक्तस्तत्र
दृष्टे निरवधिर्धर्मी पूर्वस्येति नैतदस्ति प्रयोजनं। इञाद्यिति मित्रायास्य अपि हेतुः इष्टिस्ततः एव विकल्पो बाधकोऽभविष्यति। इति हि परसप्तमीनानिमि
त्तसप्तमीति नान्यनिमित्तायाः अपि हेतुः इति। प्रतिषेधोऽनभ्यस्त एवातस्तमाद्बाध्यते तद्धितनिमित्तेति। अयमभिप्रायः यजुरुत्तरस्य वृद्धि
बाधित्वा विकल्पस्ताव्रत्ययस्तत्रः पश्चादिञादिरुत्पन्नः तन्निमित्ता च वृद्धिः प्राप्ता न च इदानीं निमित्तो विकल्पः पूर्वमेव प्रवृत्तत्वादाद्यस्य यो

॥ तत्प्रत्ययस्य च॥ ॥ प्रवाहणस्येति वर्त्तते नत्विति तत्प्रत्ययस्य प्रत्ययस्य परामर्शः ढक्प्रत्ययान्तस्य प्रवाहणशब्दस्य तद्धिते ञिति
णिति किति परतः उत्तरपदस्याचामादेरचो वृद्धिर्भवति पूर्वस्य तु वा प्रवाहणेय स्यापत्यं प्रावाहणेयिः प्रवाहणेयिः प्रावा
हणेयस्येति कर्त्तीपि। प्रावाहणेयकं प्रवाहणेयकं वा यत्तद्धितनिमित्ता वृद्धिः ढक्प्रत्ययेन विकल्पेन बाधितुमशक्ये तिसूत्रारम्भः॥
॥ नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानां॥ ॥ नञ उत्तरेषां शुचि ईश्वर क्षेत्रज्ञ कुशल निपुण इत्येतेषामचामादेरचो वृ
द्धिर्भवति पूर्वस्य तु वा भवति तद्धिते ञिति णिति किति वा परतः॥ शुचि। आशौचं अशौचं। ईश्वर। आनैश्वर्यं अनैश्वर्यं। क्षेत्र
ज्ञ। आक्षैत्रज्ञ्यं अक्षैत्रज्ञ्यं कुशल॥ आकौशलं अकौशलं अकौशलक अकौशकं। निपुण। आनैपुणं अनैपुणं। अत्र केचि
दाहुः इयं पूर्वपदस्य वृद्धिः प्राप्ते व विभाषा विधीयते नञ पूर्वात्तत्पुरुषादित्युक्तस्त्व भावप्रत्ययः प्रतिषिध्यते तत्र शुभ्मादिभ्य
एव प्रत्यये कृते पश्चान्नञ् समासे सति वृद्धिरनङ्गस्यापि वचनाद्भवतीति। तदपरे न मृष्यन्ते भाववचनादस्यो पिहितञ्दृत्तेर्व
द्धिनिमित्तमपस्यादिषु अर्थेषु नञ् समासात् एव विधीयते। बहुव्रीहेश्च नञ् समासात् भाववचनो ष्यञ् तत्रांगाधिकारोपमर्हनेनतु ६
भवत्येवेति। अक्षेत्रज्ञानीश्वरोत्तपुरुषावेव व्राह्मणादिषु पठ्यन्ते नञ् हस्ता व्यंभावे ष्यञ् भवति

॥ नञः॥ ॥ अप्राप्ते विधीयत इति। अप्राप्तिमेवोपपादयति। न नञ् पूर्वादिति। उत्तरो भाव प्रत्यय इति। त्वतलभ्यामुत्तरः ष्यञादिः
तत्रोत्तरो भावप्रत्ययः प्राप्नोतु नञ् समासात् शुभ्मादिभ्य एव विधेयः पश्चान्नञ् समासस्तत्र नञोगोनतत्तमकिटमासाह वृद्धिविधाप
नइति। तदपरइत्याहि। असति विषये णाधिकारउपमर्दः अस्ति च विषयः कः पुनरसौ भाववचनादस्यापत्यादिषु विहितः प्रत्ययः अ
त्याभिभाववचनेऽश्रद्धामोपिशाक्रतएवदर्शयितुमित्याह बहुव्रीहेश्चेति। उत्तरो भावप्रत्ययः प्रतिषिध्यतइत्येन दृष्यत्रेन सार्वत्रिकमपि
त्वाहृ अक्षेत्रज्ञेत्रज्ञेति। तदेवमङ्गाधिकारोनबाधनीयइतिस्थितं। एवं च तत्पुरुषादिप्रोक्ताभिव्यादिप्रयोगोपपत्तिः। दृशाहं प्रावमाझो

।।यथातथा।। ।।ब्राह्मणादिषु नञ्समासाभावे तौ द्रष्टव्याविति तेन ननञ्सूत्रीदिति ञ्मञः प्रतिषेधो न भवतीति भावः। यथासादृश्य इत्यव्ययीभाव
समासः इति। पदार्थानतिवृत्तौ। तथाभावमतिक्रान्तं यथातथं समुच्यते यद्वा अनुपुरस्य यथाभूतं यद्यपि न यथाभावमनतिक्रान्तं यथापुरस्मुच्यते किं
तु नत्वव्ययीभावत्वे प्रमाणमित्यत आह तथा हीति। भाष्ये त्विति। नहि द्वन्द्वत्वमकृत्वा विग्रहप्रदर्शनमव्ययीभावस्योपपद्यते। अयं योगः शक्यो
ऽवक्तुं कथं पदात्पूर्वपदस्य वृद्धिः नञ्समासोत्तरप्रत्ययः यदा तूत्तरपदस्य वृद्धिस्तदा ञ्णिते ननञ्समासः। स्वरे पि नास्ति विशेषः अव्ययपूर्वप
दप्रकृतिस्वरेणाद्युदात्तत्वात्। प्रत्ययान्तरं वान्तेन भवत्यनभिधानात्।। ।।हनस्तः।। ।।तद्धिते ञ्णितिनिवृत्त्यर्थमिति। धातोः स्वरूपग्रहणे तत्
।।यथातथयथापुरयोः पर्यायेण।। ।।यथातथयथापुर इत्येतयोर्नञ्उत्तरयोः पूर्वोत्तरपदयोः पर्यायेण वा आमादेश्चोवृद्धिर्भ
वति तद्धिते ञ्णिति णिति किति वा परतः। आयथातथ्यमयाथातथ्यं। आयथापुर्यमयाथापुर्यं। अयतथातथ्यमयथापुरेति
ब्राह्मणादिषु नञ्समासाभावे तौ द्रष्टव्यौ। सूत्रे यथातथयथा इति शब्दौ तु यथासादृश्य इत्यव्ययीभावसमासौ तथा च नपुंसकाः अयं द्वन्द्व
त्वं कृतं भाष्ये तु यथा दर्शितं अयथातथाभाव इति तथा पुस्तुयेति समासोल्लस्यते।। ।।हनस्तोचिण्णलोः।। ।।तद्धिते ञ्णिति निवृ
त्तं तत्त्वं वृद्धं किति तीत्यपि ञ्णितीति वर्तते हनस्तकारादेशो भवति ञ्णिति प्रत्यये परतः चिण्णलौ वर्जयित्वा घातयति घातकः सा
धुघाती घातं घातं घातो वर्तते। अचिण्णलोरिति किं अघानि जघान। धातोः कार्यमुच्यमानं धातुप्रत्यये विज्ञायत इतीह न भवति
वार्त्रघ्नः भ्रौणघ्न इति।। ।।आतो युक् चिण्कृतोः।। ।।आकारान्तस्याङ्गस्य चिणि कृति ञ्णिति युगागमो भवति। अदायि अधायि।
कृति दायो दायकः धायो धायकः चिण्कृतोरिति किं ददौ दधौ चोरिः बालाकिः चार्देवत्तास्य।।
प्रत्यये कार्यविज्ञानात्। तत्स्वरं दृकितीत्ययमिति। निवृत्तमित्यपेक्षते। ञ्णिद्ग्रहणं तु प्रत्ययमात्रेणासंबद्धमतस्तद्धिते ञ्णित्यस्मिन्निवृत्तेपि तद
नुवर्तत एव। उदाहरणे घुहो हन्तेर्ञ्णिन्निति कुत्वं।। ।।आतोयुक्।। ।।चिण्ग्रहणमनर्थकं दर्शितं दधाविति। ननु णल औत्वमत्र बा
धकं भविष्यति। अनवकाशा हि विधयो बाधका भवन्ति सावकाशं चौत्वं को वकाशो यदा उत्तमे णलि णित्वाभावः। एवं तर्हि चिण्णलोरित्यनुव
र्तिष्यते चिणि तु वचनाद्भविष्यतीति तत्राह चोरिः बालाकिरिति। बाल्हादित्वादिञ्। अत्र दाक्षादौ च रितार्थपस्येति लोपं बाधित्वा परत्वाद्युक्
स्यात्। अचामादेरित्यनुवर्तते न भविष्यति अत आह चार्देवत्तास्येति। आदिवत्त्वावस्त्रप्रसङ्गः किं च अचामादेरित्यनुवृत्तौ दरिद्रायक

॥ श्री ॥

॥नोदात्त॥ ॥उपदेशे उदात्त उदात्तोपदेशः अस्मादेव निपातनात्साधुः। किं चोक्तमिति। संनिहितस्य कस्यचिदप्रसंगात् अचः अत उपधा
याः इति वृद्धिरिति। चिण्णलुरुपजीवनार्थं तुन तद्वन्त रमि दमारब्ध। निपातनादनुमंतव्या विहतिः ये कालपाणिनीयो धातुपाठे अर्थनिर्दि
श इति पक्षे तेषामत्र संज्ञा पूर्वको विधिरनित्य इति वृद्ध्यभावः। शमीत मीति। शमिमष्टाभ्यो घिनुण् अत्र प्रत्ययस्वरेण तेस प्रतिषा
तु रनुदात्तः। शामको रामक इति। लित्स्वरेण तेभावप्रत्ययस्य प्रत्युदात्तः। अनाचमेरित्यलमिदमुच्यते इत्याह अवमिकमिचमीनामिति
वक्तव्यमिति। ध्रुवमुदितः श्लोकमुक्तो तीथमुच्यते। तत्र मन्त्रे आङ् पूर्वस्य पर्युदासः वा के तु कैव लस्येह तेनुवामो दाहरणमप्याङ्

॥नोदात्तोपदेशस्य मान्तस्यानाचमेः॥ ॥उदात्तोपदेशस्य मांतस्यांगस्याचामिवर्जितस्य चिणि कृति यदुक्तं तन्न
भवति किं चोक्तमत उपधाया इति वृद्धिः। अशमि अतमि अदमि। कृति खल्वपि शमकः तमकः दमकः ४ शमस्तमो
दमः। उदात्तोपदेशस्येति किं। यामको रामकः ४। कथमुद्यमोपरमो। अरउद्यमेयमउरमे इति निपातनादनुगंतव्यौ। उपदेश
ग्रहणं शमीदमीतमीत्यत्र यथा स्यादिह च मा भूत् यामको रामक इति। मांतस्येति किं चारकः पाठकः। अनाचमेरिति किं आ
चामकः ४ अवमिकमिचमीनामिति च वक्तव्यं वामः चामः आम इति कथं चौरादिकस्य णिचि वृद्धौ सत्यां भवति तत्र हि
मित्वं नास्ति नान्ये मितो हेताविति वचनात्। सूर्यविश्रामभूमिरित्येवमादिकं प्रयोगमन्याप्यमेव मन्यन्ते णिङ् कृतोरि
त्येव शशाम तताम॥ १० ॥ श्री ४॥ ॥

पूर्वस्येव दर्शितमात्रामे निरासपि। काम इति कमेरायादय आर्द्धधातुके वेति णिङ् मायय पक्षे घञ् वृद्धिः। णिचि वृद्धौ सत्यामिति। न हि त
त्राय प्रतिषेधः। णौ चीकृत्वान ननु च सत्यामपि वृद्धौ जनीजृष्क्नसुरंजोमंताश्चेति मित्वे सति तान्ह्रस्व इति ह्रस्वेन भाव्यमत आह अ
न्ये हीति। नान्ये मितो हेतावितीति। अहेतौ चुरादिणिणमनुक्तो तेभ्यो अमंतादयो मितो न भवंतीत्यर्थः। असाध्यमेव मन्यंत इति।
विश्रान्तिभूमिरिति रिपठितमसाध्यमित्यर्थः। तेन विश्रामं लभतामिंदुश्च शिथिलज्याबंधमस्मद्धनुरिति मा रम्योतं॥ ॥१०॥ ॥छ॥

॥जनि॥ ॥वधिः प्रकृत्यन्तरमिति॰ वध हिंसायामिति भूवादौ पाठात्॰ भक्षकश्चेदिति॰ यो हि मांसं क्रीत्वा भक्षयति तस्यापि हिंसानुषंगोऽस्तीत्येन द्
नेन प्रतिपाद्यते यथाह मनुः अनुमन्ता विशसिता निहन्ता क्रयविक्रयी॰ संस्कर्ता चोपहर्ता च खादकश्चेति घातका इति॰ हनादेशस्य त्विति॰
अवधिभवतादृश्युरित्यत्र॰ जाज्ञानन्तगर्भमिति॰ अन्यथेन परस्मैपदं अन्तर्भावितण्यर्थत्वात्सकर्मकत्वं॥ ॥अर्त्तिह्री॥ ॥ब्लीङ् वरणे क्नूयी
शब्दे क्ष्मायी विधूनने ऽदाहरणो वुपुगन्तलघूपधगुणः। द्वयोरपि ग्रहणमिति। विशेषानुपादानात्॰ रीरित्यपीति। यद्यपि स्रवणार्थः सानु
बंधकस्तथापि तस्यापि तस्याविग्रहणमाचार्यैः स्मर्यत इति भावः॰ पूर्वान्तकरणं नपाद्यच्छिकं किं तर्हि विवक्षितमित्याह पुकः पूर्वान्तकर

॥जनिवध्योश्च॥ ॥जनि वधि इत्येतयोश्च चिणि कृति चाञ्णिति यदुक्तं तन्न भवति। अजनि जनकः जनः अवधि वधकः वधः।
वधिः प्रकृत्यन्तरमहन्तं नान्तो हितस्याप्रतिषेधो विधीयते। भक्षकश्चेन्न विधेत वधको पि न विद्यत इति हि प्रयोगो दृश्यते
। हनादेशस्य तु हनादेशस्त्वदन्तत्वादेव वृद्धेरभावः। चिण्कृतो रित्येव जज्ञानं गर्भमसि हिमानमिद्रं॥ ॥अर्त्तिह्रीब्लीरी
क्नूयीक्ष्माय्यातां पुङ्णौ॥ ॥ सर्वे निरनुबन्धाः गृह्यन्तेतिवर्त्ति अर्त्ति ह्री ब्ली री क्नूयी क्ष्मायी इत्येतेषां आकारान्तानां च पु
गागमो भवति णौ परतः। अर्त्ति। अर्पयति। ह्री। ह्रेपयति। ब्ली। ब्लेपयति। री। रेपयति। क्नूयी। क्नोपयति। क्ष्मायी। क्ष्मापयति।
आकारान्तानां। दापयति धापयति। अर्त्तीति अगतिप्रापणयोः आगताविति द्वयोरपि धात्वोर्ग्रहणं॥ रीस्य पि रीगति
शोषणयोः रीङ् प्रस्रवणे इति। पुकः पूर्वान्तकरणमरीरिपदित्यत्रोपधाह्रस्वोपधायाः स्यादिति॥ ॥

णमिति। अरीरिपदिति। पदि पुनरीः पुक् स्यात्तस्याणिग्रहणात्सोपरतो परं गंन तस्याकारस्य उपधात्वं तिष्ठत्वे न स्यात् दोषोपलक्षणं चैतद्वास्तव अत्र स्या
दौ स्थोरनिरीतिरोरनिरीतिर्ऐलोपेनापहृते लात्वकारस्य श्रवणं न स्यात् नैष दोषः नहि लोपः सर्वापहारी अलोन्त्यस्येत्यन्त्यस्य लोपः। इह तर्हि
क्नोपयतीति उपधागुणः प्राप्नोति। लघोपिकः श्चित्तौ वात्र परत्वो मतिर्दृश्यते। पुगन्तस्य गुणो वा ओ वृद्धिः स्यादन्यथा यतः। यत्किलेदमुच्यते पु
ग्सन्निगुणविधौ पुगन्तग्रहणं न कर्त्तव्यं सार्वधातुकार्धधातुकयोरित्येव सिद्धत्वादिति तदप्याशास्त्रगदमात्रं यतः परादावप्यवश्यं पुगिगुणो
विधेयः अन्यथा वोज्ञातीति वृद्धिप्रसंगात्॥ ॥७॥ ॥

॥ शा छा ॥ ॥ पा ग्रहणादित्यादि · इष्टिरेवेयं लाक्षणिकत्वात्तद्रूपस्य लुगागमस्त्विति · यद्यपि पालयतीति रूपं पाल रक्षणाद्यस्यैव चुरादिगणे
तस्य पुनर्हेतुमत्यपि णिचि सिद्धं तथापि पातेः पुक्प्रापयतीति सामान्यमिति लुग्वचनं · धूञ् प्रीञोरिति · धूञ् कंपने प्रीञ् तर्पणे ज्ञातस्यानुकरणं तेन
न चैवादिकस्य नुग्भवति। एतेषामपि णेनुगागमो वक्ष्यमाणाच्च नुगागमः। कृतात्वानां ग्रहणमिति। आकारान्तानां पुकं विधाय तदनन्तरमा

॥ शा छा सा ह्वा व्ये वां पुक् ॥ ॥ शा छा सा ह्वा व्ये पा इत्येतेषामन्तानां णौ पुगागमो भवति णौ परतः। शा। निशाययति॥ छा।
अवच्छाययति। सा। अवसाययति। ह्वा। अवह्वाययति। व्या। संव्याययति। वे। वाययति। पा पाययति। पा ग्रहणाद्ये ओ वै शोषणे इ-
त्यस्यापि ग्रहणमिच्छन्ति। पा रक्षणे इत्यस्य लुग्विकरणत्वान्न भवति। लुगागमस्तु तस्य वक्ष्यमाणः पालयति। धूञ् प्रीञोर्नुग्वक्त-
व्यः। धूनयति प्रीणयति॥ एतेऽपि पूर्वोक्ता एव क्रियन्ते तेन नश्शीशपत् अपीपलत् अदूधुनत् अपिप्रिणत् इत्युपधाह्रस्व-
त्वं भवति। शा छा सा ह्वा व्ये पां कृतात्वानां ग्रहणं पुकः प्राप्तिमात्मनोऽनु किमेतस्यापि प्रापणे प्रयोजनं एतत् ...
शरण प्रतिपदोक्त परिभाषा नास्तीत्युपदिश्यते तेन नाज्ञापयति ज्ञापयतीत्येवमादि सिद्धं भवति॥ ॥ वो विधूनने जुक्॥ ॥ वा
इत्येतस्य विधूननेऽर्थे वर्त्तमानस्य जुगागमो भवति णौ परतः। पक्षेणोपवाजयति। विधूनन इति किं। आवापयति केशान्।
किमर्थं सूत्रं वज गतावित्यस्य सिद्धत्वात् वापयतीत्युदाहरणमिति पै ओ वै शोषणे इत्यस्यैतद्रूपं॥ ॥ ११ ॥ ॥ छ ॥ ॥

कारान्ते पुगन्त्यमाह्यो पुक् प्राप्तिरात्मनात्मा भवतीत्यभिप्रायः। एवमादीति · आदिशब्देन क्षापयति निज्ञापयति विलापयते मुण्डो विस्मापय-
ते प्रियमाचष्टे प्रापयतीत्यादेर्ग्रहणं॥ ॥ वो विधू॥ ॥ विधूनन इत्यपपाठे च निर्देशो लिंगं धूञो णौ नुग्भवतीति · वा इत्येतस्येति · वा गतिगं-
धनयोरित्यस्य · वज व्रज गतावित्यस्य णिचि रूपे वाजयतीति सिद्धत्वात् पुक्ष्ट इत्यर्थं जुको विधाने॥ ॥ ११ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३ ३ ॥ ॥ ३ ३ ॥ ॥

७का॰प१०२

८३

॥लीलो॥ ॥स्नेहो घृतादिः तस्य विपातनं विगाछत्तः काठिन्यं त्यजतः प्रयोजकव्यापारः स्नेहविपातनं काठिन्यमुपगतस्याग्नेर्निष्टपनादिना द्रव
त्वापादनमित्यर्थः॥ न तु कृतात्वस्येति॰ एकदेशविकृतस्यानन्यत्वात्प्रसंगः॥ जटाभिरालापयत इति॰ लियः संमाननाभिशालीनीकरणयोश्चेत्यात्म
नेपदं॰ लीङिति लीलीङोर्ग्रहणमिति॰ क्रैयादिकदैवादिकयोः निरनुबंधकपरिभाषा तु नेष्यते॰ कृतात्वस्य च लीयतेरिति ग्रहणमित्यस्य

॥लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने॥ ॥लीला इत्येतयोर्णौ नुग्लुकावागमौ भवतो णौ परतः स्नेहविपातनेर्थे। घृतं विलीनयति घृतं विलापयति विलालयति विलाययति। लीई इति कारः प्रश्लिष्यते तेन ईकारान्तस्यैव नुग्भवति न तु कृतात्वस्य विभाषा लीयतेरिति। स्नेहविपातन इति किं जटाभिरालापयते। लीङिति लीलीङो ग्रहणं ला इति लातेः कृतात्वस्य च लीयतेः॥ ॥भियो हेतुभये षुक्॥ ॥भी इत्येतस्य हेतुभयेर्थे षुगागमो भवति णौ परतः। मुण्डो भीषयते जटिलो भीषयते। अत्रापि भी ई इति ईकारप्रश्लेषः कृतात्वस्य षुङ्॰ ह्रस्वार्थो दृष्टव्यः मुंडो भापयत इत्येव हि त्र भवति। हेतुभय इति किं कुंचिकयैनं भाययति। नात्र हेतुः प्रयोजको भयकारणं किं तर्हि कुंचिका॥ ॥स्फायो वः॥ ॥ स्फाय इत्येतस्याङ्गस्य वकारादेशो भवति णौ परतः। स्फावयति॥ ॥शदेरगतौ तः॥ ॥शदेरङ्गस्यागतावर्थे वर्त्तमानस्य तकारादेशो भवति णौ परतः। पुष्पाणि शातयति फलानि शातयति। अगताविति किं गाः शादयति गोपालः॥ ॥रुहः पोन्यतरस्यां॥ ॥रुहेरङ्गस्यान्यतरस्यां पकारादेशो भवति णौ परतः। व्रीहीन्रोपयति व्रीहीन्रोहयति॥ ॥छ॥ ॥

रामं॰ ८३

ति॥ ॥भियो॥ ॥हेतुः पारिभाषिकः भीर्यं यद्धेतोर्भयं येन भयं तत्र वर्त्तमानस्य॰ भीषयत इति॰ भीस्म्योर्हेतुभय इत्यात्मनेपदं॰ भापयत इति॰ वि
भेतेर्हेतुभय आत्वं॥ ॥रुहः॥ ॥अयं योगः शक्यो ऽवक्तुं कथं रुपमोहन इति द्विगरौ पठ्यते स एवं तत्र जन्म निवर्त्यिष्यते अनेकार्थ
त्वाद्धातूनां तस्य रोपयतीति रुहेस्त्वारोहयतीति॥ ॥

॥प्रत्यय॥ ॥अत्र यदि कारिका कारो विवक्षितः स्यात् एतिकाश्चरतीत्यत्रेत्वं न स्यात् एतदेकचिज्ञामित्यत्रापि घत्वे टापि च न रूपं अकचो ह्यसौ कारश्
चारणार्थः नञनर्थकार्थः भिंधकि छिंधकि इत्यादेर्भि छि प्रसंगात् ततश्च कशब्दस्याभावादेतिकादीत्यत्र न स्यादेव न यासयो रिति च प्रति
षेधः संघातग्रहणेनार्थकस्य स्यात् तस्मादुच्चारणार्थः कारो वर्णमात्रमेव विवक्षितमित्याह प्रत्ययस्थात् ककारादिति सचेदिति सचेदाप्सु
पः परस्तान्न भवतीत्येतदित्यर्थः प्रत्ययग्रहणपरिभाषया सुबन्तादिति द्रष्टव्यं जटिलिका मुण्डिकेति एवं ताभ्यामुच्चालादिषु प्राणिवालकः

॥प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः॥ ॥प्रत्ययस्थात्ककारात्पूर्वस्याकारस्य इकारादेशो भवत्यापि परतः सचेदाप्सु
पः परो न भवति। जटिलिका मुण्डिका कारिका हारिका एतिकाश्चरति। प्रत्ययग्रहणं किं शक्नोतीति शका। स्थग्रहणं विस्प
ष्टार्थं ककारमात्रं हि प्रत्ययो नास्ति सामर्थ्यात्प्रत्ययस्य ग्रहणं शक्यते विज्ञातुं कादिति किं नन्दना रमणा। पूर्वस्येति किं प
रस्य मा भूत् पटुका मृदुका। अत इति किं गोका नौका। तपरकरणं किं राका धाका। आपीति किं कारकः हारकः॥ १४ ॥

कोणाइति द्रष्टव्यं तत्र तपरत्वं पद्यप्ययमकारो लाक्षणिकः तथाप्युदीचामातः स्थाने इति लिंगात्तस्यापि भवति ककारमात्रं हीति उक्तमिदं
कादिति वर्णमात्रं विवक्षितमिति न ककारमात्रं कश्चित्प्रत्ययोऽस्ति स्मात्कात्प्रत्ययादिषु च्यमानेऽपि प्रत्ययावयवे प्रत्ययशब्दो वर्तिष्यत इति किं
स्थग्रहणेनेत्यर्थः पटुका मृदुकेति पटुमृदुशब्दाभ्यां स्वार्थवृत्तिभ्यां के कृते टाप् असति पूर्वग्रहणे तस्मादित्युत्तरस्येति कारस्यैवाका
रस्य वा स्यात् दृशां बलीयस्त्वे कादेशं बाधित्वा इत्वं स्यात् यद्यपि जटिलिका मुण्डिकेत्यादावेवायं प्रसंगः शक्योऽदर्शयितुं तथापि विस्पष्टार्थमुदाह
रणान्तरमुपन्यस्तं राका धाराबलिकलिम्पकः॥ १४ ॥ ७ ॥ ॥७॥ ॥

७का॰ ५२०२

८४

॥अथापीत्यनेन किं विशेष्यत इति । ककारः प्रत्ययो वेति संदेहात्प्रश्नः । ककार इति । प्रत्यये तु विशेष्यमाणे ऽथ कथ्यादि ष्वति संप्रग इति भावः
पद्यापि प्रत्ययेऽपि श्रुतस्तथापि तस्योपसर्जनत्वात्ककार एव विशेष्यते । कास्विकेत्यत्रापि न स्यादिति । अतिप्रसंगात्तिष्ठतु तावत् इष्टमपि न
सिध्यतीत्यपि शब्दस्यार्थः । आपि परतोपः ककार इत्येवं विज्ञायमाने काश्किेत्यपि न स्यात् । अकारादेशस्य यो द्वितीयो ककारस्तेन व्यवधाना
त् । वचनाद्व्यवधानमीदृशमिति । आश्रीयत इति वक्ष्यमाणेन संबन्धः । ईदृशमित्येतदाचष्टे स्थानिवद्भावकृतमिति । एकेन वर्णेनेत्युपल

॥अथापीत्यनेन किं विशेष्यते ककारः पद्येवं कारिकोऽस्यत्रापि न प्राप्नोतीत्यकारेण व्यवहितत्वात् एकादेशे
कृते नास्ति व्यवधानं एकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यवधानमेव । वचनाद्व्यवधानमीदृशं यत्स्थानि
वद्भावकृतमेकवर्णेन तदाश्रीयते ॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

क्षणं स्थानिवद्भावकृतमित्येतावति तात्पर्यम् । अन्यथा एति केत्यत्र द्वाभ्यामकाराभ्यां व्यवधानादित्वं न स्यात् । एक एतदः संबन्धी द्वितीयस्त्वेद
दीनामद्लकारः । तत्राकारयोर्यः पररूपमेकादेशः यश्चाटापा सह दीर्घः । द्वयोरपि तयोः स्थानिवद्भावः ॥ अम्येताड्ढ्वः ॥ अत्रापि टापा सह य एका
देशस्तस्यैव स्थानिवद्भावः न त्वकारयोः कृतस्य पररूपस्य ककारसहस्य लक्षणस्य चरितार्थत्वात् तेनात्राप्येकेनैव व्यवधानमिति । वच
नाद्व्यवधानेऽपि भविष्यतीति विक्रमे ईदृशं व्यवधानमिति युक्तं तस्याश्रावर्णस्य दृष्टापत्तिः ॥ ॥छ छ॥ ॥छ छ॥ ॥ ॥

रा॰म॰

८४

एथकधादिष्विति। एथानां समूह एथकधा इति त्रिकाधकस्था। आदिशब्दे नागर्भिकात्स्यादेर्ग्रहणं। गार्गीमिछसात्मन इति काप्यजंताद्प्रत्ययादि
त्वकारप्रत्ययः। ततष्टाप्। एतदुक्तं भवति। आयीति समस्य अयादानंतर्यमुपात्तं तन्नात्र तायत्स्मते किं तु यावत्संभवमाश्रीयत इति। सुबंताद्
यं परिव्राजकशब्दादिति। प्रत्ययलक्षणेन सुबंतत्वं। पर्युदासे हीति। सुपो ऽसुप् तत्तश्चेदा प्र पर इत्याश्रीयमाणे अस्सर्थः। समुदायादसुबं

एथकधादिषु तु अस्मृतिकृतमनेकेन वर्णेन व्यवधानमिति। त्वं न भवति। असुप इति किं। बहवः परिव्राजका अस्यां मथु
रायां बहुपरिव्राजका मथुरा। सुबंतादयं परिव्राजकशब्दात्परस्य आबिति प्रतिषेधो भवति। प्रसज्यप्रतिषेधश्चायं न पर्यु
दासः। पर्युदासे हि सति समुदायादसुबंतात्परस्य आबिति इत्वमत्र स्यादेव। अविद्यमानः सुब् यस्मिन्सोऽयमसुबिति ए
वमपि नाश्रीयते तथा हि सति बहुचर्मिके सत्रापि न स्यात्। मामकनरकयोरुपसंख्यानं कर्तव्यमप्रत्ययस्थत्वा
त्। ममेयं मामिका। अणि ममकादेशः केवलमामकेति नियमात्संज्ञाछंदसोरीकारो नान्यत्र तेनाणप्रत्ययांताद्
पि टाप् भवति। नरान्कायतीति नरिका। प्रतिषेधे त्यकन उपसंख्यानं उदीचामातः स्थाने यकपूर्वाया इति वि
कल्पो मा भूदिति दाक्षिणात्यिका इहत्यिका॥ १३ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

तादिति। अवयवात्परिव्राजकशब्दात्तु बुसल्लोन समुदायादिति तस्या सुबंतत्वं। एवमपि नाश्रीयत इति बहुव्रीहिरपि नाश्रीयत इत्यर्
थः॥ ॥ किं कारणमित्यत आह तथा हीति। बहुचर्मिकेति। बहूनि चर्माणि अस्यामिति बहुव्रीहिः शेषाद्विभाषेति कप्। तस्मिन्नुत्पन्ने तस्मिन्नात्र
सुबंतात्परष्टाप् भवति कपा व्यवहितत्वात्। मामिकेति। ममेयमिति अणि नवक ममकावेकवचन इति ममकादेशः। दाक्षिणात्यिकेति
दक्षिणा दाचात् दक्षिणात्। ततो भवार्थे दक्षिणापश्चात्पुरसस्त्यक्। इहत्यिकेति। अव्ययात्त्यप्॥ १३॥

७का·प८२
८५

॥ नयाः ॥ ॥ पूर्वेणानित्यमिति प्राप्ते प्रतिषेधोयमुच्यते। प्राप्तिपूर्वकत्वात्प्रतिषेधस्य यदा पत्नदोरकं भवति तदा प्रतिषेधः। यकासकेति। यत्नदोरकं च मौत्स
स घलेटाश पासेति प्रथमैकवचनांतयो रूपयो टानाक्षिप्त कोलतरे प्रतिषेधो न स्मादित्सत आह यासेति निर्देशो नतंतमिति पत्नदोरूपलक्षणमिति।
यधेवं यत्नदोरित्ये वक्तव्यं सत्यं तथा तु न हृतं किं कुर्मः। यकां यकामधीमह इति। अवगाथ्यांका। तकां तकांयचामहा इति। ओषधीशाकिनीकां
। द्वावेतौ प्रयोगौ। उपत्यकेति। उपाधिभ्यां त्यकन्नासन्नारूढयोः॥ अत्र कश्चिदाह त्यकन्नित विषयोयं सककन् प्रत्ययांतस्ततश्च प्रक्रिपाला घवापसिक
लितिककन्मेत्यकनिककन्मेत्यकन्नित्यकरोचारणसामर्थ्यादित्वाभावइति। तदयुक्तं। पंचभिरूपत्यकाभिः क्रीतः पंचोपत्यकः इत्यादावाहीर्यस्य
कोश्च इत्येवेति लुकि कृते लुक्तद्धितलुकीतिरायो लुकि निमित्ताभावादित्वं न स्यादिति तद्धितलुगर्थमेतत्स्यात्। बहिरंगोलुक् अंतरंगमित्वं·

॥ न यासयोः॥ ॥ यासा इत्येतयो रिकारादेशो न भवति। यकासकाः यासा इति निर्देशो नतंतं यत्नदोरूपलक्षणमेतत्। इहापि प्रतिषे
धः उच्यते यकां यकामधीमहे तकां तकांयचामर इति। यत्नदोः अत्नदोः प्रतिषेधेत्यनकन उपसंख्यानं। उपत्यका। इत्यका। पावकादी
नां छंदस्युपसंख्यानं। हिरण्यवर्णाः शुचयः पावकाः यासु अलोमकाः छंदसीति किं पावकिका। आशिषि वोपसंख्यानं जीवतात् जी
वका नंदतात् नंदका भवतात् भवका। उत्तरपदलोपे चोपसंख्यानं देवदत्तिका देवका यज्ञदत्तिका यज्ञका। क्षिपकादीनां चोपसंख्या
नं क्षिपका ध्रुवका· तारका ज्योतिषि उपसंख्यानं तारका· ज्योतिषीति किं तारिका दासी· वर्णका तांतव उपसंख्यानं वर्णका· तांत
व इति किं वर्णिका भागुरी लोकायतस्य· वर्त्तका शकुनौ प्राचामुपसंख्यानं वर्त्तका शकुनिः प्राचां· उदीचां तु वर्त्तिका· शकुनाविति किं
वार्त्तिका भागुरी लोकायतस्य· अष्टका पितृदेवत्ये अष्टका०॥

अंतरंगानपि विधीन् बहिरंगो लुग्बाधते· ननु च धोः सुपो धातुप्रातिपदिकयोरित्येतद् द्विषयमेतत्· नेत्याह यश्च यावाश्च लुग्नाम समवेष्यंतरं
गान्विधीन्बाधते तयथा सनीस्रंसस्यादेशेन लोपो न भवति· पंचरवट्वइत्यादौ टाप्समहैकादेशो न भवति यदि स्यात्तदा द्विवृद्धा दाप्रग्रहणा
न्याहणाद्वृद्धिः सति अकारोत्र न श्रूयेत। पावकाः इति पुनं तिपावयंतीति पावकाः· अलोमकेति· बहुव्रीहेः कप्· जीवकेति· आशिषि चे
ति वुन्· देवकेति· देवदत्तशब्दात् अनुकंपायां कन्। अत्र जातौ च विभाषा लोपो वक्तव्य इति दत्तशब्दस्य लोपः क्षिपकेति· क्षिपेः इगुपधा
त्कः ध्रुवगतिस्थैर्ययोः पचाद्यच् कुटादित्वाद्गुणाभावे उवङ्· उभाभ्यामज्ञातादिषु प्रागिवात्कः॥ तरतेर्ण्वुल् तारका· वर्णयतेर्महत्वादि
कं गुणाभिति वर्णकाप्रावरविशेषः तंतूनां विकारस्तांतवं औरजा वर्णिकेति भागुरी· भागुरी टीका विशेषः। वृतेर्ण्वुल् तरा वुल् वर्तिकेति·
अश्नोतेर्दीर्घत्वात्णा ओदन मपणौ मित्यष्टका· इष्याशिष्यांतक न्निति तकन्· पितरश्च ताश्च पितृदेवताः तदर्थं कर्म पितृदैवत्यं देवतांताता

॥ ॥
राम०
८५

अष्टिकेति· अष्टौ परिमाणमस्याः संख्यायाः अतिशदन्तायाः कन्· सूतकेति· न सामिवचनइति प्रतिषेधेन ज्ञापितः स्वार्थिकः कन्· पुत्रिकेति· शार्ङ्ग
रवादित्वान्ङीन् ततः स्वार्थिकः कन् केणः इति ह्रस्वः ककारः तस्य पक्षे अत्वं विधीयते· वृन्दारिकेति· शृङ्गवृन्दाभ्यामारकन् वक्त० आरकन्॥ ॥
उदीचां॥ ॥यकौपूर्वौ यस्याः सा यकपूर्वा कोस्य पदार्थः आकारः अर्थाज्ञातः स्त्रीत्वं शब्दे समारोप्य स्त्रीलिंगनिर्देशः पूर्वशब्दोव्यवस्थावचनः इ
भ्यिकेति· इभमर्हतीति दण्डादिभ्यो यः इभ्यास्ततः पूर्ववत्क४ ह्रस्वत्वं च चटकमूषकशब्दाभ्यां मजादित्वाट्टाप्· सांकाश्यिकेति· संकाशेन निर्वृत्तं सां

पिमस्येवस्य इति किं अष्टिका खारी· वा सूतकापुत्रकावृन्दारकाणामुपसंख्यानं· सूतका सूतिका· पुत्रका पुत्रिका· वृन्दारका वृन्दा
रिका॥ ॥उदीचामातः स्थानेयकपूर्वायाः॥ ॥उदीचामाचार्याणां मतेनातः स्थाने यकारपूर्वायाः ककारपूर्वायाश्चाणोकारस्त
स्य स्थाने इकारादेशो न भवति उदीचां ग्रहणं विकल्पार्थं· इभ्यका इभ्यिका· क्षत्रियका क्षत्रियिका· कारपूर्वायाः चटकका चट
किका· मूषिकका मूषिकिका· आत इति किं सांकाश्ये भवा सांकाश्यिका स्थानीग्रहणमनुवादेपि स्थानिसंबन्धप्रतिपत्त
र्थं· आत इत्यनेन न स्यादिति स्थानी विशेष्यते· यकपूर्वाया इति किं अश्वा अश्विका· यकपूर्वाया इति स्त्रीलिंगनिर्देशा
नः स्त्रीप्रत्ययस्य प्रतिपत्त्यर्थं इह मा भूत् शुभं यातीति शुभंयाः शुभंयिका· यकपूर्वत्वे धात्वंतप्रतिषेधः धात्वंतयोर्यकाके
कारयोरेषप्रतिषेधस्य प्रतिषेधो वक्तव्यः सुनयिका सुशयिका· सुपाकिका अशोकिका॥ १४॥

काश्ये संकाशादिभ्यो ण्यः ततो भवार्थे धन्वयोपधाद्वुञितिवुञ्· स्थानग्रहणमनर्थकं षष्ठी स्थानेयोगेति सिद्धत्वादित्यत आह स्थानग्र
हणमित्यादि· परिभाषायाविप्रविषेषत्वादनुवादेउपस्थानेन स्यादितिभावः। अनुवादत्वमेवस्पष्टयति· आत इत्यनेन हीति· आतो
यो कारस्तस्ये त्वं भवतीति वचनव्यक्तौ नाकारस्य विधिप्रसर्गः कश्चिदस्तीत्यर्थः। स्त्रीप्रत्ययप्रतिपत्त्यर्थ इति· यः स्त्रियामित्यधिकृत्य वि
हितस्टाबादिः सस्त्रीप्रत्ययः तस्य प्रतिपत्तिर्यथा स्यादित्येवमर्थमित्यर्थः अस्तिहिस्त्रीलिंगोयः कश्चनाकारोयत्रस्येति· शुभंयातिभद्रं
यातीति क्विप् शुभं भद्रमिति मकारान्तो निपातस्तितोर्वविर्त्कोऽह्नस्वत्वं· प्रतिषेधस्यप्रतिषेध इति तेन विधिरेव भवति· सुनयतीति पिका सुशयिके
ति· नीशीभ्यामेरच् सुशब्देन बहुव्रीहिः टाबादिः पूर्ववत्· सुपाकिका सुशोकिकेति· पचिशुचिभ्यां घञ् चजोः कुघिण्यतोरिति कुत्वं शेषं पूर्व
वत्॥ १५॥ ॥

७का-पट-२

८६

।।भस्त्रैषा।। ।।स्वार्तिषट्पाः स्यात् निग्रथमा एषेति कृतषत्वनिर्देशात् अत्र तत्थ्याव एतिकाच्चरंतीति जसि निसमित्वमुद्दात् तं अत्रातः स्यात् नङ्पेततस्वश
द्वस्यावि शेषणं संभवव्यभिचारौ हि तत्र मतः काकवोः सतोः द्योतटोः संभवो नास्तिना मत्रव्यभिचारिता सर्वनाम्नः स्वशब्दस्य ते न नार्थं विधिर्भविता द्वके
इति। द्विकिशब्दाद्विवचनेस द्वाघत्वे टापि अः ओः ः शीभावः। तस्यां मत्यामिति। समासार्थं तु यानि भक्तिस्तस्या त्यदाद्यत्वे न भवत्यं तरंगा न पि विधी न्याहिरं
गो लुग्वाधतः इति वचनात्।। ।।सोंतर्वर्त्तिन्या विभक्त्या सुबंतात्स्य रूति। प्रत्ययलक्षणे न सुबंतत्वात् स्वशब्दोपि तद्धीन ये वच्छान नञ्पूर्वे नप्रयोजयेद् इत्यत

।।भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि।। ।।भस्त्रा एषा अजा ज्ञा द्वा स्वा इत्येतेषां नञ्पूर्वाणामनञ्पूर्वाणामपि इत्वं न भवति उदीचामाचार्याणां
मतेन। भस्त्रका भस्त्रिका। अभस्त्रका अभस्त्रिका। एषका एषिका। अजका अजिका। अनजका अनजिका। ज्ञका ज्ञिका अज्ञका
अज्ञिका। द्वके द्विके। स्वका स्विका। एषाद्वे न नञ्पूर्वे न प्रयोजयतः। किं कारणं तत्र हि यदि समासः क्रिय्यते नञ्समासः अथापि कृते समासे पश्चा
दकच् तथापि समासाद्याविभक्तिः तस्य घटेत स्यात् त्यदाद्यत्वे सति टापा भवितव्यं सोंतर्वर्त्तिन्या विभक्त्या सुबंतात्स्य इतिइत्वस्य प्राप्ति
रेव नास्ति तेन अनेषका अद्वके इत्येव नित्यं भवितव्यं। स्वशब्दस्तु ज्ञातिधनाख्यायां नञ्पूर्वोपि प्रयोजयति। भस्त्रेत्यत्र मभाषित
पुंस्कत्तस्या भाषितपुंस्काच्चेत्येव सिद्धे यदिह ग्रहणं तदुपसर्जनार्थं अविद्यमाना भस्त्रा अस्याः सा अभस्त्रा अल्पा अभस्त्रा अभ
स्त्रका अभस्त्रिका।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।।

आत्मवशब्दा स्वितिति। स्वशब्दो हि स्वमज्ञातिधनाख्यायामिति वचनाद् ज्ञातिधनयोरसर्वनामसंज्ञकस्तेन तस्मात् कप्रत्यये तेवुभवितव्यं नाक
चा तत्र पदद्वानेज् समासे कप्रत्ययः क्रियते तथंतात् वयपूतरासौ सुपः पते न भवति के नव्यवहितत्वात्। तेनासर्वनामसंज्ञकः स्वशब्दो नञ्पूर्वोपि भव
त्येव प्रयोजकः। अभस्त्रका अभस्त्रिकेति। अल्पार्थेति प्रागिवात्कः। असति तु भस्त्राग्रहणे यथा न सिध्यति तथा दर्शयति।। ।।छ।। ।।छ।।

।।३ ३।। ।।३ ३।। ।।३ ३।। ।।

राम०

८६

अत्रेति। बहुव्रीहिः पुंस्यपि वर्त्तते अमस्त्वः पुरुष इति। विहितग्रहणेनैतद्दर्शयति यद्यप्यभाषितपुंस्काद्गस्त्वाशब्दात्परो भवति तथापि न स्माद्वि
हितो न भवति। विहितविशेषणं चोत्तरत्राभाषितपुंस्काद्ग्रहणं अन्यथा न विद्यते खट्वा यस्याः सा खट्वा ततो ऽखट्विकेत्यादावपि प्रसंगादि
ति। अपिग्रहणेन केवलानामेव भस्त्रादीनां समुच्चयो नान्यपूर्वाणामिति शंकमानं प्रत्याह नञ्पूर्वाणामित्यपि शब्दादिति। इत्यन्तरत्वेनेन
नेयं स्वतः प्राप्तिरिति दर्शयति पठितं हि सर्वत्रैष्यते नञ्पूर्वाणामिति यदि तिन वक्ष्यमाणाधिकारे तस्य वचनं उत्तरपदस्य चेत्येव सर्वत्राभविष्यत

अत्रोपसर्जनह्रस्वत्वे कृते पुनर्बहुव्रीहौ कृते भाषितपुंस्काद्यच्छाबुत्पद्यते तस्य केण इति यो ह्रस्वो नासावभाषितपुंस्का
द्विहितस्यातः स्थाने भवति· नञ्पूर्वाणामपीत्यपिशब्दादन्यपूर्वाणां केवलानां च विधिरयमिष्यते· निर्भस्त्रिका निर्भस्त्रिका
बहुभस्त्रिका बहुभस्त्रिके सैवमादयोपीष्यन्ते तेन नञ्पूर्वाणामिति वचनमनुवादः एवमन्यत्र बुद्धिप्रतिपत्त्यर्थं॥ ॥अभा
षितपुंस्काच्च॥ ॥अभाषितपुंस्काद्विहितस्यातः स्थाने योकारस्तस्योदीचामाचार्याणां मतेन कारादेशो न भवति· ख
ट्विका खट्वका· अखट्विका अखट्वका· परमखट्विका परमखट्वका च बहुव्रीहौ यदा कपि ह्रस्वः क्रियते तदा भवितव्य
मनेन विधिना तत्राप्यभाषितपुंस्काद्विहितस्यातः स्थाने भवत्यकार इति यदा त्वविद्यमाना खट्वा अस्यां सा अखट्वा आत्म
ला अखट्वा अखट्विकेति तदा न भवति तथातिक्रान्ता खट्वामतिखट्वा अत्यखट्वा अतिखट्वा अतिखट्विकेति १५ ॥

आह तत्रेति॥ ॥अभाषिता॥ ॥अभाषितपुंस्कादिति विहितविशेषणमित्याह अभाषितपुंस्काद्विहितस्येति। खट्वाशब्दः स्त्रियामेव नियत इत्यभा
षितपुंस्कः। बहुव्रीहेरभिधेयलिंगत्वाद्भाषितपुंस्कत्वाभावादनेन विकल्पेन न भवितव्यमिति मन्यमानं प्रत्याह बहुव्रीहाविहेति॥ कथं भवी
ष्यत आह तत्रापीति। इतिकरणो हेतौ॥ यदा त्विति। कबभावपक्ष एतत्। अखट्वा इति स्थिते उपसर्जनह्रस्वत्वं टाप् पुनः केण इति ह्रस्वः स च स
मासाद्भाषितपुंस्कात् तुल्यन्यायत्वात् इति न भवत्ययं विकल्पः। अभाषितपुंस्कात्परस्यात इति विज्ञायमाने स्यादेवात्र विकल्पः। अतिखट्वि
केति। अत्रापि समासाद्भाषितपुंस्काद्बाबुत्पन्नः १५ ॥ ॥

।।आङ्गा।। ।।रत्नापवादो योगः केणऽइति ह्रस्वापवादश्चा आचार्याणामिति । उदीचामित्युक्तं ततो न्येषामाचार्याणामित्यर्थः । अपर आह आचार्यस्य
पाणिनेर्य आचार्यः स इहाचार्यः ४ गुरुत्वानुबन्धवचनमिति । सर्वथा ऽभाषितपुंस्केभ्युत्रे रूपं अखट्वका अखट्विका अखट्वाकेति ।। ।।उत्सेकः।। ।।अत्र
द्वैपक्ष्योउत्सेति वर्जनमात्रं स्थानित्वेन निर्दिश्यते अकारस्तूच्चारणार्थ एवं ठगादिष्वपि । सेकः पक्षः । संघातः प्रत्ययः स्थानसत्वत्र स एवेति द्वितीयः ।
तत्राद्येपक्षे पाठितायष्ठितु मित्यादौ दोषात्वेन स्यायपि प्रसंगः द्वितीये तु अष्ठचि कर्मठ इत्यत्रापि प्राप्नोतीति तत्र द्वयोरपि पक्षयोर्यथा दोषो न भवति तथा
दीयत्नाह अंगस्य निमित्तं यत्र इति । सेकं धस्त्रत्रनावयवावयविभावलक्षणः यष्ठि तेस्यापावपि प्रसंगात् किं तर्हि निमित्तनिमित्तिभावलक्ष

।।आङ्गाचार्याणां।। ।।अभाषितपुंस्कादात्तः स्थाने यो कारस्तस्याचार्याणामाकारादेशो भवति । खट्वका अखट्वाका ।। ।।
ठत्सेकः ।। ।।अंगस्य निमित्तं यत्र कश्चाङ्गस्य निमित्तं प्रत्ययः ४ तस्य प्रत्ययस्य इक् इत्ययमादेशो भवति । प्राग्वहतेष्ठक् आ
क्षिकः ४ शालाकिकः ४ हमवणा ठञ् स्मावणिकः ४ ठगादिषु यदि वर्णमात्रं प्रत्ययः उच्चारणार्थो कारस्तदा इहाप्यकार उच्चारणा
र्थः ४ वर्णमात्रे स्थानित्वेनोपादीयते संघाते तु प्रत्यये ऽत्रापि संघातग्रहणमेव तत्र करोष्ठः कंठ इत्येवमादीनामुणादयो व्युत्पन्नमि
ति न भवति । मथितं पण्यमस्य माथितिकः इत्यत्र यस्येति लोपे कृते इसुसुक्तान्तात्क इति स्थानिवद्भावादिकस्य कादेशः प्राप्नो
ति ।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।श्री४।।

णः अंगस्य संबंधी त्वक्ते तद्रूपसंबंधे नैव प्रतीयते प्रत्ययश्चात तद्रूपसंबंधी तदा यत्रत्वादंगव्यपदेशस्य तदेवमंगव्यपदेशनिमित्तस्य प्रत्ययस्य
ग्रहणादुभयोरपि पक्षयोर्दोषाभावः । किं च संघातपक्षे अर्थवत इष्टशब्दस्य ग्रहणान्न भवति कर्मठ इत्यत्र प्रसंगः । वर्णग्रहणे त्वर्थवत्परिभाषा
न प्रवर्तते । तत्र संघातपक्षे दोषं तरमाशंक्य परिहरति तत्रेति । पुनरपि तस्मिन्नेव पक्षे चोदयति मथितं पण्यमस्येति । वर्णग्रहणे त्वनाल्विधा
विति स्थानिवत्त्वनिषेधादिकस्य कादेशाप्रसंगः । कादेशः प्राप्नोतीति । ननु तान्ताद्गादित्युच्यते न चात्र तान्तमंगं ततः प्रसयस्याविधानात्
नेतरत्ति । एकदेशविकृतस्यानन्यत्वात् अंगं भवति तान्तं च तत श्च यथानुकंपितो भानुदत्त इति ठचिद्वितीयादचकुर्ध्वस्य लोपे कादेशो भवति
भानुक इति तथात्रापि प्रसंगः ।। ।।

परीस्ग्रति संनिपातेनेति। आजादि संनिपातेननांतत्व मुपजायते। ततस्तन्न छिघातस्य निमित्तं नोपपद्यते। परिहारांतरमाह्यस्येति। थ्यानिव
द्भावत्वः पाल्मि पूर्वविधावित्यनेन। ननु पूर्वस्य विधावित्युक्तेपरस्यापंत्राह पूर्वस्मादपिहीति। पंचमीसमासोपित्रास्त्रीयतरत्यर्थः॥ अ
येत्याद्यः॥ वर्णग्रहणोदेवत्तंतविधौ सिद्धेऽनंतग्रहणं प्रत्ययोपदेशकालेतानप्रति पत्त्यर्थमिति॥ ॥ इमुसु॥ ॥ सार्पिष्क इति। तदस्यपण्य
मितिठक्। इणः ष इति विसर्जनीयस्य षत्वं। धानुष्क इति। प्रहरणमिति ठक्। याजुष्क इति दीव्यत्यर्थे ठक्। नैषादकर्षुकः॥ शाबरजंबुक इति।

। सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न भवति यस्येति लोपस्य स्थानिवद्भावात्। पूर्वस्मादपि हि विधौ स्था
निवद्भावः॥ ॥ इसुसुक्तान्तात्कः॥ ॥ इस् उस् इत्येवमंतानां पुंतां तानांतां नानांवांगानामुत्तरस्य ठस्य क इत्ययमादेशो
भवति। इस्। सार्पिष्कः। उस्। धानुष्कः। याजुष्कः। उक्। नैषादकर्षुकः। शावरजंबुकः। मातृकं। पैतृकं। तान्। तात्। औदश्वि
त्कः। शाकृत्कः। याकृत्कः। इसुसोः प्रतिपदोक्तयोर्ग्रहणादिह न भवति। आशिषा चरति आशिषिकः। उषा चरति औषि
कः। शासेस्सर्वस्येश्चक्विपिलाक्षणिकं रूपं दोष उपसंख्यानं दोष्णैश्चरति दौष्कः॥ १६ ॥ ॥श्रीः॥ ॥श्रीः॥ ॥

भवादावर्थे औदश्विठजादेशे कृते केण इति ह्रस्वत्वं। मातृकं पैतृकमिति। ततआगतः ऋतष्ठञ्। औदश्वित्क इति संस्कृतं भक्षा दश्वि
त्क उदश्वितोन्यतरस्यामिति पक्षे ष्ठक्। शाकृत्को याकृत्क इति। संसृष्ट इति ठञ्। आशिषेति। आङः शासु इच्छायामित्यस्मादाशास
नमाशीरिति संपदादित्वात् क्विप्। आशासः क्वावुपसंख्यानमितीत्वं। उषेति। वसेः क्विप् यजादित्वात्संप्रसारणं। लाक्षणिकं रूपमि
ति। सार्पिरादेस्तु अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः। जनेरुसिः। अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुकधुक्दीर्घहकाराश्चेति प्रतिपदोक्तमिसुसो रूपं। दोष उपसं
ख्यानमिति। वर्णैकदेशानां वर्णग्रहणेनाग्रहणेनाग्रहणादोकारेण उकारस्तस्य उकारग्रहणेनाग्रहणादुपसंख्यानं॥ १६ ॥ ॥

॥ ।चजोः ॥ ॥ पाकः इत्यादौ भावे घञ् । पाक्यमित्यादौ कर्मणि ऋहलोर्ण्यत् । यथासंख्यमत्र न भवति । क्वचिच्चकारस्य एव ... जकारस्येति सुजनुज्ञोपा
त्तपुपत्ताययोः अयाज्ञानु णजोपज्ञोगो वचोशब्दः संज्ञायामित्यादेर्लिंगात् । क्वचिन्नुपपत्तेयथासंख्यमत्र नेष्यते तेन रक्तं रागादिति लिंगाद्दिति ॥ ॥
संकादीनां च ॥ ॥ संकुरस्येवमादीनां चेति ॥ सिद्धमिति शेषः । कृतकुत्वानामेव गणे पाठात् ॥ किमर्थं तर्हि सूत्रं भावत्ता यथैव कुत्वादर्मदपि घ

॥ चजोः कु घिण्यतोः ॥ ॥ चकारजकारयोः कवर्गादेशो भवति घिति ण्यति च प्रत्यये परतः । घिति । पाकः त्यागः रागः । ण्यति । पाक्यं वा
क्यं रेक्यं ॥ ॥ संकादीनां च ॥ ॥ संकुरस्येवमादीनां कवर्गादेशो भवति । संकुः नाव चले रिज्जु प्रत्ययः । मकुः मस्म शीलू चरित्तरिति
निधनि मिमत्ति म्य उरिति मत्ते हुप्रत्ययः । भृगुः भ्रथि भ्रस्ज्जि भ्रस्तो संप्रसारणं मतोपश्चे सुप्रत्ययः । दूरेपाकः । फले पाकः । दूरेप
अते स्वपमेव फलेपचते स्वयमेव पाचाघ वृनिपातनात्सिद्धिः तत्पुरुषे कृतिबहुलमिति सप्तम्या अलुक् । ज्ञाणोपाकः इत्यपि
हि केचित्पठंति । दूरेपाका फलेपाका इतियावंतमपरे धीयते । उकारांतावपरे दूरेपाकुः फलेपाकुरिति । तेषां सुप्रत्ययो निपा
तनाद्वेवतक्रं वक्रमिति तन्वतेर्वंचतेश्च रक्ता पितं चिवचीत्यादिना रक् । अतिषंगः स्वतिषजतीति पचाद्यच् । अनुषंगः ।
अवसर्गः उपसर्गः । श्वपाकः मांसपाकः कपोतपाकः उलूकपाकः इति कर्मोपपदेऽण्प्रत्ययः । संज्ञायां मेघः अवदाघः
निदाघः अर्हतेर्घञ् अर्घः । अवपूर्वस्य निपूर्वस्य च दहेः अवदाघः निदाघः संज्ञायां । अन्यत्र अर्हः अवरोहः । न्यग्रोधः वीरुदि
त्यत्र न्यक्पूर्वस्य रुहेः पचाद्यचि विपूर्वस्य क्विपि धकारो विधीयते न्यक् रोहतीति न्यग्रोधः विरोहतीति वीरुत् ॥ ॥ ७ ॥ ॥

त्वगुणादीर्घत्वादिकं निपातनाद्भवति तथा कुत्वमपि भविष्यति । सत्यां अस्मतिति सिम्न अनुवादे गणस्य क्वचिदप्यनुपयोगात्समादत्याः शंकोत ।
पचाद्यचीति घञि कुत्वस्यासिद्धत्वात् । संज्ञायां मेघ इत्यादि । मेघः पयोधरः निदाघो घर्मः अवदाघोऽपि स एव । अर्घो विक्रीयमाणस्य घा स्यादेरि
यत्ता । मूल्यमित्यन्ये । वीरुदिति निपातनादुपसर्गस्य दीर्घत्वं ॥ ॥

॥हो हन्तेः॥ ॥ञश्च णश्च ञणौ ताविती यथोक्तौ ञ्णितौ ञ्णितौ च नश्च ञ्णिन्नाः तेषु ञ्णिन्नेषु नकारे अकार उच्चारणार्थः तेन हन्त्रघ्नित्र
घ्नोर्हिंसायामपि भवति। घ्नंती सा द्रोगमहत्वे सुप्रधानलोपः॥ किमिदं ञ्णिन्नग्रहणं हन्तिविशेषणं ञ्णिन्नपरस्य हन्तेर्यो हकार इति आहो स्विद्
कारविशेषणं ञ्णिन्नपरस्य हकारस्य सचेद्धन्तेरिति तत्राद्यपक्षे त्वत्रासिद्धिः घ्नंति घ्नं तु नहि सावपवेत्वसस्मात्परो भवति द्वितीये तु न क्वचित्स्या
त् न हि ञ्णिन्नकारपरता हकारस्य क्वापि संभवति घातयतीत्यादौ तावत् ञ्कारेणाव्यवधानं घ्नंतीत्यादावुपधालोपस्यासिद्धत्वात् व्यव
धानमेव अथ वचनाद्व्यवधानेपि भविष्यति इहापि तर्हि प्राप्नोति हननमिच्छति हननीयति हननीयतेर्ण्वुल् हननीयक इति नकारेपि हेताहन्न

॥हो हन्ते र्ञ्णिन्नेषु॥ ॥हन्तेर्हकारस्य कवर्गादेशो भवति ञिति णिति च प्रत्यये परतो नकारे च। घातयति घातकः साधु
घाती घातं घातं प्रातो वर्त्तते नकारे। घ्नंति घ्नं तु अघ्नन्। ह इति किं प्रलोसस्य माभूत्। हन्तेरिति किं प्रहारः प्रहारकः।
ञ्णिन्नस्य यो हन्ते र्विशेषणं नकारो हकारस्य न कपेऽनन्तरस्य हन्ति हकारस्येति तच्चानन्तर्यं सन्निपातकृतमाश्रीय
तेऽस्यानिबद्धावाल्लक्षान्नतन्तुपरत्वानन्तर्यं तत्र विधानकं वचनसामर्थ्यात्त्यदापि सर्वेरवञ्णिन्नेर्हन्ति हकारो विशेष्य
ते तदापि येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्याद्धि ञ्णिति धात्ववयवेन व्यवहितेऽपि सति भवति इहा तु न भ
वति हननमिच्छति हननीयति हननीयते र्ण्वुल् हननीयक इति॥ १७॥

मिपादावपि प्रसंगः नकारग्रहणमिदानीं किमर्थं स्यात् यत्र नकारः श्रूयते तत्र यथा स्यात् इह माभूत् हतो हथ इति। तत्रैवं द्वयोरपि प
क्षयोर्दोषं दृष्ट्वा पक्षान्तरं दर्शयति ञ्णिन्नस्य यदि स्यादि। यद्यपि द्वं द्वनि हि ष्ट्वा नानेकयोग्यं शेममान्यापात् यथापि संभवमभिचारो हि विश
ष्यभावस्यां ग मिपयमेव प्रकार आश्रीयते। न तु वस्यानिबद्धावादानन्तर्यं नकारस्य न संभवतीत्युक्तमत आह तत्रेति। सन्निपातकृतमि
ति। श्रुतिकृतमित्यर्थः। अथवा पुनरस्तु द्वितीयः पक्षः तत्रापि दोषः सुप्रतिविधान इत्याह यदापीति। धात्ववयवेन नकारेणाव्यवधानमव्य
भिचारीति तदेवाश्रीयते न शब्दान्तरेणेति। ञ्णिन्नस्य यंपरिहारः नकारे तु कएव॥ ॥१७॥ ॥श्रीः॥ ॥श्रीः॥ ॥ध॥ ॥

॥अभ्यासाच्च॥ ॥अहं जघनेति। णित्वाभाव उदाहरणं णित्पक्षे पूर्वेणैव सिद्धं। एवं जघनिथ जघ्नथ जघन्वानि सुदाहरणं। अभ्यासनि
मित्ते प्रत्ययपर इत्यादि। अंगाधिकारेणाभ्यासेन च प्रत्ययस्याक्षेपादयमर्थो लभ्यते। जिहननीयिषतीति अत्र यस्मिन् हनिरंगं तस्मिन्नेतस्याभ्या
सनिमित्तत्वं यश्चाभ्यासस्य निमित्तं सन् न तस्मिन् हनिरंगं॥ ॥हेरचङि॥ ॥प्राजीहयदिति। एयन्तात् लुङ् चङ् णिलोपः उपधाह्रस्वत्वं च
ङीति द्वित्वं चर्त्वं। कुहोश्चुरिति चुत्वं दीर्घो लघोरिति दीर्घः। अचङीत्येतत् सत्याच्चङि अचङीति शक्यमकर्तुमिति। कथमित्यत आह चङ्यभ्यासेनेति। यथा

॥अभ्यासाच्च॥ ॥अभ्यासादुत्तरस्य हन्तेर्हकारस्य कवर्गादेशो भवति। जिघांसति। जंघन्यते। अहं जघन। अभ्यासनिमित्ते प्र
त्यये हन्तेर्णत्ययोऽभ्यासस्तस्मादेवैतत्कुत्वं इह न भवति हननीयितुमिच्छति जिहननीयिषति॥ ॥हेरचङि॥ ॥हिनोतेर्हकारस्या
भ्यासादुत्तरस्य कवर्गादेशो भवति अचङि। प्रजिघीषति। प्रजेघीयते। प्रजिघाय। अचङीति किं प्राजीहयद्दूतं। अचङीति शक्यम
कर्तुं कथं चङ्यभ्यासनिमित्ते णौ हिनोतिरंगं न भवति तत्राभ्यासनिमित्ते प्रत्यये हेरंगस्येति विज्ञायमाने प्राप्तिरेव नास्ति त
त्किं पुनर्ज्ञापनार्थं एतत् ज्ञाप्यते हेरचङीति चङोऽन्यत्र हेर्ण्यधिकस्यापि कुत्वं भवतीति तेन प्रजिघाययिषतीति सिद्धं भ
वति॥ ॥सन्लिटोर्जेः॥ ॥सनि लिटि च प्रत्यये जेरंगस्येति विज्ञायमाने प्राप्तिरेव नास्ति तत्क्रि योऽभ्यासस्तस्मादुत्तरस्य
कवर्गादेशो भवति। जिगीषति। जिगाय। सन्लिटोरिति किं जेजीयते। जिनातेः सम्प्रसारणे कृते यद्यपि जिर्भवति तथापि
लाक्षणिकत्वात्तस्य ग्रहणं न भवति जिज्यतुः जिज्युरित्येव भवति॥ ॥विभाषा चेः॥ ॥चिनोतेरंगस्य सन्लिटोरभ्यासादु
त्तरस्य विभाषा कवर्गादेशो भवति चिकीषति चिचीषति चिकाय चिचाय। सन्लिटोरित्येव चेचीयते॥ ॥श्रीः॥ ॥

एवं सत्येव जिहननीयिषतीत्यत्र न भवति एवं प्राजीहयदित्यत्रापि न भविष्यति किमचङीत्यनेनेत्यर्थः। तत्क्रियत इत्यादि परिहारः। किमेतस्य सा
पने प्रयोजनमित्यत आह तेनेति॥ ॥सन्लिटोः॥ ॥ज्या वयोहानाविति सस्य क्यिनि ग्रहिज्यादिसूत्रेण संप्रसारणे कृते पूर्वत्वे च जिरूपस्याभ्या
वात् हलः इति दीर्घत्वं बाधित्वा कुत्वं प्राप्नोतीति कृतेपि वा दीर्घत्वे एकदेशविकृतस्यानन्यत्वात् कुत्वप्रसंगः यथा जिगीषतीत्यत्रेत्यत आह जि
नातेरित्यादि। जिज्यतुरिति एरनेकाच इति यणादेशः॥ ॥

न क्वादेः ॥ ॥ कूजः ख्वात्यादि कूज अर्जे शब्दे खर्ज मथने गर्ज शब्दे । अत्र वार्त्तिकं क्वाद्यजिव्रजिण्यादिरूढीनाम प्रतिषेधो निष्ठायामनिट्कु
त्ववचनादिति । अस्यार्थः चजोः कु घिण्ण्यतोर्निष्ठायामनिट इति सूत्रं कर्तव्यं तेनैव क्वाद्यजादीनां कुत्वनिवृत्तेः सिद्धत्वान्नार्थः प्रतिषेधवचने
नेति । नन्वेवं गर्ज्यु लुगुल्यु चकुनु कुञ्ज नो निष्ठायामनिट्त्वात् कुत्वं प्राप्नोति तथा अजिसृजितर्जीनां निष्ठायां सेट्त्वात् कुत्वाप्रसंगः यथा तु सूत्रं तथा ति
पर्ययः । उच्यते यथोत्तरं मुनीनां प्रामाण्यमिति वार्त्तिकानुसारेण कुत्वस्याभावो अवश्याप्योन्नव सत्यजेः प्रतिषेधे वीत इति निष्ठायामनिट्त्वा
त्समाजर इति कुत्वप्रसंगः । नेतदस्ति । व्यादेशो निष्ठायामनिट्त्वत्वजिः सतुवलाघाईधातुके विकल्पद्र्यत्र इति विभावाभावपक्षे अजितइति
देवोवा कथं शोकः समुद्र इति यावता शुसुञ्जी निष्ठायां सेटौ । एवं तर्हि शुसुञ्जोर्घञीति वक्ष्यामि तच्च यथा न्यासे पि वक्तव्यं घञ्येव यथा स्यात्प्र

॥ न क्वादेः ॥ ॥ कवर्गादेर्धातोश्चजोः कवर्गादेशो न भवति । कूजो वर्जते खर्ज्जः गर्ज्जः कूजं भवता गर्ज्यं भवता ॥ ॥ अजिव्रज्यो
श्च ॥ ॥ अजिव्रजि इत्येतयोश्च कवर्गादेशो न भवति । समाजः उदाजः । व्रज । परिव्राजः परिव्राज्यं अजेस्तु अजेर्व्यघञपो
रिति वीभावस्य विधानात् अस्यति नास्त्युदाहरणं ॥ ॥ भुजन्युब्जौ पाण्युपतापयोः ॥ ॥ भुज न्युब्ज इत्येतौ शब्दौ निपात्येते यथाक्रमं पाण्या
रिति वीभावस्य विधानात्स्यति नास्त्युदाहरणं ॥ ॥ भुजन्युब्जौ पाण्युपतापयोः ॥ ॥ भुज न्युब्ज इत्येतौ शब्दौ निपात्येते पाण्या
नुपतापे च । भुज्यते अनेनेति भुजः पाणिः हलश्चेति घञ् ॥ तत्र कुत्वाभावो गुणाभावश्च निपात्यते ॥ न्युब्जिताः शेरते अस्मिन्निति
न्युब्ज उपतापो रोगः तथैव घञि कुत्वाभावो निपात्यते । पाण्युपतापयोरिति किं भोगः समुद्गः ॥ १८ ॥ ॥ श्री ॥ ॥

॥ अजि ॥ ॥ समाजः उदाजः इति घञ्यप्प्रत्यये हलश्चेति घ
ञि माभूदिति अर्थो ज्ञानगत्योश्चात्वमिति इति तद्देव वार्त्तिककारपक्षे विपर्ययं भविष्यति ॥ ॥ अजि ॥ ॥ समाजः उदाज इति पशुभ्योऽपत्र हलश्चेति घ
ञ । पशुपुत्र समुदोरजः पशुष्विति अप् भवति । ॥ भुज ॥ ॥ पाणिशब्दे न तद्व्याख्या व्याकुर्लक्ष्यते न तु भाणीवधस्याधः पंचशाखाप्रदेश उच्यते । लोके
पि बाहुपर्यायो भुजशब्दः भुज्यत इति । भुजनालनाम्पवहारयोः । न्युब्जिता इति । अधोमुखाः निश्चेष्टाः । वस्तु कथं नं चेत् नत विग्रहस्तु न्युब्जं
त्यस्मिन्निति दर्शयितव्यः । न्युब्जोपतापग्रहणं प्रामाणकर्तृकं कथं यस्मिन्व्याधौ न्युब्जिताः शेरते स तान् न्युब्जयतीति त्र्यण्ताच्चाघञि न्युब्ज इति
सिद्धं । न चात्र घञ्चोः स्वरविशेषः थाथादि सूत्रेणाघञ्यप्प्नोरन्तोदात्तत्वविधानात् । भुजशब्दस्तु घञ्याद्युदात्तो भवति इगुपधलक्षणो न इके अन्तो
दात्तः ॥ ॥ १८ ॥ ॥ गछ ॥ ॥ ॥

॥प्रयाजाः॥ ॥पंचानुयाजा इति। दर्शपूर्णमासयोस्त्वेते त्रयाजाः। चातुर्मास्येषु नवप्रयुष्वेकादश पंचत्वं नक्कापि दृष्टं तस्मात्प्रयोजनानुयाजा इति पाठः
॥प्रदर्शनार्थमिति। एतच्च यज्ञग्रहणमुपलक्षणं ते उपांशुयाजो हि यज्ञांगमपि च यत्त्वं निपातनादेव सिद्धं उपांशुयाज इत्यनुयाजानां च यज्ञसमुदाय
मध्यवर्तित्वात् यज्ञांगत्वं प्रयाजानुयाजयोस्तेनेतरेतरेषां तु फलवत्त्वं निषाद फलं न दृष्टमिति संगतं॥ ॥वंचेः॥ ॥वंचं वंचं वंचनीति गंतं अंगच्छतीत्य

॥प्रयाजानुयाजौ यज्ञांगे॥ ॥प्रयाजा अनुयाजा इत्येतौ निपात्येते यज्ञांगे। पंच प्रयाजाः। पंचानुयाजाः। यज्ञांग इति किं प्रया
गः अनुयागः प्रयाजानुयाजग्रहणं प्रदर्शनार्थं अन्यत्राप्येवं प्रकारे कुत्वं न भवति एकादशोपयाजाः उपांशुयाजमंतरा
यजति अष्टौ पत्नीसंयाजा भवंति अनुयाजेष्वरंतीत्येवमादि सिद्धं भवति॥ ॥वंचेर्गतौ॥ ॥वंचेर्गत्यर्थस्य वर्तमानस्य
कवर्गादेशो न भवति। वंचं वंचं तिवणिजः। गतौ इति किं वंकं काष्ठं कुटिलमित्यर्थः॥ ॥ओक उचः के॥ ॥उचेर्धातोः के प्र
त्ययेऽोक इति निपात्यते किं पुनरत्र निपात्यते कुत्वं गुणश्च। ओकः शकुंतः। ओकोऽगृहं कर्तरि इगुपधालक्षणः कप्रत्ययः
अधिकरणार्थे तु कप्रकांतरे घञर्थे कविधानमिति। किमर्थं पुनरयं घञेव न साध्यते स्वरार्थः अंतोदात्तो यथा स्यात्
घञि तु सत्याद्युदात्तः स्यात् दिवौकसः जलौकसः इत्येवमादावप्युनि प्रत्यये अथापि यो वा कुत्वमिति कुत्वं दृष्टं॥ ॥
शप आवश्यके॥ ॥शपः परतः आवश्यके अर्थे कवर्गो न भवति। अवश्यपाच्यं अवश्यवाच्यं। आवश्यक इति किं पाकं वाकं रेकं॥

र्थः। वंकमिति। गुणाश्च श्वोयं भावे घञ अभेदोपचारात् उदितिर्हत्वमिति॥ ॥ओक उचः॥ ॥उच समवाये॥ ओकः शकुंत इति। उचति समवैति
नीडाद्विति कृत्वा। ओकोऽगृहमिति। उचति समवयंति वसंति तस्मिन्निति कृत्वा॥ अनुनिप्रत्यय इति अयमेव लोके साधीयः प्रयुज्यते॥
ण्य आवश्यके॥ ॥उदाहरणेषु आवश्यकाधमर्णयोर्णिनिः कृत्याश्चेति एयत्। मयूरव्यंसकादित्वात्समासः। लुंपेरवश्यमः कृत्ये

इति मलोपः॥ ॥श्रीः॥ ॥छ॥ ॥

।यजा। ।अर्च्यमिति अर्च स्तुतौ। प्रवाच्यो नामेति। प्रकर्षेणोच्यत इति प्रवाच्यः पाठविशेषोपलक्षितो ग्रन्थविशेषः। अपरे पुनरिति। ते मन्यन्ते प्रपूर्वो व
चिशब्दसंज्ञायामेव वर्त्तते तत्र विधेयार्थं प्रवान्निपातनमिति। एतच्चेति। अविवाक्यमित्येतावच्छब्दरूपं केवलं पुनरस्तो विशेष इत्यत आह दशरात्रस्येति।
द्वादशाहे। मितो द्विरात्रो मध्ये दशरात्रः तस्य दशममहः अविवाक्यं अन्यत्रेति तथा च नाम्नि स्नहनिके न विवक्स्यानि हि वा अमावाक्यमित्यतद्दाच
क्षते संज्ञायेन हि विंदिम्लाध्यायप्रायो न वेदी सेका इत्यह विशेषे कुत्वं अन्यत्र तदभावः प्रयुज्यमानेश्वलायनेन। एवमन्योपसर्गपूर्वस्यापि प्रतिषेध
एवेष्यते न नियमः। एवं च कुत्वाप्रवचिग्रहणं शक्यमकर्तुं अहर्विशेषे पूर्वोदाहृत्वात् कुत्वं अन्यत्र प्रतिषेध इति हि द्रमिष्टं अन्यथा नियमे

।।यजयाचरुचप्रवचर्चश्च।। ।।यजयाचरुचप्रवचर्च इत्येतेषां ण्यपरतः कवर्गादेशो न भवति। यजा। याज्यं। याच। याच्यं।
रुच। रोच्यं। प्रवच। प्रवाच्यं।। ऋच। अर्च्यं। अदुपधात् ऋचेश्च इति एव निपातनात् ऋद्बवति प्रवचग्रहणं शब्दसंज्ञार्थं प्रवाच्यो ना
म पाठविशेषोपलक्षितो ग्रन्थोऽस्ति। अपरे पुनराहुः रूपमप्रपूर्वस्य निपातनार्थं प्रपूर्वस्य न वचेः शब्दसंज्ञायां कुत्वप्रतिषेधोपपत्ते
स्यात्। अन्योपसर्गपूर्वस्य माभूत् अविवाक्यमह इति पठंति। एतत्तु विशेष एवेष्यते दशरात्रस्य यद्दशममहः अन्यत्रा विवा
क्यमित्येव भवति। ण्यति प्रतिषेधे त्यजेरुपसंख्यानं त्याज्यं।। ।।वचोऽशब्दसंज्ञायां।। ।।वचेः शब्दसंज्ञायां ण्यतिपरतः कवर्गो न भव
ति।। वाच्यमाह। अवाच्यमाह। अशब्दसंज्ञायामिति किं। अवघुष्टिं वाक्यमाह।। ।।प्रयोज्यनियोज्यौ शक्यार्थे।। ।।प्रयोज्यनियो
ज्य इत्येतौ शक्यार्थे निपात्येते। शक्यः प्रयोक्तुं प्रयोज्यः शक्यो नियोक्तुं नियोज्यः। शक्यार्थ इति किं। प्रयोग्यो नियोग्यः।। ।।भोज्यं भ
क्ष्ये।। ।।भोज्यमिति निपात्यते भक्ष्येऽभिधेये। भोज्य ओदनः। भोज्या यवागूः। इह भक्ष्यमभ्यवहार्यमात्रं। तत्र भक्ष्य इति किं। भोग्यः

बद्धप्रतिविधेयं स्यात्।। ।।प्रयोज्य।। ।।इह प्रयुक्तनियुक्तः शक्यार्थ इति न कृत्यं एत इत्येवं सिद्धे निपातनाश्रयणं हत्यर्थं। गुणभूतए
वेतयोः प्रयोगो यथा स्यात् प्रयोज्यो भृत्यो नियोज्यो दास इति स्वामि नि प्रयोज्यनियोज्यशब्दौ न भवतः।। ।।भोज्यं।। ।।भोज्या यवागूरि
ति। ननु भक्षिरयं खरविशदेऽभ्यवहार्ये वर्त्तत इति संस्कृतं भक्षा इत्यत्रोक्तं तत्कथं द्रवद्रव्ये भवतीत्यत आह इहेति। एवं मन्यतेऽत्र भक्षिः
खरविशद एव वर्त्तते अबभक्षो वायुभक्ष इत्यत्रापि दर्शनादिति प्रत्यन्तरसंनिधिवलादेतदेवं भवति स्वभावतस्तु भक्षिः खरविशद एव
व वर्त्तत इति वार्त्तिककारस्य पक्षः यदाह भोज्यमभ्यवहार्यमिति वक्तव्यमिति १८ ॥

उमा·पद·३
९१

॥घोर्लोपो॥ ॥दधदिति। दधातेर्लेट्तिप्रत्ययस्य लोपः परस्मैपदेष्विति ईकारलोपः। दाधुषेयं जुमानाय रत्नानि देधादिरित्यर्थः। असेत्याडः दधदिति शत्रंतमेतत्। दद्दिति। दाञोरूपं। वावचनं प्रस्तावि। व्यासुरहं आडागमे सतीति। अत्वनलोपः। आटः अवर्णं भविष्यतीत्यर्थः॥ किमर्थंतर्हि वावचनमित्यत आह तत्रेति। किमत्रविस्पष्टनीयमत आह एषाहीति। असेत्वाङः ज्ञापकार्थं वा ग्रहणं एतज्ज्ञापयति अनित्यमागमशासनमिति अनित्यत्वेस्याः घसति दद्यादिति न स्यादितितत्सिद्धये वा ग्रहणं कर्त्तव्यमिति॥ ॥ओतः श्यनि॥ ॥श्यति सादिशोतन्कृरणेछोछेदने दोअवखंडने षोन्तकर्मणि। इह ओतः शितीति वक्तव्ये न च ओकारांता नां श्यनोन्यः शित्संभवति अर्द्धमात्रया चलाघवं भवति तत्रा

॥॥घोर्लोपो लेटि वा॥ ॥घुसंज्ञकानां लेटिपरतो लोपो वा भवति। दधद्रत्नानि दाशुषे। सोमो ददत्खार्वाय। न च भवति प दद्गिरग्नये दद्दात आडागमे सति लोपे धि दद्यादिति सिद्धं भवति तत्र वावचनं विस्पष्टार्थं एषाहि कस्य चिदाशंका स्यादाद्दादित्येवं नित्यं प्राप्ते लोप आडागमो बाधत वै एतद्रूपमिति॥ ॥ओतः श्यनि॥ ॥ओकारांतस्यांगस्य श्यनिपरतो लोपो भवति। शो। निश्यति। छो। अवछ्यति। दो। अवद्यति। सो। अवस्यति॥ ॥क्त्वापि चि॥ ॥क्त्वापि छंदसि प्रत्यये लोपो भवति। अधुक्षात। अधुक्षाथां। अधुक्षि। अचीति किं अधुक्षत। अधुक्षतां॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥

प्रत्ययार्थः। छित्वा क्लम्यावमोशिनीति। शिन्नुहणं न कर्त्तव्यं भवति रहमेवानुवर्त्तिष्यते। न नु श्यनग्रहणमुत्तरार्थं कर्त्तव्यं शमामष्टानामिति तत्राथ स्तुपितीत्येव यदि स्यात् तीत्तु च मते अमेत्तिप्राशोतिप क्षेशप्रभृतिर अत्रापि प्राप्नोति शमादिभिः शितं विशेषयिष्यामः शमादिभ्योयो विहितः शिदिति श्यनेवचसर्वेभ्यः शमादिभ्यो विहितः एवमपि शिद्धि। शपश्लु त्वेन शमादीनामुपयोगात्कापि तिर्हिशाभावान्न श्यनी स्याद्वपि प्रसंगा नेष दोषः अष्टानामित्यनेन संख्यायाः कार्यिणो निर्दिश्यन्ते ते च संनिधानात् शमादय एव विज्ञास्यंते॥ ॥क्त्वापि चि॥ ॥अधुक्षातामिति। दुहेः लिंतेत्वेनात्मनेपदमातां अत्राप्य तिलोपे आतो ङितः इति रूपमेषः प्राप्नोति। अधुक्षीति। सर्वत्र लोपः ककारवतः सगण हस्यग्रहणादिह न भवति वत्सो न त्वणादिम्यः सः त्वणासोत्वणासः॥

राम०
९१

।। लुग्वा ।। ।। एतेषामंगानां क्तस्येति। एतेषां संबंधी यो निमित्तत्वेन क्तः तस्येत्यर्थः। सर्वादेशार्थमिति। लुक् सर्गापहारीनि संज्ञा
विभाषुक्तं। वग्रहार्थमिति। उत्तमपुरुषद्विवचनार्थमित्यर्थः। अथान्मार्थकस्मान्न भवति तत्राह। अन्यत्रेति। अलोन्त्यस्येति आदेः परस्य।
त्तत्तु न भवति पंचमीनिर्देशाभावात्। झलो झलीति लोपेनेति। धिसकारे सिचो लोप इति नाप्रापते ह्रस्वादेशोपलक्षणं यातत्र स्थि(ग्र)ह

लुग्वा दुहदिहलिहगुहामात्मनेपदे दंत्ये।। ।।दुहदिहलिहगुहस्तेषामात्मनेपदे दंत्यादौ परतः क्सस्य वा लुग्भवति।
अदुग्ध अधुक्षत। अधुग्धाः अधुक्षथाः। अदुग्ध्वं अधुक्षध्वं। अदुह्वहि अधुक्षावहि। दिह। अदिग्ध अधिक्षत। लिह। अलीढ
अलिक्षत। गुह। न्यगूढ न्यघुक्षत। दुहादीनामिति किं। व्यरुक्षत। आत्मनेपद इति किं। अधुक्षत्। दंत्य इति किं। अधुक्षा
महि। लोप इति वर्तमाने लुग्ग्रहणं सर्वादेशार्थं तत्त्व न लघ्वर्थं अत्र स्यं नस्यैव लोपे कृते झलो झलीति सकारलोपेन सि
ध्यति स्यान्निवृत्तावपि अकारलोपस्य नास्ति एकत्र सिद्धे न तथा निवर्त्तेति दंत्योष्ठ्योपि वकारो दंत्य एव गृह्यते यदि स न
गृह्येत न तल्लोग्रहणमेव कृतं स्यात्।। ।।शमामष्टानां दीर्घः श्यनि।। ।।शमादीनामष्टानां धातूनां दीर्घो भवति श्यनि
परतः। शमु। शाम्यति। तमु। ताम्यति। दमु। दाम्यति। भ्रमु। भ्राम्यति। श्रमु। श्राम्यति। क्षमु। क्षाम्यति। मदी। माद्यति।
अष्टानामिति। किं असु असति। श्यनीति किं। भ्रमति। वा भ्राशभ्लाशेति श्यन्विकल्पः १० ।।

णामिति भावः। अकारस्येति अकारलोपस्येत्यर्थः। तथैव वा पाठः। ननु चक्रियमाणेपि लुग्ग्रहणे वा हो लुक् न भवति तन्मेव अरंत्यत्वात् दं
त्योष्ठ्योस्येसो अत आह दंत्योष्ठ्योपीत्यादि दंत्यान्त्यपोत्र विवक्षितः नेत्त एवाह तत्ति इति भावः। एवं स्मायमिति सिद्ध्यर्थं वचनसामर्थ्यमपि दर्शयति प
दिचेति। ताविति। तवर्गादाविति अर्थः। वहे स्मानि हि दंत्यादीनि सर्वाण्यात्मनेपदानि तवर्गादीनि।। ।।शमामष्टानां।। ।।शमु तमु दमु श्रमु भ्रमु द
मु क्षमू क्लमु मदी। शमादयो मी पठिता दिवादिषु सप्तकृत्वोपि मिः।। ।।२०।। ।।श्री४।। ।।श्री४।। ।।श्री४।। ।।४।।

ऊका॰पद॰३

९२

गष्ठिवु॥ ॥क्लामतीति॰चाम्राशोत्यादिना ग्रप्र॰ क्लमिग्रहणंशवर्थमिति॰ उपनिपूर्वेणोवामिरूत्वात् मामादिषुपाठष्ठिवस्यप्रयोजनःग्रप
मण्यनेनेवासिद्धत्वाततत्रमग्रहणमेवास्त्वमेणपूर्वस्यग्रहणंतंत्रं नत्वपिवानिस्यादिवदविवक्षितमित्याहचमेणदि॰ति॰ दीर्घत्वमा
ङि॰चमइतिवार्त्तिकस्यार्थ्यमेवार्थः॥ ॥क्रमः॥ ॥इहेत्यादिचोद्यहेलुकिकनइति॰ अतोहेरित्यनेनलोपइत्यादिपरीहारः नक्लमतांग
स्येत्यत्रहिप्रत्यासत्तेरयमर्थोमवस्थापितः लुमतालुप्तेप्रत्ययेयदंगंतन्निर्बंधनंकार्यंनभवतीति॰ ततःकिमित्यत्राहनचेति॥ ॥इषु॥

॥ष्ठिवुक्लम्वाचमांशितिति॥ ॥ष्ठिवुक्लमुच्चाचमइत्येतेषांदीर्घोभवतिशितिपरतः॥ष्ठीवति क्लामति आचामति॥ क्लमि
ग्रहणंशवर्थं॥चमेणइ॰ पूर्वस्यग्रहणंइहमाभूत्चमतिविचमति॥ ॥क्रमः परस्मैपदेषु॥ ॥क्रमश्चपरस्मैपदपरेशि
तिपरतोदीर्घोभवति॥क्रामति क्रामतः क्रामंति॥ परस्मैपदेष्विति किं आक्रमते आदित्यः॥ इहउत्क्राम संक्रामेति हेर्लु
कि कृतेन लुमतांगस्येति प्रत्ययलक्षणप्रतिषेधाद्दीर्घोनप्राप्नोति॥नैषदोषः लुमतालुप्तेयदंगं तस्यकार्ये स प्रतिषेधः न
चहोः क्रमिणांकिंतर्हिशपि॥ ॥इषुगमियमांछः॥ ॥इषुगमियमइत्येतेषांशितिपरतछकारादेशोभवति॥इच्छ
ति प्रयच्छति॥इषेहदितोग्रहणंइहमाभूत् इष्णाति॥येइषिमुदित्तंनाधीयतेतेचीत्यनुवर्त्तयंतितत्रप्रधानमत्राह
णंशितीत्यनेनविशेष्यतइतिवदीर्घंतितथाचमतितदादिविधिर्नभवति॥ ॥७॥ ॥७॥ ॥७॥ ॥

॥इछतीतित्तुदादित्वाच्छः इष्यतीतिइषगतौ॰इष्णातीति॰ इषआभीक्ष्ण्ये॰ येपुनरुदितमिषिंनाधीयतइतिधातुपाठे॰ इहचसूत्रे
अचीत्यनुवर्त्तयंतीति॰ तस्याचीत्यतः नन्वचीत्यनुवृत्तावपिहलःश्नः शानज्झावितिशानजादेशइष्णाणोत्यत्र छत्वंस्यादेवअजा
दित्वादित्यतआह॰ तत्रेति॰ एवंचपक्षेचीत्यनेनशिदितिविशेष्यते॥शितिछोभवति॥किंविशिष्टेअविअजादावितिइहतुशिताअजा
शेष्यतेअचिछोभवतिकिंविशिष्टेशितीतितेनतदादिविधिर्नभवतिकिंकारणमित्यतआह॥ ॥७॥ ॥७॥ ॥

द्राम॰

९२

यस्मिन्विधिरिति· नकेवलं तदंतविधौ विशेषणत्वापेक्षा अपितु हि तदादिविधावपीत्यपिशब्दस्यार्थः इषाणोसत्त्राप्रीति· नकेवलमिष्यती
त्येत्रैवेत्यपिशब्दार्थः न त्वयमजेवेति· अज्मात्रस्यात्र शित्वं नास्तीत्यर्थः। इति कृणोदेतौ॥ ॥पाघ्रा॥ ॥पापाने· पारक्षणा इत्यस्यतु
ग्रहणं न भवति लुग्विकरणत्वात् श्तिन्वासंभवात्। घ्राणं घ्रो पादाने· ध्माशब्दाग्निसंयोगयोः स्थागतिनिवृत्तौ· म्नाअभ्यासे· दाणदा
ने· दृशिरप्रेक्षणे· अगतिप्रापणयोः सगतौ भ्वादिकौ· असगतावितित्वोहोत्यादिकस्यास्य ग्रहणं न भवति शितो संभवात्· नन्वेवंशः सं

यस्मिन्विधिस्तदादावल्ग्रहणे इत्येतदपि हि विशेषणेनैवेष्यते तेन इषाणोसत्र छत्वं न भवति नत्वयमजेवशिदिति॥ ॥
पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः॥ ॥पाघ्राध्मास्थाम्नादाणदृ
श्यर्त्तिसर्त्तिशदसद इत्येतेषां पिबजिघ्रधमतिष्ठमनयच्छपश्यऋच्छधौशीयसीद इत्येते आदेशा भवंति शिति परतः। पा।
पिबति। घ्रा। जिघ्रति। ध्मा। धमति। स्था। तिष्ठति। म्ना। मनति। दाण। यच्छति। दृशि। पश्यति। अर्त्ति। ऋच्छति। सर्त्ति। धावति।
शद। शीयते। सद। सीदति। पिबतेर्लघूपधगुणः प्राप्नोति सोङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्येति न भवति। अथवा
कारांतोयमादेश आद्युदात्तो निपात्यते। सर्त्तेर्वेगितायां गतौ धावादेशमिच्छंति अन्यत्र सरति अनुसरतीत्येव भवति
॥ ॥ज्ञाजनोर्जा॥ ॥ज्ञाजन इत्येतयोर्जा आदेशो भवति शिति परतः। ज्ञा। जानाति। जायते। जनेर्दैवादिकस्य ग्रहणं॥ ११ ॥

भवइतिचेत्· उक्तमत्र वर्णीय स्यात्तत्वविघातदावितिशितीति हि कर्मधारयः शाश्वासाविच्चेति· शद्लृ शातने भ्वादिः शद्लृ विशरणेतु
दादिः षद्लृ विशरणगत्यवसादनेषु। आद्युदात्तो निपात्यत इति· यदि न निपात्यते ततो धातोरित्यंतोदात्तत्वे सति शपा सहैकादेशे क
ते एकादेशउदात्तेनोदात्त इति पिबतीति पदं मध्योदात्तः स्यात् पघेतन्माद्युदात्तं चेष्यते। वेगितायामिति संजातवेगायामित्यर्थः। पङ्कौ
वेगितो भावो वेगिता तस्यां सत्यां गतौ वर्त्तमानस्येत्यर्थः॥ ॥ ज्ञाजनोः॥ ॥ दैवादिकस्य ग्रहणमिति। न जोहोत्यादिकस्य तिः संभ
वात्। दीर्घोच्चारणं त्वस्य प्रयोजनमुत्तरसूत्रे वक्ष्यते॥ २१ ॥ ॥

॥ प्वादीनां ॥ ॥ प्वादयः क्र्यादौ पठ्यन्त इति ये तु भ्वादौ पठ्यन्ते पूञ् पवन इत्यादयः तेषां ग्रहणं न भवति कतिपये हि तत्र ह्रस्वभाविनः तेषा
मपि ह्रस्वविधिगुणेन भवितव्यं । किं च क्र्यादिकस्य ज्ञानाते ह्रस्वा निह्नसार्थं पूर्वसूत्रे दीर्घोच्चारणं न दृष्टि क्र्यादिकानां ग्रहणे प्रमाणं । हलक्षणाभि
त्यादि । न ह्युभयार्थत्वे हलक्षणस्य कश्चिद्गुण इति भावः । अपरे त्विति । ल्वादीनामनन्तरत्वादिति भावः । तथा हि एरोणोऽभयः इत्यतयोरपि
हलक्षणात्परिस्नातस्थितयोरपि ह्रस्वो भवति । यः शृणाति स हरेर्वेणुगच्छति पृणीयात् हिन्त्राधमानाय । पृणां त्वं पशुश्च प्रवसस्कन्धा आ
णीनीति । पूर्वस्मिन् पक्षे ह्रस्वान्तावेतौ पठन्ति । चोदयति येषामिति । आगतागणान्तमागणान्तः । परिहरति ज्ञाजनोर्जा इति । यदि ज्ञानाति

॥ प्वादीनां ह्रस्वः ॥ ॥ एषामेव मादीनां ह्रस्वो भवति शिति परतः । प्वादयः क्र्यादिषु पठ्यन्ते पूञ् पवने इत्यतः प्रभृति क्री
गतो वृद्धिति पाठ । केचिदिच्छन्ति वृत्करणमेतत् ल्वादीनां प्वादीनां च परिग्रहार्थमिति । अपरे तु ल्वादीनामेव परिग्रहा
र्थं वृत्करणमेतदिच्छन्ति आगणान्ताः प्वादय इति । पूञ् । पुनाति । लूञ् । लुनाति । स्तॄञ् । स्तृणाति । येषामागणान्ताः प्वा
दयस्तेषां जानातीत्यत्रापि ह्रस्वः प्राप्नोति ज्ञाजनोर्जा इति दीर्घकरणसामर्थ्यान्न भवति । जनेरपि हि जन्मादेशोऽस्
तीत्यतो दीर्घोपजनीति दीर्घत्वेन जायत इति सिध्यति ॥ ॥ मीनातेर्निगमे ॥ ॥ मीनातेरङ्गस्य शिति प्रत्यये परतो
ह्रस्वो भवति निगमे विषये । प्रमिणन्ति व्रतानि । निगम इति किं । प्रमीणाति ॥ ॥

सत्र ह्रस्वत्वं स्यात् ह्रस्वान्तमेवादेशं विदध्यात् । ननु वा सामर्थ्यं दीर्घानादेशविधानं स्यात् न स्यन्त्यथा जायत इति सिध्यति अत आह ज्ञ
ह्रस्वपीति । ह्रस्वान्तादेशविधाने पि अतो दीर्घो यञीति दीर्घत्वे जायत इति सिद्धं न अहि तु हस्तु शप्यमः सार्वधातुकस्य ततः सार्वधातु
कग्रहणमनुवर्तते न पुनस्तिङीति अत एव नेमुक् एवीतः कृतो न परादिदीर्घप्रसङ्गात् । येन हि हि करणादुभयथा हल्पूर्वत्वे
यतिते षां दीर्घोच्चारणं किमर्थं जानातीत्यत्र दीर्घो यथा स्यात् । अतो दीर्घो यञीत्येव दीर्घो भविष्यति । न सिध्यति । अङ्गवृत्ते पुनर्वृत्ताव
विधिर्निष्ठितस्य न जादेशमात्रेण निष्ठितमङ्गं भवति तत्र दीर्घोच्चारणमेव लिङ्गं आगणान्ताः प्वादय इति ॥ ॥श्री॥ ॥छ॥

॥मिदेर्गुणः॥ ॥मेघतीति श्यन्। मिघत इति भावे यक्॥ ॥जुसि च॥ ॥उदाहरणो घुलादि। श्यः श्नुः द्विर्वचनमभ्यासकार्ये सिजभ्यस्त
विदिभ्यश्चेति सेर्जुसि। अथेत्यादि। जुसभक्तस्य सीयुटः तद्ग्रहणेन ग्रहणात् असंज्ञः। सार्वधातुकमपित् ङित्वनिमित्तमिति। सार्वधातुकमाश्र
यो यस्य तत् सार्वधातुकाश्रयं तद्ङित्वनिमित्तं यस्य प्रतिषेधस्य स तथोक्तः। एतेन यासुडाश्रयङित्वनिमित्तमिति व्याख्यातं। तत्र हि प्रा

॥मिदेर्गुणः॥ ॥मिदेरिगन्तस्येको गुणो भवति शिति प्रत्यये परतः। मेघति मेघतः मेघन्ति। शितीत्येव मिघते॥ ॥
जुसि च॥ ॥जुसि प्रत्यये परत इगन्तस्याङ्गस्य गुणो भवति। अजुहवुः। अबिभयुः। अबिभरुः। अपचिनुयुः। सुनुयु
रित्यत्र कस्मान्न भवति अत्र हि ङित्वे सार्वधातुकाश्रयं यासुडाश्रयं च तत्र नाप्राप्ते सार्वधातुकाश्रयङित्वनिमित्ते प्र
तिषेधे जुसि गुण आरभ्यमाणस्तमेव बाधेत यासुडाश्रयङित्वनिमित्तं तु न बाधते तत्र हि प्राप्ते चाप्राप्ते चारभ्यत इति
॥ ॥सार्वधातुकार्धधातुकयोः॥ ॥सार्वधातुके आर्धधातुके च प्रत्यये परत इगन्तस्याङ्गस्य गुणो भवति। नयति नय
ति भवति आर्धधातुके कर्ता चेता स्तोता। सार्वधातुकार्धधातुकयोरिति किं आग्नित्वं अग्निता अग्निकाम्यति यदि हि
प्रत्यये परत इति वोच्यते इहापि स्यात्॥ २२ ॥२२॥ ॥२२॥ ॥२२॥ ॥२२॥ ॥२२॥ ॥ ॥

प्ते चाप्राप्ते चेति। बिभयुरित्यादौ प्राप्ते अजुहवुरित्यादावप्राप्ते। क्तस्त्वाचीत्यनुवर्तत इति परिहारं तरां जकारोच्चारणं तु चक्रुरित्यादौ लिटि
मा भूत्॥ ॥सार्वधातुक॥ ॥सार्वधातुकार्धधातुकयोरिति किमिति। एवं मन्यते प्रत्यय इति वक्तव्यं एवमपि हि अष्टेविषये सिद्धमिति
सतिप्रत्याहारः सनः सशब्दात् आभ्यामहिङ्णो ङकारात् अग्नित्वमिति प्रत्यय इत्युच्यमाने अत्रापि प्राप्नोति अग्निकाम्यतीति स
ङीत्युच्यमाने अपि प्राप्नोति॥ २२॥ ॥७॥ ॥७॥ ॥

॥जाग्रो॥ ॥अविचिण्मलङिन्त्युपरत इति॰ विचिण्मल्ङि इणोन्ये येण्यपान्तेषूपरत इत्यर्थः जागरयतीत्यादी निहृद्धिविषये उदाहरणानि जाग रितः जागरितवानिति प्रतिषेधविषये॰ किं पुनः कारणं वृद्धिप्रतिषेधविषयाण्येवोदाहरणानि उपन्यस्तानि तत्राह वृद्धिविषये प्रतिषेधवि षये चेति॰ अन्यत्र एवं गौणवगुणस्य सिद्धत्वात् तद्विषयएवायं गुणः तत्राण्युभयविषयः कथं चिण्मलोः प्रतिषेधोत इह वृद्धिविषये तावद्वाचति॰ ङि प्रतिषेधात्प्रतिषेधविषयेपीति॥ तस्मिन्कृत इति॥ अंगवृत्ते पुनर्वृत्तावविधिर्न इत्यनाश्रित्य अमतो णापिन भवतीति॥ किं कारणमित्या

॥जाग्रोविचिण्मलिङ्त्सु॥ ॥जागृइत्येतस्य गस्य गुणो भवति अविचिण्मलिङि त्सु परतः॥ जागरयति जागर कः॥ साधुजागरी॥ जागरं जागरं॥ जागरोवर्त्तते॥ जागरितः जागरितवान्॥ वृद्धिविषये प्रतिषेधविषये च यथा स्यादिति जागर्त्तेर्यं गुण आरभ्यते तस्मिन्कृते यात उपधायाः इति वृद्धिः प्राप्नोति सा न भवति यदि स्यादन र्थक एव गुणः स्यात् चिण्मलोश्च प्रतिषेधवचनमनर्थकं॥ अविचिण्मलाङि त्स्विति किं इग्रहजागृभ्योविनृजा गृविः चिण्॥ अजागारि॥ णल्॥ जजागार॥ ङित॥ जागृतः जागृथः॥ वीति केचिदिकारमुच्चारणार्थं वर्णयं ति॥ ॥श्री४॥ ॥श्री४॥ ॥

इयदिहीति॥ यद्यपि जागरितः जागरितवानित्यत्र गुणविधिश्चरितार्थः तथापि वृद्धिविषये येतद्विधानमित्युक्तं तत्रास्यानर्थक्यमुक्त ति॥ किंचेत्साह चिण्मलोश्चेति॥ परिगुणोकृते अत उपधाया इति वृद्धिः स्याच्चिण्मलोर्गुणप्रतिषेधोनर्थकः स्यात् अस्तु तत्रापि गुणः वृ द्धोमस्यास्ऽजागारिजजागारेति सिद्धं जाग्रुत इति॥ लट् तस् अदादित्वाच्छपो लुक् सार्वधातुकमपिदिति ङित्वं॥ अत्र वीति केचिदि ति॥ अविचिण्मलङि त्स्वित्यत्र योकारात्परइकारस्तमुच्चारणार्थं वर्णयंति तत्र यस्मिन्विधिरिति वकारएवोपात्तिषेधः॥ ॥ ॥

॥ किमर्थं पुनस्तत्र एवं वर्णयन्तीत्यत आह क्ङ्सार्वधातुकेति । जत्ताग्रवानितिनिङ्कृशिकृतीति इक्प्रतिषेधः । तत्र क्ङादिनियमादिक्प्राप्तोऽवस्थेकाद्धि
प्राप्तमितिनियमान्न भवति । येतुक्ङिति लोपाद्गुणः अयेप्रत्ययलक्षणप्रतिषेधाच्चपर्युदासं नेच्छन्ति तेषां जागरीति गुणो भवत्येव । अस्येला
दुः यथात्प्रत्ययलक्षणेनेमागमो भवति अर्णप्रमत्स्य विशेषणात् एवं क्ङितोऽपि पर्युदासः ततस्तु जागर्हि इति भवति । वोदय
ति कथं जागर्हि इति एवं मन्यते प्रसङ्गप्रतिषेधोऽयं विचिण्णल्ङित्सु न भवतीति तत्र चक्नुसि चेत्यस्याभिगुणस्य प्रतिषेधः स्यात्तथा

॥ ॥ क्ङ्सार्वधातुकेऽपिहि वकारादौ गुणो न भवति जजागृवान् । अजागरुः अहं जजागर इत्यत्र प्रतिषेधः प्राप्नोति ।
नाप्रतिषेधात् अविचिण्णल्ङित्स्विति पर्युदासोऽयं अथ वा जागर इति यः प्राप्तिर्सा वानन्तर्यादविचिण्णल्ङि
त्सु प्रतिषिध्यते यातु जुसि च सार्वधातुकार्धधातुकयोरिति च प्राप्तिः सा न प्रतिषिध्यते ॥ २३ ॥ श्री ॥ ॥

न मेत्यालिप्सोत्वाभावपक्षे गुणारम्भते सार्वधातुकार्धधातुकयोरिति तस्याऽपि प्रतिषेधः प्राप्नोतीति · परिहरति नाप्रतिषेधादिति । नायं
दोषः कुतः अप्रतिषेधात् नायं प्रसज्यप्रतिषेधः कस्तर्हि पर्युदासः अविचिण्णल्ङित्स्विति पर्युदासोऽयमिति · पर्युदासे हि विचिण्णल्ङि
त्सु नविधिर्न प्रतिषेधः ततोऽन्यत्र विधानं तेन जुसि प्रत्ययलक्षणान्तरेण प्राप्तो गुणो भवत्येव । प्रसज्यप्रतिषेधेऽप्याह अथवेति । अनन्तरस्य वि
धिर्वा भवति प्रतिषेधो वेति भावः । केचित्तु विण्णित्यत्र गुणदर्शनाद्दोषाणादिकं विनप्रत्ययं वर्णयन्ति तेषां जागृविरित्यत्र गुणः प्राप्नोति न
चवेः प्रतिषेधः वेयर्थ्यात् किपिकसोच वरितार्थत्वात् तस्माज्जागर्तेः किन्नक्रमः २३ ॥

॥पुगंत॥ ॥मेत्ता छेत्तेति। कथं पुनरत्र गुणः। यावता धात्वंतस्य यथा घोः हलोरानंतर्ये संयोगे गुर्वीति गुरुसंज्ञया लघुसंज्ञाया बाधनान्न प्राप्नो
ति भेदनमित्यादौ यावकाशो गुणो नेत्याह भस्य पादादिरिति। क्रुसनोः किल रणेनेति। त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नोः किल रणे येन
लयोजननं गृध्नुरित्यादौ जननं गृध्नुरित्यादौ गुणो मा भूदिति यदि वैवं विधेर्विषये गुरूपधत्वाद्गुणो न स्यात् क्नोः किल रणमनर्थकं स्या
त्तथा हलंताच्चेति सनः किच्चविधानस्येत्यपि जननं पित्सतीत्यादौ गुणो मा भूदिति तदपि ज्ञापकमुक्तार्थस्य। इदं तु ज्ञापकं नो पपद्य
ते सिसृक्षतीति दिदृक्षतेत्यत्र सृजिदृशोरित्यमागमो मा भूदित्येवमर्थमेतत्स्यात् तथा धिप्सतीत्यत्र नलोपार्थं तत्स्यात् तस्मात् क्नोरे
वाविकरणं ज्ञापकं। भिनत्ति छिनत्तीत्यत्र श्नमो ककारेण लघूपधमंगं तत्र धातोरिकारस्य गुणः प्राप्नोति अत आह उपधायामिति।
न ह्यत्र यः कोचिदुपधा गृह्यते किं तर्हि को गुणः हृद्यस्योपस्थानात्स्थानित्वेन संनिहितः [illegible] अपरे त्विति वर्णयंतीति संबंधः

॥पुगंतलघूपधस्य च॥ ॥पुगंतस्यांगस्य लघूपधस्य च सार्वधातुकार्धधातुकयोर्गुणो भवति। पुगंतस्य ज्लेपयति ह्रेपयति क्नोपयति। ल
घूपधस्य भेदनं छेदनं भेत्ता छेत्ता। मस्य यादेशांगावयवस्य च हलोरानंतर्यमतिलघूपधगुणो न स्यादवर्ततीति ज्ञापितमेतत् क्रुसनोः
किकरणेन त्रसिगृधिधृषिक्षिपेः क्नुः हलंताच्चेति। संयोगे गुरुसंज्ञायां गुणो भेत्तुर्न सिध्यति। विध्यपेक्षं लघोश्चापि कथं कुंडिनं

पुगंत इति। अंतशब्दः समीपवचनः यद्यपि पुगंतेत्यत्र बहुव्रीहावपि न दोषस्तथाप्येकदेशेन विशेषणार्थमयमपि तत्पुरुष एवमाम्नातः। लघ्वी
उपधेति कर्मधारये। अत्र पक्षे [illegible] लघु उपधायाः [illegible] पुगंतलघूपधमिति [illegible] किंविदुपधात्वित्यादेर्ग्रंथ
स्य पुरस्तात् संयोगे गुरुसंज्ञायां [illegible] धात्वंतस्य यथा घोः हलोरानंतर्ये सति गुरुसंज्ञायां सत्यां गुणो भेत्तुर्न तु शब्दस्य न सिध्यति। परि
हरति विध्यपेक्षमिति। इदं विधानमिति विशेषः। लघूपधाधोविहिते सार्वधातुकार्धधातुके तयोरंगस्य गुण इत्यर्थः। पंचम्यां तु कथं विधानं विशेष्यत इति चे
को दोषः लघूपधस्य ये सार्वधातुके केवते येन तस्माद्विहिते इत्युपपद्यते। लघोश्चापीति लघूपधायाश्चापि [illegible] उपधा शब्दस्तु [illegible]
प्रयुक्तः। कथं कुंडिनेति। अंगाधिकारे नुमो विधानात्कृत एव नुमि प्रत्यये लघूपधा [illegible] कुंडितेत्यादौ गुणः प्राप्नोतीति यदि
विधानं विशेष्यतइत्यर्थः॥ ॥८७॥ ॥

परिहरन्ति धातोर्नुमि सति हि तेनायं चरी। यस्मात्तत्र धातोर्नुम्न्याय्यस्तस्माद्धिलर्थ॥ उक्तं हि तत्र धातुग्रहणस्य प्रयोजनं धातूपदेशावस्थायामेव नुम् यथा स्या
दिति तत्तत्र प्रागेव नुम् कृत्स्ना स्यात्॥ न चासौ लघूपधाद्विहितो भवति किं कथं रञ्जेरिति। यदि च षष्ठीनिर्दिष्टेऽपि विधानं विशेष्यते तेन रामन्त्रापि प्रसङ्गः न तत्र धातु
र्धातूपधायाः सकारोपधाद्विहिते प्रत्यये विधीयमाना वृद्धी रञ्जेर्न स्यात् प्राक् प्रत्ययोत्पत्तेर्नकारोपधत्वात् रागः इति घञि च भाक्करणे घो रिति नकारलोपः। यथा
स्युपधाया आकारस्य वृद्धिः ह्यनेन चतनः प्रत्ययस्य विधानं सं भवति तथाप्यकारोपधाद्विधानं न त्वेवोपधाया विधानं मन्यते। स्यां हि स्त्रिष्वोरिति। परसंस्य
रोऽन्वे अवोदैधोद्मप्रश्रथहिमश्रथाः इति स्यदिश्रं थ्योर्वह्म भागं निपातयति तत् ज्ञापयति भवत्येवंजातीयका नोहद्धिरिति। तत्र हि नलोपार्थं स्युभावार्थं
च निपातनमाश्रयणीयं यदि च हृद्धिविधौ विधाने विशेष्येत तदोहद्धिप्रसंगाभावात् निपातनाश्रयणमनर्थकं स्यात् नलोपस्य सिद्धये विधिरेवाश्रय
णीयः अनेकप्रयोजनं सिद्धये हि निपातनाश्रयणं। अनल्लोपेति। अन्तस्य योऽल्लोपः शोर्दीर्घत्वं शिदीर्घत्वं तयोर्द्वंद्वः अनल्लोपशिदीर्घत्वे। विषये

धातोर्हि नुमः कथं रञ्जेः स्यदिश्रं थ्योर्निपातनात्। अनल्लोपशिदीर्घत्वे विषये क्षेनसिध्यतः। अम्यस्तस्य पदाहाविलङ्थेति कृतं
भवेत्। कुसनोर्यत्कृतं किं त्वं ज्ञापकं स्याल्लघोर्गुणे। उपधानुरोयगत्यतेलतोभिनत्तीतिगुणो न भवति। अपरे तु पुकिमन्तगुण
तः लघीउपधागुणं तस्य लघूपधामितिसूत्रार्थं वर्णयन्ति॥ २४ ॥ ॥ श्री ७॥ ॥ श्री ४॥ ॥ श्री ४॥ ॥ श्री ७॥ ॥

सेनाभिध्यतः यदि षष्ठीनिर्दिष्टेऽपि विधानं विशेष्येत अल्लोपो राज्ञ इत्यादावेव स्यात् अस्याः अस्थ्नेद धाद् घ्ने इत्यादौ न स्यात् शोर्दीर्घत्वं च सामानि
इ सामानीवेव स्यात्कुर्वाणीत्यादौ तु न स्यात् तस्मात् षष्ठीनिर्देशेषु विहितविशेषणाग्रहणे दोषप्रसंगात् दुर्णाधेर्चुर्नसिद्ध्यतीति। एवं तर्हि ज्ञापकमस्ति
द्वृपदस्यं नाभ्यस्तस्याचीमजग्रहणं करोतीति ज्ञापयति भवत्येवंजातीयके विषये गुणा इति तस्य हि प्रयोजनं नेनेक्तीत्यादौ हलादौ गुणप्रतिषेधो
माभूदिति। यदि च हलादावलघूपधत्वात् गुणो न स्यात् तदा गुणप्राप्त्यभावात्किं तन्निवारणार्थेनाजग्रहणेन। नैतदस्ति ज्ञापकं। अभ्यस्तस्य पदा
हाविलङ्थेति कृतं भवेत्। अभ्यस्तस्याजादौ प्रतिषेधमाहेति यत्तत्तल्लङर्थं कृतं भवेत्। यत्र हलादिर्लुप्यते अनेनेनिजितस्मात्र ज्ञापकं। एवं त
र्हि कुसनोर्यत्कृतं किं त्वं ज्ञापकं स्याल्लघोर्गुणे। आस्मानमतत्॥ ॥ २४॥ ॥ श्री ४॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥

॥नाभ्यस्तस्य॥ ॥नेनिजानीत्यादि॥ लोट् मेर्निः आडुत्तमस्य पिच्च। श्यः श्लुः द्विर्वचनं निजां त्रयाणां गुणः श्लौ। अनेनिजमित्यादि। लङ् मिपो म्भावः। वेदानीति विद् ज्ञाने। लोट् विधथायोगं पूर्ववत्। शपो लुक्। नेनेक्तीति। लट् तिप् कृत्वा। पिद्ग्रहणमुत्तरार्थमिति। तणहरमपिपितिपध्यास्यत्। हृह तु पितोऽत्रापि सार्वधातुकमपिदिति ङित्वाद्गुणवृत्तिप्रमेव प्रतिषेधेन। निनेजतीत्यत्र सचलिटश्चेत्यार्द्धधातुकसंज्ञः। जुजोषदिति। जुषी प्रीतिसेवनयोः। लेट्। व्यत्ययेन परस्मैपदं तिप्। इतश्च लोपः परस्मैपदेषु। लेटोऽडाटौ। सिब्बहुलं अत्सयेन शपः श्लुः द्विर्वचनं। पद्यत्र गुणप्रतिषेध उच्यते पस्य शातेरित्यादौ लघूपधगुणत्वमिष्यते नन्वप्राप्नोतीति तस्मादभ्यस्तानामुपधायाह्रस्वत्वमेव विधेयं न गुणप्रतिषेधः कथं नेनिजानीत्यादि गुणो हनो

॥नाभ्यस्तस्याचि पिति सार्वधातुके॥ ॥अभ्यस्तसंज्ञकस्याङ्गस्य लघूपधस्याचि पिति सार्वधातुके गुणो न भवति। नेनिजानि। अनेनिजं। वेविजानि। अवेविजं। परिवेविषाणि। पर्यवेविषं। अभ्यस्तस्येति किं। वेदानि। अचीति किं। नेनेक्ति। पिद्ग्रहणमुत्तरार्थं। सार्वधातुक इति किं। नोनेजाल। लघूपधस्येत्येव जुहवानि। अजुहवं। बहुलं छन्दसीति वक्तव्यं। जुजोषत्। जुजोषदितिप्रयथाप्राप्तं। पस्पशाते चाकशीतिवावशीति। पद्कुः किं छान्दसमुपधाह्रस्वत्वं दृष्टमं पस्पशात इत्यत्राभ्यासह्रस्वत्वं च॥ ॥छ॥ ॥

उपधाह्रस्वत्वं एतच्च रघुप्रभृतारेवोक्तसिद्धमिष्यते तस्माद्भ्यस्पशातेऽपादित्यादिशिर्वार्त्तिककारवचनादृषपाठितांपि धातुः तस्माल्लेट्व्यत्ययेनात्मनेपदं टेरेत्वं लेटोऽडाटौ विस्मादृशपो बहुलं छन्दसीति श्लुः द्विर्वचनं। अथवा यङ्लुकि छान्दसमभ्यासस्य ह्रस्वत्वं। चाकशीतीति। काशृ दीप्तौ यङ्लुक् लट् तिप् यङो वेतीडागमः। वावशीतीति। वाशृ दीप्तौ पद्। लुक् लङ् शात्रादेशः। इपूशः छान्दसं ह्रस्वत्वमिति। यदि तु गुणनिषेधं प्रत्याख्यायोपधाह्रस्वत्वमुच्यते ननु दानन्दीतीत्यादौ अट्टुपधे रपरे गुणे कृते ह्रस्वभावित्वमुपधानामतीति रूपं न सिध्येत् तस्माच्छान्दसमेवोपधाह्रस्वत्वमेष्टमभिभावः॥ ॥छ॥ ॥

॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

।।प्रकृत्यंतरणामेवेति।सशब्दाधनस्पर्शयोः कशागतिशासनयोः वशकांतौ।। ।।मुमुवोः।। ।।अभूदिति।लुङ्गातिस्थेत्यादिनासिचोलुक्।मु
वावहे मुमामहे इति। श्रण्णगर्भविमोचने लोट्। रेत्वं एतऐ आट् नमस्यापि स्वशपोलुक् उवङादेशः। मुवतिस्सयत्पोत्विति। पूप्रेरणेतुदादिः पूङ्
प्राणिप्रसवे दिवादिः।भवतीतिशपि गुणः।अतिभविषीष्टेति आशिषि लिङ्।लिङाशिषीत्यार्द्धधातुकसंज्ञाकर्तरिकर्मण्यतिहारइत्यात्मने
पदं।अथेति।प्रकृतिग्रहणेयङ्लुगंतस्यापिग्रहणात्प्रसंगः।ज्ञापकादितिस्तेस्तुनिपातनाभावाद्गुणनिषेधोभवसोखुवीतीति।। ।।उतोवृ

।।प्रकृत्यंतराणांयास्यपि कृशिवशीनामेतानिरूपाणि।। ।।मृमुवोस्तिङि।। ।।भुवस्त्वेतयोस्तिङि सार्वधातुकेगुणोनभ
वति।अभूत अभूः अभूवं।मुवेमुवावहेमुमामहे।एतेलुग्विकरणास्तिदंग्रहणंमुवतिस्वयस्तोरिकिरणोनतिङोप्यवधानंवि
करणास्येववाङि लाङि लाङगुणाभावःसिद्धः।।तिङीतिकिंभवति।सार्वधातुकइत्येववक्ष्यतिभविषीष्ट।अथवौभवीतिपङ्लुकि
गुणप्रतिषेधःकस्मान्नभवति।ज्ञापकात।यदयंबोभूत्वितिगुणाभावार्थंनिपातनंकरोति।। ।।उतोवृद्धिर्लुकिहलि।। ।।
सार्वधातुकेपितीतिवर्त्ततेउकारांतस्यांगस्यवृद्धिर्भवतिलुकिसतिहलादौपितिसार्वधातुके।यौतियौषियौमि।नौतिनौषिनौ
मि।स्तौतिस्तौमि।उतइतिकिंएतिएषिएमि।लुकीतिकिंसुनोतिसुनोषिसुनोमि।हलीतिकिंयवानिस्तवानि।पितीत्येवयु
तःरुतः।अपिस्तुयाद्राजानमित्यत्रहिङिचपित्नभवतीतिपित्वप्रतिषेधाद्वृद्ध्यभावः।नाभ्यस्तस्येत्यतदिहानुवर्त्ततेयोयोति
नोनोतीत्येवमाद्यर्थं।। ।।ऊर्णोतेर्विभाषा।। ।।ऊर्णोतेर्विभाषावृद्धिर्भवतिहलादौपितिसार्वधातुके।प्रोर्णौतिप्रोर्णोति।
प्रोर्णौषिप्रोर्णोषि।प्रोर्णौमिप्रोर्णोमि।हलीत्येवप्रोर्णवानि।। २५ ।। ।।
खि।। ।।यवानीतिलोडुत्तमैकवचनं।अपिस्तुयादिति अपिःसंभावनेकर्मप्रवचनीयस्सउपसर्गात्सुनोतीत्यादिनाषत्वंनभवति।ङिच्चपि
न्नभवतीति।पामुदादेःसार्वधातुकस्यसाक्षाङ्छिष्टङित्वमनवकाशंतिवादीनांतुपित्वंलकारांतरेषुसावकाशंतेनङिच्चपिन्नभवतीतिपि
च्चाङित्नभवतीतिवचनद्वयस्सत्वावेपिङिच्चपिन्नभवतीत्येतदेवात्रप्रवर्त्ततइतिभावः।।क्ङितिचेतिप्रतिषेधस्तत्रनलभ्यतेकिंकारणंभत्वेव
मिकूसंशब्देनयावृद्धिस्तस्याःसप्रतिषेधःरहतुडतइतिनिर्दिष्टस्थानिकत्वादिकपरिभाषानोपतिष्ठते।। ।।२५।। ।।७।। ।।

७का॰प॰२०३

९७

॥पुगणोऽष्टको॥ ॥ननु च हलीति वर्त्तते पितीति च ज्ञंगेन च प्रत्यय उपस्थाप्यते तत्र हलात्मके प्रत्यये पिति विधीयमानो गुणो ऽष्टकः एव भवि
ष्यति नार्थो ऽष्टकग्रहणेनेत्यत आह हलीति वर्त्तमान इति। अष्टकग्रहणं त्वेवमर्थं क्रियते यद्धलादौ मा भूदिति यदि त्वेवं परिभाषा न स्यात् तदाष्ट
कग्रहणं न कुर्यात् कृते तु ज्ञापयति भवत्येषा परिभाषेति। इदं त्वत्र वक्तव्यं तदेतन् विधिनिवृत्त्यर्थमष्टकग्रहणं कस्मान्न भवतीति तदं न विधौ हलि
मिपो ऽभावे ऽपि प्रसंगः स्यात्। ननु भवत्येव तत्र गुणः। कथं भवति। यस्य पूर्वत्र वृद्धिविधावपि तदन्तविधिरेव भवति तदेतदष्टकग्रहणे कथं
नदाविविधेर्नापकमिति चिंत्यं। नाष्टकः इत्युभमाने नंतरायाविभाषितापार्वः प्रतिषेधः स्यान्निसात्वृद्धि ४ स्यादेवन स्याद्गुणाग्रहणे॥ ॥न
राहरम॥ ॥तरोटीति इपि कृते ऽभ्यासोकारेण सह गुणः होढः सषस्तथोर्धोधिः ष्टुत्वं ढलोपः। तृणे क्षीति। षढोः कः सि। अन्तरोढि ति। ल

॥गुणोऽष्टको॥ ॥तुणेति धातोरष्टके हलि मि ति सार्वधातुके गुणो भवति। प्रोर्णोति प्रोर्णोः। हलीति वर्त्तमाने यदष्टकग्रह
त्रयुः संज्ञेदयुः दिवान्विशातिमुस्रयुः। अपुत्रस्येतिकिं। पुत्रीयंतः सुदानवः। अपुत्रादीनामितिवक्तव्यं। जनीयंतो
न्वग्रवः।। ।।दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति।। ।।दुरस्युः द्रविणस्युः वृषण्यतिरिषण्यतिइत्येतानिछंदसिनि
पात्यंते। दुष्टशब्दस्यक्यचिदुरसभावोनिपात्यते। अन्येनादुरस्युः दुष्टीयतीतिप्राप्ते। द्रविणशब्दस्यद्रविणसभा
वोनिपात्यते। द्रविणस्युर्विपन्यया।। ।।द्रविणीयतीतिप्राप्ते। वृषशब्दस्यवृषणभावोनिपात्यतेवृषण्यति। व
षीयतीतिप्राप्ते। रिष्टशब्दस्यरिषणभावोनिपात्यते रिषण्यतिरिष्टीयतीतिप्राप्ते।। ।।अश्वाघस्यात्।। ।।
अश्वअघइत्येतयोः क्यचिपरतश्छंदसिविषयेआकारादेशोभवति। अश्वायंतोमघवन्। मात्वावृकाअघा
घायवोविदन्।। एतदेवात्ववचनंज्ञापकंनछंदसीतिदीर्घप्रतिषेधोपिभवति।। ।।श्री।। ।।४०।।

जनीयंतः लटः शत्रादेशः उगिदचामितिनुम् अपरेत्वाहुः जनीमिच्छंतोजनीयंतः जनीतिवधूरुच्यतइतितत्रादिष्टग्रहणस्य
प्रयोजनांतरंमृग्यं।। ।।दुरस्युः।। ।।दुष्टीयितेतिप्राप्तेइतिभाष्यायांप्रामिरुच्यतेतत्रतुप्रत्ययाभावात् तत्समानार्थत्वप्रयु
क्तःप्रायेणतुलड्नयच्यतेतत्रप्रक्षीतीमात्रेतात्पर्यं।। ।।अश्वाघस्यात्।। ।।एतदेवेत्यादि। पूर्वमिवेतव्याख्यातं।। ।।

॥देवसुम्नयोः॥ ॥वेदवचनोत्र यजुःशब्दः न मंत्रवचनः। कठानामिदं काठकं गोत्रचरणाद्वुञ् काठके यजुषि कठशाखायामित्यर्थः॥ एवं च कृत्वा
आम्नातं केयजुषि मंत्रे कठशाखायामात्वं भवति तथा ऋग्वेदेऽपि भवति स चेन्मंत्रः काठके दृष्टः। देवान् जिगाति सुम्नयुरिति बह्वृचानामप्यस्ति कठशा
खातो भवति प्रसुद्धारणं अनंतावेवेदः॥ ॥घतिस्यति॥ ॥दो अवखंडने षो अंतकर्मणि मा माने माङ् माने मेङ् प्रणिदाने त्रयाणामपि

॥देवसुम्नयोर्यजुषि काठके॥ ॥देवसुम्न इत्येतयोः क्यचि परतः आकारादेशो भवति यजुषि काठके। देवायंतो यजमाना
यः सुम्नायंतो हवामहे। यजुषीति किं। देवां जिगाति सुम्नयुः। काठक इति किं सुम्नयुरिदमासीत्॥ ॥कव्यध्वरपृतनस्यर्चि लो
पः॥ ॥कवि अध्वर पृतना इत्येतेषामंगानां क्यचि परतो लोपो भवति ऋग्विषये। कव्यंतः सुमनसः। अध्वर· अध्वर्य
ति: पृतना। पृतन्यंतस्तिष्ठंति॥ ॥घतिस्यतिमास्थामित्ति किति॥ ॥घतिस्यतिमास्था इत्येतेषामंगानामिकारादे
शो भवति तकारादौ किति प्रत्यये परतः। घति। निर्दितः। निर्दितवान्। स्यति। अवसितः अवसितवान्। मा। मितः मित
वान्। स्था। स्थितः स्थितवान्। तीति किं। अवदाय। किति इति किं। अवदाता॥ ॥शाछोरन्यतरस्यां॥ ॥शाछा इत्येतयोर
न्यतरस्यामिकारादेशो भवति तकारादौ किति। शा। निशितं निशातं। निशितवान् निशातवान्। छा। अवछितं अ
वछातं अवछितवान् अवछातवान्। श्यतेरित्वं व्रते नित्यमिति वक्तव्यं। संशितो ब्राह्मणः। संशितव्रत इत्यर्थः॥ ८

हितां गामादाय ग्रहणेषु विशेषात्। अवसायेति ल्यप् अवदातेति तच घतिस्यतीति श्रियानिर्देशो घानुविशेषणार्थः॥ ॥शाछोः॥ ॥
शो तनूकरणे छो छेदने इत्येतौ इति। व्रत इति विषयो निर्दिश्यते नोत्तरपदं तेन संशितो ब्राह्मण इत्यत्रापि नित्यमित्वं भवति। संशित इ
ति व्रतविषय यत्नवाननुमतं। संशितव्रत इति बहुव्रीहिः सम्यक् संपादितव्रत इत्यर्थः॥ व्रतादन्यत्रापीत्वं भवति व्रते तु नित्यमिति
संशितशब्दस्य सामान्यशब्दत्वादविरुद्धो व्रतशब्दस्य प्रयोगः ८

॥अवस्थितविभाषाविज्ञानात्सिद्धमिति। क्वचिन्नित्यं प्रवृत्तिः क्वचिद्विकल्पेन क्वचिन्नैव प्रवृत्तिरित्येवं त्रिविधमवस्थितविभाषाणामवस्थित
विभाषागणमवस्थितविभाषाणां दिङ्मात्रं श्लोकेन दर्शयति देवत्रात इति। किंच ज्ञोच संज्ञायामिति ऋः नुट् विदो दत्रेति नत्वं संज्ञायां न भवति
देवग्रहणस्योपलक्षणत्वाद्देवत्रात इत्यादावपि संज्ञायां नत्वाभावः क्रियाशब्दे तु त्रातं त्राणमित्युभयं भवति। गल इति अचि विभाषेति
लत्वं प्राण्यङ्गे नित्यं भवति गिरत्यन्नमिति गलः विषये तु नैव भवति गीर्यते शब्दो यथा ध्वनिरिति गरः क्रियाशब्दे तूभयं भवति गरणं गलनमिति ग्रा
ह इति विभाषा ग्रह इति णप्रत्ययो जलचरे नित्यं भवति ग्राहः इति आदित्युपचारेण नैव भवति ग्रहणार्थ इति क्रियाशब्दे तु पूर्ववत्। इति योग इति

॥अवस्थितविभाषाविज्ञानात्सिद्धं देवत्रातो गलो ग्राह इति योगे च सद्विधिः। मिथस्ते न विभाष्यन्ते
गवाक्षः संशितव्रतः॥ ॥दधातेर्हिः॥ ॥दधातेरङ्गस्य हीत्ययमादेशो भवति तकारादौ किति प्र
त्यये परतः। हितः हितवान् हित्वा॥ ॥जहातेश्च क्त्वि॥ ॥जहातेरङ्गस्य हीत्ययमादेशो भवति क्त्वा
प्रत्यये परे। हित्वा हितः हितवान् हित्वा॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥श्री४॥ ॥छ॥

हन्तीति पलायते वर्षतीति धावतीत्यादि वृत्तिप्रयोगे लक्षणहेत्वोः क्रियाया इति शतृशानचौ न भवतः। मिथ इति। एकस्मिन्विषयेन वि
कल्पन्ते किंतु विषयभेदेन एतच्चावगतिपक्षस्योपपद्यते तत्र हि सर्वलक्ष्यजातं युगपदभिसमीक्ष्य सदुपदिश्यते भावोऽभावश्च तत्र
तयोर्विषयभेदेन प्रवृत्तावपि समुदायेद्वयं प्रवृत्तं भवति असंकीर्णत्वं तु प्रयोगवशात् अस्येतमं गवाक्ष इति वातायने अवङ् स्फोटायन
स्येति नित्यमवङ् भवति प्राण्यङ्गे गोरक्ष इत्यत्र न भवति अन्यत्र विकल्पो गवाग्रं गोऽग्रमिति॥ ॥दधातेः॥ ॥यद्यपि हिनोतेर्हित इत्या
दिसिद्धं दधातेस्तु धीत इत्यादि निवृत्त्यर्थं सूत्रारम्भः। अपिधानिर्दिष्टो धेरो माभूदिति यत्त्वमाने धेरोप्यनुकरणं संभाव्येत यथा धेराविस

॥ जहातेः॥ ॥ इदमपि वचनं जहातेर्हित्वेति मा भूदिति। अपि निर्देशस्तु प्रयोजनं वक्तावेव दर्शितं। पङ्क्तिं कित्वाहित्वेति भवति॥ ॥
विभाषा॥ ॥ पूर्वसूत्रांरंभात् यमारंभः अन्यथा हि नोति जहातेश्चेत्यत्र द्व्यर्थं सिद्धं। हात्वेति छान्दसत्वादीत्वाभावः॥ ॥ सुधित॥ ॥

॥ जहातेश्च क्त्वि॥ ॥ जहातेरंगस्य हीत्ययमादेशो भवति क्त्वाप्रत्यये परतः। हित्वा राज्यं वनं गतः। हित्वा राज्यं वनं गतः॥
हित्वा राज्यं वनं गतः। हित्वा गच्छति। जहातेरिति निर्देशाज्जिहीते र्न भवति हात्वा॥ ॥ विभाषा छन्दसि॥ ॥ जहातेरं
गस्य छन्दसि विषये विभाषा ही इत्ययमादेशो भवति क्त्वाप्रत्ययमादेशो भवति क्त्वाप्रत्यये परतः। हित्वा शरीरं यात
व्यं। हात्वा॥ ॥ सुधितवसुधितनेमधितधिष्वधिषीय च॥ ॥ सुधित। वसुधित नेमधित धिष्व धिषीय इत्येतानि
छन्दसि विषये निपात्यन्ते तत्र सुधित वसुधित नेमधिते ति सु वसु नेम पूर्वस्य दधातेः क्तप्रत्यये इत्वमिडागमो वा
प्रत्ययस्य निपात्यते। गर्भं माता सुधितं सुहितमिति प्राप्ते। वसुधिष्व धिषीय इत्येतानि छन्दसि तमग्नो जुहोत जेव
सुहितमिति प्राप्ते। नेमधिता हवन्ते नेमहिता इति प्राप्ते। धिष्वेति लोण्मध्यमैकवचने दधातेरित्वमिडागमो वा
प्रत्ययस्य द्विर्वचनाभावश्च निपात्यते। विष्वसोमं धत्स्वेति प्राप्ते। धिषीयेति आशिषि लिङ्यात्मनेपदे उत्तमपुरु
षैकवचने दधातेरित्वमिडागमो वा प्रत्ययस्य निपात्यते। विधीषीय। धासीयेति प्राप्ते॥ १० ॥ ॥ श्रीः ॥

॥ इडागमो वेति। पक्षाइडागमस्तदा न्यातोलोप इटि चेत्याकारलोपः। वसुधितमिति कर्मधारयः। किमयं षिद्दृश्यते उत त्वेतं वसुधि
तिं। निरेकं नेमधितमिति। अपमपि कर्मधारयः। धत्स्वेति श्नाभ्यस्तयोरात इत्याकारलोपः दधस्तथोश्चेति भष्भावः॥ १० ॥
॥ श्रीः॥ ॥ श्रीः॥ ॥ ७ ॥

॥दोदद्॥ ॥धीतइति॥घुमास्थेति सूत्रेणत्वं धेटएतद्रूपमिति॥स्थातेस्तु दधातेर्हिरिति हिरादेशो भवति॥दात्तमिति॥दाञ् दवने लूनमित्य
र्थः अवदात्तमिति दैप् शोधने॥ अपमादेशस्थानेइष्यतइति॥कुतइत्यत आह एवं घुक्तमिति॥यद्यपि दकारः श्रूयते तथापि संहितायां
तकारादीनामपि त्रिश्रुतेः कृतेऽएतस्य रूपस्य संभवात्तु सर्वापि श्रवणं संभवः॥यद्ययमादेशस्तकारांतः स्यात्तु दत्त मित्यत्र दस्ती ति
दीर्घत्वं स्यात् तदादेः सेतस्य यस्मात्तस्मिन्निति हितत्रार्थः॥ अथ दकारांतः स्यात्माभ्यामिति नत्वं प्रसज्येत अथ धकारांतः झषस्तथोर्धोध
इति धत्वमापद्येत थांते दोष इति॥न जोत्र प्रश्लेषः तस्मात्थांतइति निगमनात् यदि त्वितिदस्तीत्यत्र द्वोपश्लोदादइसेतस्य यस्तकारांत

॥दोदद्घोः॥ ॥दाइत्येतस्य घुसंज्ञकस्य ददित्ययमादेशो भवतितकारादौ किमिति प्रत्ययेपरतः दत्तः दत्तवान् नद
त्तिः इति किं धीयतः धीतवान् धेटएतद्रूपे धीदीति किंदात्तं वर्हिः॥ अवदात्तं मुखं॰ अयमादेशस्थानेइष्यते
एवं घुक्तं तांते दोयोर्दीर्घत्वं स्याद्दांते दोषो निष्ठानत्वं धांते दोषो धत्वप्राप्तिस्थांते॰ दोषस्तस्माच्थांतइति॰ य
दि तु दस्ती तितकारादेर्दीर्घत्वं तदा तांते प्यदोषः दांतधांतयोरपि मन्निपातलक्षणो विधिरनिमित्तं तद्वि
घातस्येति नत्वधत्वे न भविष्यतइत्यदोषः॥ अवदत्तं विदत्तं प्रदत्तं चादिकर्मणि॰ सुदत्तमनुदत्तं चनिदत्त
मिति चेष्यते॰ अचउपसर्गात्तइतिप्राप्ते निपात्यंते॰ अनुपसर्गावाएते अवादयः क्रियांतरविषयावेदितं

आदेशस्तकारादिर्वेति तत्र द्वितीयपक्षेनापि दोषः॥दांतधांतयोरपीति॥तकारादि प्रत्ययमात्रं निपातेन भवन्न्यायेन तद्वियातस्य
निमित्तं भवति॥अवदत्तमित्यादि॥आदिकर्मणीत्येतत्प्रदत्तमित्येतस्य विशेषणं नेतरेषामसंभवात्॥इतिचेष्यतइति चकाराद्यथा
प्राप्तं चतेन अवत्तं वित्तं प्रत्तमित्याद्यपि भवति॥अनुपसर्गावाएतइति॥कथमनुपसर्गत्वमित्यत आह क्रियांतरविषयाइति॥ अवगतंद
त्तमिति॥मिनाः वादीनां योगाः न तत्र यत्क्रियायुक्ताः प्रादयः तं प्रतिगत्युपसर्गसंज्ञा भवंतीति दत्तानि प्रत्युनुपसर्गत्वं॥ ॥

अचुउप॥ ॥तद्रूपमिति। तकारे कार उच्चारणार्थश्च प्रत्तमिति। तत्राकारस्य तकारे दकारस्य चर्त्वे नीत्तमिति दत्तीति द्वत्तीतिदी
र्घत्वं आदेरलः प्राप्नोतीति आदेः परस्येति वचनात्। अचउपसेतदावर्त्ततइति। यद्वास्मेति वर्त्तते कप्रकृतं अस्य चाविति दो दच्छेदिस्य
मपि दद्भ्यो वर्णस्य प्राप्नोति तत तश्चरत्नमिति संयोगादि श्रूपेत। एवं तस्यैवं वस्वामि दोअद्वो रिति दोय आकपस्तस्या द्भवतीति। द्वि
तकारकोवेति। अलोंत्यस्येत्येत सद्भावपगदो आदेः परस्येत्यनेकाल्शित्सर्वस्येति तयोर्विप्रतिषेधेपरं प्रवर्त्तते। अयोभी

॥अचउपसर्गात्तः॥ ॥अजंताद्दुपसर्गाद्दुत्तरस्य दा इत्येतस्य तइत्सतइत्सयमादेशो भवति तकारायेकिति·
प्रत्तं अवत्तं नीत्तं परीत्तं· अ[illegible] च इति किं निर्दत्तं दुर्दत्तं उपसर्गादिति किं दधिदत्तं मधुदत्तं· घोर्लोपविअवदा
त मुख: उपसर्गादिति पंचमी निर्देशाद्दादेरल: प्राप्नोति· तत्र समाधिमाह· अच इत्येतदावर्त्तते· तत्रैकं पंच
म्यंते उपसर्गविशेषणार्थं अपरमपि षष्ठ्यंतं स्थानि निर्देशार्थमिसाकारस्य स्थाने तकारो भवति· द्वितका
रकोवासंयोगोपमादिश्यते सोनेकाल्त्वात्सर्वस्य भविष्यति· अयोभी सत्र पंचम्यंतमच इत्यनुवर्त्तते तेन
पकारमात्रस्य भविष्यति· घते रित्वादचउपसेतद्भावति विप्रतिषेधेन अवत्तं प्रत्तं जुहोति॥ ११ ॥ ॥

त्यत्रापितर्हि सिवदिश प्रसंगोतथ्याह अयोभीसत्रेति। अत्र द्वयोस्तकारयो रेकस्य संयोगांतलोपः पूर्वस्य जश्त्वं। अत्र केचिदाहुः
अवश्यमत्राचउपसेत्यनुवर्त्स्यं अन्यथा लूञ् अः दोर पूलवासामि त्यत्रापि स्यादिति तन्न लुप्ते पकारेनाशपूव इति नात्र भविष्यति
भूत पूर्वगतिर्युक्ता न समसां प्रतिकसंभवो नप्रसय्याप्रसपयो रित्स्याप्यत्र संभवः। द्वयोरन्तल्पकक्षत्वात्प्रसंगयो न हि शुत १

॥ ११ ॥ ॥७॥ ॥

।ऋपोभि॥ ॥स्ववद्भिरिति। अवतेरसुनप्रोऽभलमवेयिर्यान्तेस्ववः। तुइति सौत्रोधातुः स्वन्तवोयेभ्यान्तेस्व तवसः। माद्भिरिति पद्लोमा
सितिमासशब्दस्य मासादेशः। उषद्भिरिति। मिथुनेः मिर्वसेः क्विबेत्यसिप्रत्ययः॥ ॥सस्या॥ ॥वत्स्यतीत्यादि। घसनिवासे लृट् लृ
ङ्‌ सनः जिघत्सतीति लुङ्‌ सनोघस्लृ। आस्से वस्से इति आस उपवेशने वस आच्छादने अदादी अनुदात्तेतौ। अतङी लुक्प्रमानेक्र
ति वत्सी घेस्यत्रापि न स्यात्॥ ॥तासस्त्योः॥ ॥व्यतिसइति कर्त्तरि कर्मव्यतिहार इत्यात्मनेपदं शपो लुक् असोरल्लोप इ सकार

॥ऋयोभिः॥ ॥अपइत्येतस्यांगस्यभकारादौप्रत्ययेपरतस्तकारस्य मादेशो भवति· अद्भिः अद्भ्यः भीतिकिं अप्सु· स्व
वस्स्वतवसोर्मासउषसश्च नकारादेश इष्यते छन्दसि भकारादौ· स्ववद्भिः स्वतवद्भिः माद्भिष्ट्वं द्रोवृत्रहा समुषद्भिरज्ञा
यथाः॥ ॥सः स्यार्द्धधातुके॥ ॥सकारान्तस्यांगस्यसकारादावार्द्धधातुके परतस्तकारादेशो भवति· वत्स्यतिअ
वत्स्यत· विवत्सतिजिघत्सति· सइति किंवक्ष्यति· सीति किं घासः वासः आ ईधातुक इति किं आस्से वस्से॥ ॥
तासस्त्योर्लोपः॥ ॥तासेरस्तेश्च सकारस्य सकारादौ प्रत्यये लोपो भवति· तासेः कर्त्तासि कर्त्तासे· अस्तेः· त्व
मसि व्यतिसे· अस्तेरकारसकारयोर्लुप्तयोः सेइति प्रत्ययमात्रमेवेदं पदं॥ ॥रिच॥ ॥रेफादौ प्रत्ययेपरतस्ता
सस्त्योः सकारस्य लोपो भवति· कर्त्तारौ कर्त्तारः अध्येतारौ अध्येतारः॥ ॥हएति॥ ॥तासस्त्योः सकारस्य ह
कारादेशो भवति एति परतः। कर्त्ताहे कर्त्ताहे। अस्तेः व्यतिहे॥
लोपः। प्रत्ययमात्रमेतत्सइमिति तेन सात्पदाद्योरिति षत्वप्रतिषेधइतिभावः॥ ॥रिच॥ ॥अस्तेरुदाहरणं न प्रदर्शितं। रेफा
देरसंभवात्॥ ॥हएति॥ ॥एशिहकारो न भवति एधामासे इति किं कारणं तासेर्य एकारः संभवति तत्रैवास्तेरपि कुत्र्चासेः
संभवति उत्तमैकवचनं। अपर आह उत्तमैकवचनं सार्वधातुकं चेति ते न सुस्तोहं किलैधामासे उत्तमे ह्यार्द्धधातुके न भवतीति॥

॥पीवर्णयोः॥ ॥यकारेइकारउच्चारणार्थः॥ ॥लोपो भवतीतिहकारश्लर्नंतरोऽप्यस्वरितत्वान्नानुवर्त्तते· आदीध्येतिल्यपा आ
दीध्यत इतिपक्। आदीधिवितेतित्वच रद। आदीध्यनमिति ल्युट् दीधिवेवीय मिति ण्यत्। प्रतिषेधः। इह दीध्यते रखुल आदीध्यक इति
श्रूयमाणएव गोराल्लुप्सन्ते: प्रागेव प्राप्तोऽपि लोपो न भवति वर्णग्रहणात् किं वर्णग्रहणमनिरिमंतरसतो न भवतिने साह अश्रुश्रा
यरावायं कथं वर्णविरोनेचुरादिः वर्ण्यते उपलभ्यत इति वर्णः वर्णश्चासौ विश्वेति विशेषणसमासे विशेषणस्य निपातनात्स्पर

॥पीवर्णयोर्दीधीवेव्योः॥ ॥यकारादौ विवर्णादौ च परतो दीधीवेव्योर्लोपो भवति। यकारादौ। आदीध्य गतः आदी
ध्यते आवेव्यते। इवर्णादौ। आदीधिता आविविता। लिङि। आदीधीत आवेवीत। पीवर्णयोरिति किं आदीध्यनं आवे
यनं॥ ॥सनिमीमाघुरभलभशकपतपदामच इस्॥ ॥सनि परतः सकारादौ परतो मीमाघुरभलभशकपतपद इत्येते
तेषांमपगानामचः स्थाने इस इत्ययमादेशो भवति। मी इति मीनाति मिनोत्योर्द्वयोरपि ग्रहणं। मित्सति। मी मित्स
ति। मि। प्रमित्सति। मा इति मा मा प्रहणेऽविशेषः। मित्सते। अपमित्सते। घु। दित्सति धित्सति। भर। आरिप्सते।
लभ। आलिप्सते। शक। शिक्षति। पत। पित्सति। पद। प्रपित्सते। सनीति किं। दास्यति। सीसेव पिपतिषति इत
नि पतिर्दरिद्रातिग्रहणं मुपसंख्यानमिति पतेरिडागम विकल्पः। सनि रायो हि सप्पाम वइस्रु वजन्त्यः। प्ररित्स
ति। हिंसायामिति किं आरिरात्सति १२ ॥ छ॥ ॥

निपीतः॥ ॥मतिमीमा॥ ॥सीसेतरहितानुवृत्तत्वं सनो विशेषणं। मीनाति मिनोत्योरिति मीञ् हिंसायां डुमिञ् प्रक्षेपणे उभयो
रपिग्रहणमिति मिनोतेरप्यध्वस्तनग्रामोमसनीति दीर्घे कृते मी इति रूपसंभवात्। ननु मोलाक्षणिकः सस्येरहिरेवेयं यद्दाहृद्दृष्यत
इति मा माने मा ह्माने मेङ् प्रणिदाने त्रयाणामपि ग्रहणं मीनाति मिनोत्योः सनः किलेसति अने द्विषयत्वात्तस्यासंभवात्स्य
ग्रहणं घुइति घुसंज्ञकादाधाग्रहणं तेरभ एवेड्लभपूर्वाप्तो शक्कृ शकौ पल्लगतो पदगतो। मित्सनीत्तिसस्य अभ्यासातुकर इति सक

रस्यतकारः अत्र लोपोऽभ्यासस्य। ओत्मनेपदिषु पूर्ववि
त्सनः आरिप्सतइत्यत्र सीस्कोः संयोगाद्योरिति सलोपः॥ १२॥

७का·घ८०४

११५

॥आप्नुतपि॥ ॥आप्लृ व्याप्तौ ज्ञा अवबोधने ऋधु वृद्धौ एषां अभ्यासस्य इः स्यात् सनि अच ईत्वं ... मित्वे ति मिस्संज्ञायां मितां ह्रस्वः। अध ह्रस्वो
ईत्सनीति नित्यं ईकारः धकारस्य च लोपः। ज्ञपेरित्सादि इहापि च रस्मनुवर्त्तते तेन च ज्ञापेर्विशेष्यमाणो अनेन ज्ञपेरीत्वं विधीयमानम तोऽत
स्यलंसस्य स्यात अनेन तस्मेज्जिव विशेषणं अर्थं अर्थं मितामाभावात् तेन ज्ञपिना ज्ञि शेष्यते ज्ञपेर्बोपत्रतत्र स्थाने ति यथा नु धिप्यां एवं चे
कप्रकारो विशेषणं विशेष्यभावो भवति तत्रानेन सेविसावकाश मीत्वमस्येचि पूर्वविप्रतिषेधेन णिलोपो बाधते तेन दिद मुक्तं णोर्लोपइति
नरस्यात्विति। अपर आह अस्तु णोर्यीलं तस्यास्यानि वद्भा वाणिलोपो भविष्यति ईत्विवचनं त्वनं से अवणार्थमिति। अर्दिधिषतीति॥

॥आप्नुतप्वृधामीत॥ ॥आपज्ञपिऋधयइत्येतेषामंगानामवर्ईकारादेशो भवति सनि सकारादौ परतः। आप्
ईप्सति। ज्ञपि ज्ञीप्सति। ऋधा ईत्सति। ज्ञपेर्द्विर्वचनेत्रणेः पूर्वविप्रतिषेधेन लोपः इतरस्य त्वीलं। सनतिवा
प्रास्पति। मीत्सेवा। जिज्ञपयिषति। अर्दिधिषति। सनीवंतर्द्धेति ज्ञपेऋधेश्चेयेविकल्पः॥ ॥दंभइच्च॥ ॥दंभेर
च इकारादेशो भवति वकारात् ईत्वम सनि सकारादौ परतः धिप्सति धीप्सति। मीत्सेवा दिदंभिषति॥ ॥मुचोक
र्मकस्य गुणो वा॥ ॥मुचोकर्मकस्य गुणो वा भवति सनि सकारादौ परतः। मोक्षते वत्सः स्वयमेव। मुमुक्षते व
त्सः स्वयमेव। अकर्मकस्येति किं। मुमुक्षति वत्सं देवदत्तः। कर्मकर्त्तरि मुचिरकर्मको भवति कर्मविशेषस्य वा

सनि इगन्तलघूपधगुरोरपरे कृतेन न ह्रस्वः इति प्रतिषेधाद्रेफ वर्जितः द्वितीयस्यैकाचो द्विर्वचनं॥ ॥दंभइच्च॥ ॥धिप्सतीति हलंता
च्चेति सनः कित्वादुपधालोपः भकारस्य च र्त्वं इत्वंशक्नाम विधीतुएवं वक्ष्यामि सनि मीमादीनामचरस दंभ ईत्वं च कारादि स
भावश्च तत आप्नुतप्वृधामीदित्सेव॥ ॥मुचोकर्म॥ ॥मुमुक्षत इति भ्रष्टा कर्म क्रियादि सनं चात्र आत्मनेपदादि ति कर्म
कर्तृ रियगभावः अतिदेशेन स्वाश्रयस्यानिवृत्तेः शद्भवति यथा नमते दंडः स्वयमेवेति। कर्मविशेषस्याविवक्षितत्वाद्वेति

राम०
११५

॥अत्र लोपः॥ ॥अत्रशब्दस्यार्थं दर्शयति यदेतदिति। अथात्रग्रहणं किमर्थं अत्र सति मीमेत्यादौ प्रकरणे यथा स्यादिह दीक्षि
तीत्यत्र मा भूदिति। नैतदस्ति प्रयोजनं एवं वक्ष्यामि सनि मीमाघुरभलभशकपतपदाम् अच इस् अभ्यासलोपश्चेति उत्तरत्राभ्यासलोपश्चेत्येव
सलोपश्चेत्येव तत्राह सनि मीमाघु इत्यादि। विषयावधारणं विषयनियमः कः पुनरसावित्यत आह अत्रैवेत्यादि। अवधारणा
र्थमवच्छेदं दर्शयति सन्वद्भावविषये न भवतीति। अमीमपदिति मिञो णिचि मीनातिमिनोत्योरात्वं पुक् लुङ् चङि द्वि
र्वचनं सन्वद्भावादित्वं दीर्घो लघोः कथं पुनः सनीत्युच्यमानस्याभ्यासलोपस्यात्र प्रसङ्ग इत्यत आह सन्वल्लघुनीति। प

॥अत्र लोपोऽभ्यासस्य॥ ॥यदेतत्प्रक्रान्तं सनि मीमेत्यादि मुचोऽकर्मकस्येति यावत् अत्राभ्यासलोपो
भवति। तथा चैवोदाहृतं। अभ्यासस्येत्येतच्चाधिकृतं वेदितव्यमा अध्यायपरिसमाप्तेः। इत उत्तरं यद्वक्ष्यामोऽभ्या
सस्येत्येवं तद्वेदितव्यं। वक्ष्यति ह्रस्वः। डुढौकिषते। तुत्रौकिषते। सनि मीमाघुरभलभशकपतपदामच इस्
अभ्यासलोपश्चेत्येव सिद्धे पदत्रग्रहणमिह क्रियते तद्विषयावधारणार्थं अत्रैवाभ्यासलोपो भवति स
न्वद्भावविषये न भवति। अमीमपत्। अदीदपत्। सन्वल्लघुनि चङ्परे इति सन्वद्भावोऽस्ति। सर्वस्या
भ्यासलोपमिच्छन्तस्तदर्थमेव केचिदत्रग्रहणमिह वर्णयन्ति। नानर्थकेऽलोऽन्त्यविधिरित्यपरः सर्वस्य कु
र्वन्ति ॥ १२ ॥

येन हि सन्वद्भावेनेत्वं भवति तथाभ्यासलोपोऽपि स्यात्। अलोऽन्त्यस्य लोपेन भवितव्यमित्याशङ्क्याह सर्वस्येति। कथं पु
नः सर्वस्य लभ्यते इत्यत आह तदर्थमेवेति। इतरोऽप्याह यदि हि पुनरत्र षष्ठ्यन्तात्र लोपमभ्यासस्य प्रसिद्धः अस्य लोपो न दृष्टः तस्यास्यार्थश्च वि
षयावधारणं त्वमथापि। सिद्धं सन्वल्लघुनीति न कार्यमतिदिश्यते किं तर्हि रूपं लोपश्चासावभावरूपो न रूपमिति नातिदिश्य
ते। नानर्थकेऽलोऽन्त्यविधिरित्यपरे सर्वस्य कुर्वन्ति। किमनभ्यासविकारेष्विति तु प्रतिषेधो न भवति लोपस्याविकारत्वात् तथा च प
ष्ठ्या यो लोपागमवर्णविकारज्ञ इति पृथग्ग्रहणं। द्वौ चापरौ वर्णविकारनाशौ विति च पृषोदरादिसूत्रे अत्वप्रमतिरेकाभ्या

सर्वस्य तावद्धार्यते। न चाभ्यासेऽपञ्चनेऽनेकश्चिदर्थः प्रतीय
ते इत्यभ्यासस्यानर्थक्यं १२ ॥

७का·प८०४
११६

॥ह्रस्वः॥ ॥हलादिशेषो न भवतीति न चागमविधानसामर्थ्याद्धलादिशेषाभावः अन्यथा आदेशमेवाकारं विदध्यादिति वाच्यं सत्यपि
वा हलादिशेषे विगृहीतश्रवणार्थत्वादाकारस्य च आचलमिति॥ ॥हलादिः॥ ॥शिष्यते अवस्थाप्यत इति शेषः कर्मणि घञ् हला
दिरित्ययमासः समासे तु कर्मधारयपक्षे स्यादादिशब्दस्य पूर्वनिपातः षष्ठीसमासे त्वानक्षेस्यादेशेषः प्रसज्यते। कर्मधारये हि विशेषणात्वा
दिशब्दस्य पूर्वनिपातः प्राप्नोति षष्ठीसमासे हलन्तरापेक्षे हल आदित्वं नाभ्यासापेक्षमिति अजादिष्वपि प्रसंगः। अक्ष्णुयात् इति लि
ट् आनक्ष अत्र ककारस्य शेषः प्राप्नोति आट तुरि सारात्व प्यादि विग्रहात्प्रसंगः कर्मधारयसमासे यस्तु अभ्यासापेक्ष्यमादित्व

॥ह्रस्वः॥ ॥ह्रस्वो भवत्यभ्यासस्य। डुढौकिष ते तुत्रौकिष ते डुढौके। तुत्रौके। अडुढौकत्। अतुत्रौकत्। अभ्या
सस्यानचि। अभ्यासस्य युवुअन्ते अनचितद्भवतीति वक्तव्यं। चराचरः चलाचलः। पतापतः। वदावदः। हलादिशे
षो न भवति॥ ॥हलादि: शेषः॥ ॥अभ्यासस्य हलादि: शिष्यते अनादिर्लुप्यते। जग्लौ। मम्लौ। पपाच। पपा
ठ। आट आटतुः आटुः। आदिशेषनिमित्तोयमनादेर्लोपो विधीयते तत्राभ्यासजातेरपरत्वात् क्वचिदपि व
र्तमानो हलादिरनादेः सर्वत्र निवृत्तिं करोति॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

मिति नायं दोषः। अनादिर्लुप्यत इति। हलित्यपेक्षते एतेनासमासपक्षो दर्शितः समासे ह्युपसमस्तस्यापेक्षा न योगा
दनादिर्हलिति पुनर्हलग्रहणं कर्तव्यं। ननु शेषो वस्थानेन तत्रादेः प्राप्तमेव तत्किमेतेनेत्यत आह आह आदिशेषनिमित्तोयमि
ति। सत्यं सिद्धे सत्यारंभो नियमार्थः आदिरेव शिष्यते नत्वनादिरिति ततश्चादिशेषनिमित्तोत्रानादेर्लोपो विधीयत इति
नास्यानर्थक्यमित्यर्थः। यथादिशेषो निमित्तमनादिलोपस्य पपाचे स्यादेषत्रादेर्हलो वस्थानं तत्रैवास्य निवृत्तिः स्या
त् आट तुरित्यादौ तु न स्यादित्यत आह तत्रेति। जातिपक्षे अभ्यासजातावेवादेरवस्थानमपेक्षितं न प्रतिमक्तीति दोषाभावः।

रा.म०
११६

। अपरे त्विति । पूर्वत्र पक्षे वस्थानमेव शास्त्रार्थो नियमाश्रयणाच्चितरस्याहानिः अत्र तु पक्षे निवृत्तिरपि गुणभूता शेषशास्त्रेणैवोच्य
ते । ततः किमित्यत आह तदवस्थानमित्यादि । उक्तितः शब्दव्यापारतः । अविधेयत्वादित्यर्थं स्वप्राधान्यं दर्शयति । निवृत्तिस्तु
विपरीतेत्याह निवृत्तिरेव त्विति । लोके पि चंक्रम्यमाणो धीमात्रजपं श्वं क्रमणं कुरु इत्येवमर्थाभेदे पि शाब्दो भेदः प्रतीयते ततः कि
मित्यत आह तत्रेति । साविधेयत्वात्प्रधानभूता सती निवृत्तिः किमित्यादेरानिवृत्तिमपेक्षते किं भूतां अविधेयां सती अविधेयत्वाद
प्रधानभूतां सतीमित्यर्थः न प्रधानं गुणानुवृत्तिमपेक्षते सापेक्षाकारणं नास्तीत्यर्थः । भाष्ये परिहारान्तरं । हलि सेको योगः अत्र लोपः
निवर्तते स च कर्मसाधनः यथाहल्ङ्याभ्यो दीर्घादित्यत्र अभ्यासस्य हल लुप्यते तत आदिः शेषः पक्षान्तरे हलादिः शेषः इति संहिता
पाठ एवतत्राह । लितिपदच्छेदः ४ अभ्यासो ऽ हलं भवति अविद्यमाना न हल्के भवति तत आदिः शेष इति ॥ ॥ शर्पूर्वाः ४ ॥ ॥ पूर्वेणाशेषे

अपरे तु ब्रुवते शेषशास्त्रोपं निवृत्त्याविशिष्टमवस्थानमाह तदवस्थानमुक्तितो यद्यपि प्रधानमविधेयत्वात्तु तद
प्रधानं निवृत्तिरेव तु विधेयत्वात्प्रधानं तत्रायमर्थः सञ्जायते अभ्यासस्थानादेर्हलो निवृत्तिर्भवतीति । सा कि
मित्यादेरविधेयां सतीमनिवृत्तिमपेक्षिष्यत इति ॥ ॥ शर्पूर्वाः खयः ॥ ॥ अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते
अन्ये हलो लुप्यन्ते । चुश्च्योतिषति । तिष्ठासति । पिस्पर्धिषते । शर्पूर्वा इति किं पपाच । खय इति किं सस्नौ । खर्पूर्वाः
खय इति वक्तव्यं । उच्चिच्छिषतीत्यत्र उच्छेरन्तरङ्गत्वात्तुकि कृते द्विर्वचनं हलादिशेषे सति अभ्यासे तकारः श्रूयेत १४

षेणायमिष्यतां शेषो विधीयते तत्रैकाभ्यासविषयेणानादिशेषेणादिशेषो बाध्यते सत्यपि भेदे बाधनं भवतीति न्यायात् किं चास्य
भवेत्प्रत्यग्रमनेकत्र तु कथं शेषशास्त्रोपं निवृत्तिमदवस्थानमात्रं चोभयोरवस्थाने निवृत्त्याविशिष्टमवस्थानं सर्वं भवति । चुश्च्यो
तिषतीति श्चुतिरक्षरणो पिस्पर्धिषते इति स्पर्धिरिच्छायां च लने अनुदात्तेत् । सस्नाविति ष्णा शौचे खर्पूर्वा इति । सत्त्रे शर्ग्रहणम
पनीय खरग्रहणं कर्तव्यमित्यर्थः ४ । उच्चिच्छिषतीति उच्छी विवासे । अन्तरङ्गत्वादिति उपदेशानन्तरमेव प्राप्तत्वादन्तरङ्गत्वं । तुकि
कृते द्विर्वचनमिति तत्र सर्वत्रासिद्धमिति चुत्वस्यासिद्धत्वात्तु तुक एव भवति तत्र कृते यद्यत्र हलादिशेषः स्यादभ्यासे तका
रः श्रूयेत । एतच्च सर्वत्रासिद्धं द्विर्वचनमित्येतदनाश्रित्योक्तं तदाश्रयणात्तु चुत्वे कृते तस्यासिद्धत्वान्न च्छिसमाहृत्य द्विर्वचकारशेषो

॥कुहोश्चुः॥ ॥चखानेति खकारस्य छकारः तस्याभ्यासे चर्त्वेति चकारः। जघासेति घकारस्य झकारः तस्य जश्त्वं जकारः। जिहीर्षतीति हकारस्य स्थानिसमनः किंत्वं हकारस्यापि झकारः तस्य जश्त्वं॥ ॥न कवतेः॥ ॥कवतेरित्यादिक ङ् शब्दे इति तवादिः कुशब्दे इत्येतदादिः कुङ् शब्दे इति भ्वादिः शब्दार्थ एव तत्रापि सति विकरणनिर्देशे को विशेषः अमानेत्र धातोः सप्रिग्रहणं स्यादिह धातोर्दादिकोदीधीतः एवमेपि द्वयोर्ग्रहणं स्यात् तच्च नेरनुबंध कलादादादिकस्यैव ग्रहणं लुग्विकरणत्वात् तस्माद्भौवादिकस्यैव धातोरादिति विकरणनिर्देशः॥ ॥दाधर्त्ति॥ ॥धारय

॥कुहोश्चुः॥ ॥अभ्यासकवर्गहकारयोश्चवर्गादेशो भवति। चकार। चखान। जगाम। जघास। हकारस्य जहार। जिहीर्षति। जहौ॥ ॥न कवतेर्यङि॥ ॥कवतेरभ्यासस्य यङि परतश्चुर्न भवति। कोकूयते उष्ट्रः। कोकूयते खरः। कवतेरिति विकरणनिर्देशः कौतेः कुवतेश्च निवृत्त्यर्थः। चोकूयते। यङीति किं। चुकुवे॥ ॥कृषेश्छन्दसि॥ ॥कृषेश्छन्दसि विषये यङि परतोऽभ्यासस्य चुर्न भवति। करीकृष्यते॥ ॥दाधर्त्ति दर्धर्त्ति दर्धर्षि बोभूतु तेतिक्तेऽलर्ष्यापनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च॥ ॥दाधर्त्ति दर्धर्त्ति दर्धर्षि बोभूतु तेतिक्ते अलर्षि आपनीफणत् संसनिष्यत् करिक्रत् कनिक्रदत् भरिभ्रत् दविध्वतः दविद्युतत् तरित्रतः सरीसृपतं वरीवृजत् मर्मृज्य आगनीगन्ति इत्येतानि छन्दसि विषये निपात्यन्ते। दाधर्त्ति दर्धर्त्ति दर्धर्षि बोभूतु तेतिक्ते इति धारयतेर्धृङो वा श्लौ यङ्लुकि वा अभ्यासदीर्घत्वं णिलुक् च। दाधर्त्ति। एवं दर्धर्त्ति रुगभ्यासस्य निपात्यते। तथा दर्धर्षि। अत्र पक्षे श्रोतानुपपन्नं तान्निपातनात्। सिद्धं। बोभूतु इति भवतेर्यङ्लुगन्तस्य लोटि गुणाभावो निपात्यते। नेतद्दृष्टिप्रयोजनं।

तेरिति धृङ् अवस्थाने इत्यस्य धृङो वेति सएवमस्सतः श्लौ यङ्लुकि वेति। श्लाविति तद्धारयतेर्धृङो वेत्युभाभ्यां संबध्यते यङ्लुकि वेति तत्तु धृङो वेत्यनेनैव तद् एव मर्थः दाधर्त्तीति धारयतेः श्लौ णिलुगभ्यासदीर्घत्वं च निपात्यते धृङो वा श्लावभ्यासस्य दीर्घत्वं अत्र यर स्यैव परमपि निपात्यते तस्यैव वा यङ्लुकि अभ्यासदीर्घत्वं निपात्यत इति। दर्धर्त्तीत्यत्र तु यङ्लुकि रुकप्रत्ययेदाधर्त्तीति निपातनेन प्राप्तस्य दीर्घत्वस्याभावो निपात्यते रुग्निकौ च लुकीत्यस्य रुक्सिद्धः स्नुप क्षेत स्यापि निपातः। दर्धर्षीत्यत्र यङ्लुकि रुक्पक्षेण किंति। निपात्यते। बोभवि

।बोभवीतीति लिल्युषो बेभिदिषोऽर्हुः प्रत्ययलक्षणेनेनियङ्घप्रत्युदाहृतिः त्वनिमित्तमात्मनेपदं न प्रत्ययनिमित्तं तथापि लोलूयतस्त्याद्वो
पङ्कं तादात्मनेपदं तत्प्रत्ययस्याहि त्वादिति प्रत्ययलक्षणं भवत्येव एवं वा दाधिपुवर्कीरी तत्परस्मैपदमिति परस्मैपदग्रहणमनुवादः।क

अत्र भूसुवोस्तिङीति गुणाभावः सिद्धः ज्ञापकार्थं तर्हि निपातनं गते ज्ञापयति अस्मत्रयङ्लुगंतस्य गुणप्रतिषेधो न भवती
ति बोभोतीति बोभवीति।तेति क्षेतितेर्यङ्लुगंतस्यात्मनेपदं निपात्यते।यङोऽचि त्वा प्रत्ययलक्षणेनात्मनेपदं सिद्धमेव ज्ञाप
नार्थं त्वात्मनेपदनिपातनमस्मत्रयङ्लुगंतादात्मनेपदं न भवति।अलर्षीति ऋधर्त्तेर्लिटि पिपि अभ्यासस्य हलादि शेषाप
वादो रेफस्य लत्वं निपात्यते स्रिपा निर्देशा गंतत्रेति पपिट् श्रूयते अलर्त्तिदक्षः।आपनीफणादिति फणतेराङ्पूर्वस्य यङ्लु
गंतस्य शतरि अभ्यासस्य नीक् निपात्यते।संसनिष्यदिति स्यंदेः संपूर्वस्य यङ्लुकि शतर्यभ्यासस्य निक् धातुसकारे
स्य षत्वं निपात्यते।न चात्र संप्रवृत्तास्तंत्रं अस्मत्रापि।हे ष्यते आसनिष्यदिति।करिक्रदिति करोतेर्यङ्लुगंतस्य शतरि चु
त्वाभावो अभ्यासकः कारादस्य रीगागमो निपात्यते कनिक्रदिति क्रंदेर्लुङ्गि च्लेरङादेशो द्विर्वचनमस्यासस्य चुत्वाभावो
निगागमश्च निपात्यते।तथा वायस्य विवर्णां कृतमक्रंदीदिति।भरिभ्रदिति बिभर्तेर्यङ्लुकि शतर्यभ्यासस्य जश्त्वाभावो
रिगागमश्च निपात्यते।दविध्वत् इति ध्वरतेर्यङ्लुगंतस्य शतरि जसिरूपमेतत् तत्राभ्यासस्य विगागमश्च कारलोपश्चाभा
वो निपात्यते दविध्वतो रश्मयः सूर्यस्यादविद्युतदिति [illegible] तिद्युतेर्यङ्लुगंतस्य शतरि अभ्यासस्य संप्रसारणाभावो अ
त्वं विगागमश्च निपात्यते।तरित्रदिति जतरतेः शतरि श्लौ अचोक वचने अभ्यासस्य रिगागमो निपात्यते।सरी
सृपतमिति सृयेयङ्लुगंतस्य शतरि श्लौ बाढितीयैकवचने अभ्यासस्य रीगागमो निपात्यते।वरीवृजदिति वृजेः श
तरि श्लौ रीगागमोऽभ्यासस्य निपात्यते।मर्मृज्येति मृजेर्लिटि णलि अभ्यासस्य रुगागमो धातोश्च युङ्क्तपात्यते तत्तो वृद्धि
र्नभवत्यलघूपधत्वात् लघूपधगुणोऽप्राप्ते वृद्धिरारभ्यते।आगनीगंतीति आङ्पूर्वस्य गमेर्लिटि श्लौ
र्नैर्यविवेदभात्मनेपदं तिपश्यन्तरिति भावकर्मणोर्यङ्लुगंतादात्मनेपदं भवत्येव।करिक्रदिति अत्र चुत्वाभावनिपातः रिगागमस्तु
ऋग्रिकौ चेत्येव सिद्धः।तथा चास्येति अस्य मंत्रपदस्य व्राह्मणो विवरणं।भरिभ्रदिति अत्रापि जश्त्वाभावएव निपातः।जसिरूपमिति

अभ्यासस्य चुत्वाभावो नीगागमश्च निपात्यते।नंस्ते
ती वेदागनीगंतिकर्णौ।इति करणाएवं विधानामन्येषाम
प्येषामप्युपसंग्रहार्थं १५ ॥
भ्यस्ता अस्तु रिति मुम प्रतिषेधः ४॥ १५ ॥ ॥

७का·प्र८०४

११८

॥उरत्॥ ॥वह्रृतरस्यादेहलादिशेषेकृतेऽककारांततायामुपजातायामसावः स्यात्तेषुनर्हलादिःशेषः॥नर्नर्तीत्यादेरुक्तादिषुकृतेषु
अकारांतत्वाभावादत्वंनस्यादिस्याशंकाहनर्नर्तीत्यादेवितिमध्याकाभ्यासविकारेष्वबाधकानबाधकानबाधंतेतथादीर्घोकितइत्यत्रैव
वक्ष्यते॥ ॥द्युति॥ ॥विदिद्युतइतिद्युतदीप्तौ॥अनुदात्तेतमदिद्युतदितिएवंतालुङ्चङिद्विर्वचनं।विदिद्योतिषतेविदिद्युतिषत
इतिरलोव्युपधादिति सनःकित्वविकल्पः॥स्वापिरयंणोगत्यतइतिस्वपेर्योणिच्चिहितेनतत्तस्यग्रहणंतेनस्वापंकरोतीतिणिचिकृ
तेयःस्वापिस्तस्यग्रहणंनभवतिएतच्चस्वापिरित्युक्तसहसामथ्यमंतस्येवप्रतीतेर्लभ्यते।अएवतस्यैवयोभ्यासस्तस्यासेनैवसंप्रसार
णंसिद्धंतथाहिलिटितावत्।किनिवचिस्वपियताद्येनांकितीतिकृतसंप्रसारणमेवद्विरुच्यतेअकित्यपिलिघभ्यासस्योभयेषामित्यस्ति

॥उरत्॥ ॥ऋवर्णांतस्याभ्यासस्याकारादेशोभवति।वह्रृते।वहृधे।नर्नर्त्तिनरिनर्त्तिनरीनर्त्तीत्येवमादावभ्यासविकारेष्व
पवादानोत्सर्गान्विधीन्बाधंतइत्युरदत्वेकृतेरुगादयआगमाःक्रियंते॥ ॥द्युतिस्वाप्योःसंप्रसारणं॥ ॥द्युतिस्वापिरित्ये
तयोरभ्यासस्यसंप्रसारणंभवति।विदिद्युते।मदिद्युतत्।विदिद्योतिषते।विदिद्युतिषते।स्वापेः।सुष्वापयिषति।स्वापि
रर्पितोनृह्यते।तस्याभ्यासनिमित्तेनप्रत्ययेनानंतर्यमितिसंप्रसारणमिष्यतेइहनभवतिस्वापयतेरखिल्स्वापकः त
स्मात्सचिस्वापकीयतिस्वायकीयतेःसन्सिस्वापकीयिषति॥ ॥
संप्रसारणंसन्नपिरुद्विदित्युपयुक्तहिस्वपीतिकित्वेवयस्यपिस्वपिस्यामित्येत्रोपद्रीतिकृतसंप्रसारणमेवद्विरुच्यते।अथापियद्व
काभ्यासस्यसंप्रसारणंनकेनचित्प्राप्तंतथापिस्वापेरितिनिर्देशादेवयेतस्यग्रहणंनस्येस्यादिअभ्यासेनात्रस्वनिमित्तंप्रत्ययः
तेनिबापितस्ततस्तेनस्वापिरणाविशेष्यतेअभ्यासनिमित्तेप्रत्ययेयदंगंस्वापिस्तस्येतिसिस्वापकीयिषतीसत्रचाभ्यासनिमि
त्तंयःप्रत्ययःसन्नतस्मिन्स्वापिरंगंयस्मिंश्चस्वापिरंगंएवुलिनतदभ्यासस्यनिमित्तंद्युतेस्तुमदिद्युतदितिअत्राभ्यासस्य
निमित्तंपश्चवङ्स्यधपिणिचाव्यवहितस्तथापिसंप्रसारणमिष्यते॥द्वंद्वनिर्दिष्टयोरेतदेवष्यंतस्यतेकथं।तस्माद्वंद्व
कमेवैतादितिमन्यामहेवयं।द्योतकीयतेःसनिअभ्यासस्यप्रसारणंभवतिनवेतिचिंत्यं॥ ॥७॥ ॥७॥

ग्मा०
११८

॥अथो लिटि॥ ॥विम थ्या इति मथ भयचलनयोः अनुदात्तेत्। अत्र पकारे हलादिशेषेण निवृत्ते वकारस्य संप्रसारणप्रसंगः इसार्थं वाह्य कारस्येति। इह लिघ भ्यासस्योभयेषामित्यस्यानंतरं मथ इति वक्ष्यं ततो घुतिस्त्वाष्णो शितितथा तुन क्रतमिसेव॥ ॥दीर्घ इणः॥ ॥यणा देशे कृत इति परत्वात्। स्थानिवद्भावादिति द्विर्वचने चीति रूपस्थानिवद्भावः। इयायं इयिथेति। णलि थलि च गुणवृद्धोः कृतयोः स्थानिव

॥अथो लिटि॥ ॥अथो लिटि परतोभ्यासस्य संप्रसारणं भवति। अथो विमथ्याते विमथिरे। हलादिशेषेण पकारस्य निवृत्तौ प्राप्तायां संप्रसारणं क्रियते। वकारस्य तु न संप्रसारणे संप्रसारणमिति प्रतिषिध्यते। लि टीति किं वा मथ्यते॥ ॥दीर्घ इणः ४ किति॥ ॥इणोभ्यासस्य दीर्घो भवति किति लिटि परतः। ईयतुः ईयुः। इणो यणीति यणादेशे कृते स्थानिवद्भावाद् द्विर्वचनं। किती ति किं इयाय इयथ इयिथ॥ ॥अत आदेः॥ ॥ अभ्यासस्यादेरकारस्य दीर्घो भवति लिटि परतः आट। आटतुः आटुः। आदेरिति किं पपाच पपाठ॥ २६ ॥

द्भावाद्द्विर्वचनं अभ्यासस्यासवर्णे इतीयङ्॥ ॥अत आदेः॥ ॥आदेरिति पचना स्वतद्न्तविधिर्न भवति लिटीत्यनुवर्त्तते किन्त्वहणं तु निवृत्तं अतो गुणे पररूपत्वे प्राप्ते दीर्घत्वमिदमारभ्यते तपरकरणं किं दीर्घस्य माभूत् आ छि आयामे आंछ आंछतुः आंछुः अकि च स्यात् पघ चदीर्घः स्यात् तस्मान्नुड्हिहल इति नुट् प्रसक्ते तपघत्रापि द्रस्वत्वे कृते अदुवति तथापि तपरकरणं सामर्थ्यात्

॥तस्मात॥ ॥आनंगेति आगिरगिलगिगत्यर्थाः। आनंजेति अंजूव्यक्तिम्रक्षणकांतिगतिषु द्विहल्ग्रहणमनेकहलुपलक्षणं तेन
नर्छ स्तत्र गुणे रपरे कृते त्रिहलोपि भवति। ऐ ओ जिस्त्र वर्णेषु ये वर्णैकदेशा वर्णांतासमानाहृतयस्तेषु तत्कार्यं न भवतीत्युक्तं तु
द्वैधिलादेशविनामेषु अकारेण प्रतिविधानं तत्र मस्तु कृतं तत्रावसरे प्राप्ते वृद्धियो प्रतिविधने अकारैकदेशः स्यादि। अत्र द्विहल्

॥तस्मान्नुड्द्विहलः॥ ॥तस्मात्तोभ्यासाद्दीर्घीभूतादुत्तरस्य द्विहलोंगस्य नुडागमो भवति। आनंग आनंगतुः आनंगुः। आनंज आनंजतुः आनंजुः। द्विहल इति किं। आट आटतुः आटुः। अकारैकदेशो रेफो हल्ग्रहणेन गृह्यते तेनात्रापि द्विहलोंगस्य नुडागमो भवति। आनर्ध आनृधतुः आनृधुः॥ ॥अश्नोतेश्च॥ ॥अश्नोतेश्च दीर्घीभूतादभ्यासादुत्तरस्य नुडागमो भवति। आनशे आनशाते आनशिरे। अश्नोतेरिति विकरणनिर्देशो अश्नोतेर्मा भूदिति। आश आशतुः आशुः॥ ॥भवतेरः॥ ॥भवतेरभ्यासस्याकारादेशो भवति लिटि परतः। बभूव बभूवतुः बभूवुः। बभूवेत्य नुबभूवे कंबलो देवदत्तेन॥ ॥श्री४॥ ॥छ॥ ॥

ग्रहणं नकर्तव्यं तस्मान्नुड्विधेयास्तु एवमुच्यमाने आटतुराटुरित्यत्रापि प्राप्नोति अश्नोतेश्चेत्येतल्लिप्यमार्थं भविष्यति आदि
हलोयदि भवति अश्नोतेरेवेति। अश्नातिनिवृत्त्यर्थं नाश्नरत्येवं वा अंसात तदेवमंतरेणापि द्विहल्ग्रहणं सिद्धे यं
द्विहल्ग्रहणं करोति तस्येतदेव प्रयोजनं द्विहल्छायानुकारिणोपि यथा स्यादिति॥ ॥भवतेरः॥ ॥उरदित्यस्यानंतरमि
दं नोक्तं लिटि द्युपजीवनाय यदि पुनरसावन्त्रैवोच्येत तेनैव बाधकाल्लिघे बहिस्यात् श्नियानिर्देशोपस्कु द्विः दृत्यर्थं॥ ॥ ॥

॥सस्वेति॥ ॥दाधार्तीदद्धिवेवेतत्सछितव्यं॥ ॥निजांत्रयाणां॥ ॥निजिविजिविष्ल्व्याप्तौजुहोत्यादिष्वमीत्रयः।त्रयाणांग्रहणमु
त्तरार्थमिति। भृञामिती दिर्त्वंत्रयाणामेवयथास्यात्। अत्येहार्थमतिक्रमान्नभवतितत्रा हस्वाहोहीति। यस्तिर्भुजार्थत्रिग्रहणेक
र्मत्रतदेवाल्व्करणं तु नि जामंतेशकामकर्जुसतंतदपिह्व्तमित्येव। गुणाग्रहणमिकुपरिभाषोपस्था नार्थंतेनहलादिशेषेक्र
ते गुणो भवति अस्यथा तदपवादोहल एव एकारः स्यात्। अथाभ्यासविकारेषुपवादोनोत्सर्गान्बाधतइत्याश्रीयततदाविसष्ठा
॥सस्वेतिनिगमे॥ ॥ससस्वइतिनिगमेनिपात्यतेसर्तेर्लिटियस्त्सोपदेवुगागमोभ्यासस्यचात्वंनिपात्यतेगर्ष्टिःससस्व
स्यविर्त्तवाणां।सुषुवरितिभाषायां॥ ॥निजांत्रयाणांगुणःश्लौ॥ ॥निजादीनांत्रयाणामभ्यासस्यगुणोभवतिश्लौसतिनि
जिर्नेनेक्ति।विजिर्वेवेक्ति।विष्लवेवेष्टि।त्रिग्रहणमुत्तरार्थंएषांहित्ल्करणंसमास्यर्थपठ्यतएवेति।श्लाविति किं
निनेज॥ ॥भृञामित्॥ ॥भृञादीनांत्रयाणामभ्यासस्यइकारादेशो भवतिश्लौसति।भृञ्।बिभर्त्ति।माङ्।मि
मीते।ओहाङ्।जिहीते।त्रयाणामित्येव।ओहाक्।जहाति।श्लावित्येवबभार॥ ॥अर्त्तिपिपर्त्योश्च॥ ॥अर्त्ति
पिपर्त्त्योरित्येतयोरभ्यासस्यइकारादेशो भवतिश्लौ।इयर्त्ति ध्रुव।पिपर्त्तिसोमं॥ ॥बहुलंछंदसि॥ ॥छंदसिवि
षयेभ्यासस्यश्लौबहुलमिकारादेशो भवति।पूर्णां विवष्टि।वशेरेतद्रूपं।तथावचे।जनिमाविवक्ति।सचेःवसं
नमातासिषक्ति।जिगर्ति त्रिघर्त्तिसोमं।नचभवतिददाति।देवतंद्रूपात्।जजानगर्भमहिमानमिंद्रं।मातायद्वीरंद
धनद्धनिष्ठाः॥ ॥सन्यतः॥ ॥सनिपरतोकारांताभ्यासस्यइकारादेशोभवति।पिपक्षति।यियक्षति।तिष्ठासति।
पिपासति।सनीतिकिंपपाच।अतइति
र्यंगुणान्ग्रहणं॥ ॥भजा॥ ॥अमीत्रपिजुहोत्यादौभृञ्माङोहाङ्भजादय
४।तिमीनरति।ईहल्यघोः॥ ॥अर्त्ति॥ ॥द्रूयर्त्तीति।अस्मन्तोएपोलनपूरणमोः अभ्यासस्यासवर्णांइतीयङ्।अछेदोर्थमिदं
छंदस्युत्तरसत्रेणैवसिद्धत्वात्॥ ॥सन्य॥ ॥पिपक्षतीति।पजेर्व्रश्चादिनाषत्वंषढोःकःसि।तपरकरणंकिंपोपच्यते।सनपा
पविषनरत्यत्रमाभूत्।किंपुनःकारणमत्रद्धंत्वोनभवति।दीर्घविधानसामर्थ्यात्।परितुसनियोभ्यासइत्वेवंविज्ञापेततोला

॥ओः पु॥ ॥पुयणज्कारणां समाहारद्वंद्वे सम्प्रत्येकवचनं पुयणिज्वि· द्वंद्वाच्चुदषहान्तात्समाहार इति समासांतस्त्वनित्यत्वान्न भवति· अः परो यस्मात्पुयणज्ः तदपरं अवर्णपर इत्यर्थः पिपविषत इति· पूङ् पवने स्मिङ् पूङ् ज्वशां सनीतीट् उणोवादेशो तयोर्द्विर्वचनेचीति स्थानिवद्भावा त्पू इति द्विरुच्यते· पिपावयिषतीति· तत एव णयंतात्सन्· यियविषतीति· युमिश्रणे सनीवंतर्द्धेतीट्· यियावयिषतीति· तस्मादेव णयंतात्स न्· रिरावयिषतिलिलावयिषतीति· री ति लु ना ति भ्यां णयंताभ्यामेव सन्· जिज्ञावयिषतीति ज्ञु इति सौत्रो धातुः ज्ञु चंक्रम्येत्यादौ निर्दिष्टः। कथं पुनः णयंते षु सत्सु वर्णांतिताभ्यां स्थानिवत्वात् णौ ह्यावादेशयोः कृतयोः आकारांतस्य द्विर्वचने न भवितव्यं न हि णौ कृतस्य केन चित्स्थानिवद्भावो

॥ओः पुयणज्यपरे॥ ॥सनीति वर्त्तते इति दिवउवर्णांतस्याभ्यासस्य पवर्गे यणि जकारे चावर्णपरे परत इकारादे शो भवति सनि प्रत्यये परतः। पवर्गे परे। पिपविषते पिपावयिषति। यणि परे यियविषति यियावयिषति। रिरावयि षति। लिलावयिषति। जपरे। जु इति सौत्रो धातुः। जिजावयिषति। एतदेवओः पुयणज्यपर इति ज्ञापकं द्वि र्वचन निमित्ते चि णौ स्थानिवद्भवतीति। ओः इति किं। पापच्यते: सन् पापचिषते। पुयणजीति किं। अवतुनावयि षति। जुहावयिषति। अपर इति किं बुभूषति॥ ॥श्री४॥ ॥

विहितः णौरद्विर्वचननिमित्तत्वादित्यत आह· एतदेवेति· न हि णौ कृतस्य स्थानिवद्भावमंतरेण ओः पातापुयणजो वर्णपराः संभवंति पिपविषति पियविषते इति संभवतीति चेत् किमेतावता वर्णग्रहणं प्रत्याहारग्रहणं ज ग्रहणं चार्थवद्भवति· तस्मादेतदेव वचनमुक्ता र्थस्य ज्ञापकमिति· यत्रानुवर्त्यं अत द्विर्वचने चीत्यत्रोक्तं तत एवावधार्यं पापचिषत इति· सनियोग्यास इमेत नाश्रित्य उदाहर णांतराण्यपेत्य प्रत्युदाहरणांतरमप्यपरिसंभवति· अवतुनावयिषतीति· तु इति सौत्रो धातुः तुरुस्तुशम्यम इत्यत्र निर्दिष्टः। जुहावयिष तीति· जुहोतेर्णयंतात्सन्॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥छ छ॥ ॥

॥स्रवति॥ ॥श्रुस्रुवणोऽभ्यासस्यार्थः उरो हलोऽसुगणेतेष्प्र सन्· कथं पुनर्णिपरत उच्यमानमित्संप्रसारणादिना वर्णेन व्यवधाने भवतितत्रा
हवचनसामर्थ्यादिति· पूर्वसूत्रइत्यादिना अप्राप्तविभाषेयमिति दर्शयति॥ ॥गुणो॥ ॥लुक्शब्देनात्र यङ्लुगेव गृह्यते संनिधाना
त् किं वाभ्यासस्यायं गुणो विधीयते न च लुगन्तेऽभ्यासः संभवति· चोक्रुशीतीति· कुशो यङ् लुगन्तात्तिपि एपृक्तोपेतीट्· नाभ्यस्तस्या
चिपितीति लघूपधगुणप्रतिषेधः॥ ॥दीर्घो॥ ॥अपवाद इत्यादिति· नाप्राप्ते दीर्घे नुगारंभात् सर्वे अपवादत्वं। अनजन्तेन लादेवेति· दी
र्घश्रुत्या चश्वेत्तु यस्यानात्वाभ्यासविशेषणात् अजन्तस्याभ्यासस्य दीर्घो विधीयत इति भावः अभ्यासविकारे षित्याद्रि· अपवादस्य

॥स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा॥ ॥स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीत्येतेषामभ्यासस्योवर्णस्य ये
णोपरे इकारादेशो भवति सन्यपरतो वा। स्रवति सिस्रावयिषति सुस्रावयिषति। शृणोति॥ शिश्रावयिषति शुश्रावयिषति।
द्रवति। दिद्रावयिषति दुद्रावयिषति। प्रवति। पिप्रावयिषति पुप्रावयिषति। प्लवति। पिप्लावयिषति पुप्लावयिषति। च्यवति।
चिच्यावयिषति चुच्यावयिषति। वचनसामर्थ्यादेकेन वर्णेन यणो व्यवधानमाश्रीयते। पूर्वसूत्रे त्वनंतर एव यणि भवितम
मित्यप्राप्तविभाषेयं। अपर इत्येव सुस्रूषति॥ ॥गुणो यङ्लुकोः॥ ॥यङि यङ्लुकि चाभ्यासस्य गुणो भवति चेचीयते लोलु
यते। यङ्लुकि जोहवीति चोक्रुशीति॥ ॥दीर्घोऽकितः॥ ॥अकितोऽभ्यासस्य दीर्घो भवति यङि यङ्लुकि च। पापच्यते पाप
चीति। यायज्यते यायजीति। अकित इति किं यंयम्यते यंयमीति। रंरम्यते रंरमीति। ननु चीत्राय वादत्वात् नुकि कृते अभ्यास
स्यानजन्तत्वादेव दीर्घत्वं न भविष्यति एवं तर्हि अकित इत्यनेन नैतद् ज्ञाप्यते अभ्यासविकारेषु अपवादो नोत्सर्गान् विधीन् बाध
त इति किमेतस्य ज्ञापने न प्रयोजनं। डोढौकत इत्यत्र ह्रस्वः अश्वस्य ह्रस्वो न बाध्यते अनेन सूत्रेण। अचीकरणादित्यत्र दी
र्घो लघोरित्यनेन सन्वच्चदित्वं न बाध्यते। मान्प्रभृतीनां दीर्घेण सन्वद्भावे न बाध्यते मीमांसते। इचिगणार
हणं बाधकमात्रोपलक्षणं उत्सर्गग्रहणमपि बाध्यमात्रोपलक्षणं तत्र ह्रस्वत्वस्यावकाशः मयाबिसत्र दीर्घत्वस्यावकाशः ४ पाय
यत इत्यादि डोढौकत इत्यादावुभयप्रसंगे परत्वाद्दीर्घत्वस्य प्रसंगो नापवादत्वात्। तथा अचद्भावस्यावकाशो चिक्षणादिति दीर्घ
त्वस्यावकाशो दीदीप इति अचीकरदित्यादावुभयप्रसंगे परत्वाद्दीर्घत्वप्रसंगः। मीमांसत इत्यत्राप्यनैमित्तिकत्वेनांतरंगत्वाद्दीर्घ
र्घत्वप्रसंग इत्यं तु एतत्र नोणाधिकारे अभ्यासस्याकारान्तस्य विधानाद् बहिरंगं। अजीगणादित्यत्र त्वेकस्मिन्नेवेन नाप्राप्तिन्यायेन हलो

॥नीग्वंचु॥ ॥वंचुकसिपतिपदृयोगसथो: स्कंदि: शोषणार्थे: इतरे अवस्रंसनार्था: वनीवच्यत इत्यादावनिदितामित्युपधालोप: वनीवंची तीत्यादौनभवतियङ्लोलुमतालुमत्वाद्ङीकारोच्चारणसामर्थ्यान्नीकिद्धतेगुणाङ्लोनभवत॥ ॥नुगतश्च॥ ॥नुगित्येतद्दित्यादिकेनसंबंधेनोपलक्षणमत आहस्थानिनाहीति। उपलक्षणत्वेकिंसिद्धमत आहतेनेति। अनुस्वारत्वेपीति। तंतन्यत इत्यादौ मलपरत्वेनुनश्चापदांतस्येत्यनुस्वार: सिद्धएव। अनुस्वारस्ययिपरसवर्णइतिनित्यंपरसवर्ण: प्राप्नोतिइष्यतेचपक्षेअनुस्वारस्यश्रवणमतआ

॥नीग्वंचुस्रंसुध्वंसुभ्रंशुकसपतपदस्कंदां॥ ॥वंचुस्रंसुध्वंसुभ्रंशुकसपतपदस्कंदइत्येतेषामभ्यासस्यनीगागमोभवति यङि·यङ्लुकिच। वंचु। वनीवच्यतेवनीवंचीति। स्रंसु। सनीस्रस्यतेसनीस्रंसीति। ध्वंसु। दनीध्वस्यतेदनीध्वंसीति। भ्रंशु। बनीभ्रश्यतेबनीभ्रंशीति। कस। चनीकस्यतेचनीकसीति। पत। पनीपत्यतेपनीपतीति। पद। पनीपद्यतेपनीपदीति। स्कंद। चनीस्कद्यतेचनीस्कंदीति॥ ॥नुगतोनुनासिकांतस्य॥ ॥अनुनासिकांतस्ययोभ्यासस्तस्याकारांतस्यनुगागमोभवतियङ्लुकोः परत:। तंतन्यतेतंतनीति। जंगम्यतेजंगमीति। यंयम्यतेयंयमीति। रंरम्यतेरंरमीति। नुगिति तदनुस्वारोपलक्षणार्थंदृष्टव्यं। स्थानिनात्यादेशोलक्ष्यतेतेनयंयम्यत इत्येवमादावपिन परत्वेपिअनुस्वारोभवति। यदांतवच्चेतिवक्तव्यं। वापदांतस्येतिपरसवर्णविकल्पोयथास्यादिति। अतइतिकिं तेतिम्यते। तपरकरणं भूतपूर्वस्यापिदीर्घस्यनिवृत्त्यर्थं वाभम्यते। अनुनासिकांतस्येतिकिंपापच्यते॥

हपदांतवच्चेति। तत्कथंलभ्यतेइहांतग्रहणंनकर्त्तमंतरंतविधिनासिद्धंतत्क्रियतेपदांतस्यानुस्वारस्ययोधर्म: सोस्ययथास्यादितिएवंचानुनासिकांतस्येतिपृथक्पदेअनुनासिकेतिलुप्तषष्ठीकं। तेतिम्यत इति तिमआर्द्रीभावे। तपरकरणंकिमितिसर्वत्र ह्रस्वस्यैवभावात्तास्यकिंचिद्यावर्त्यमितिप्रश्न:। भूतपूर्वस्यापीति। अन्यथातपरकरणमनर्थकंस्यादितिभाव:। बाभम्यत

इतिभामक्रोधे॥ ॥छ॥ ॥छ॥ ॥

॥जपजभ॥ जपजल्पव्यक्तायां वाचि जभजृभी गात्रविनामे दह भस्मीकरणे दंश दशने भंजो आमर्दने पश इति सौत्रो धातुः जंजप्यत इत्यादिषु चतुर्षु
पसदेत्यादिना यङ् इत्यत्र सामान्यलक्षणेन॥ ॥चरफलोश्च॥ ॥चरगतिभक्षणयोः। ञिफला विशरणे फलनिष्पत्तौ द्वयोरपि ग्रहणमिष्यते। चंचूर्यत
इति लुपसदेत्यादिना यङ्। उत्परस्यात्रेणाकारस्योत्वे हलि चेति दीर्घत्वं योगविभाग उत्तरार्थः॥ ॥उतस्या॥ ॥अभ्यासस्य माभूदिति अन्त्यस्य प्रक

जपजभदहदशभंजपशां च॥ ॥जपजभदहदशभंजपश इत्येतेषामभ्यासस्यानुगागमो भवति यङ्लुकोः परतः। जंजप्यते
जंजपीति। जंजभ्यते जंजभीति। दंदह्यते दंदहीति। दंदश्यते दंदशीति। दश इति दंशिरयं नकारलोपार्थमेव निर्दिष्टस्तेन यङ्लु
क्यपि नकारलोपो भवति। दंदशीति। भंज। बंभज्यते बंभजीति। पश इति सौत्रो धातुः पंपश्यते पंपशीति॥ ॥चरफलो
श्च॥ ॥चर फल इत्येतयोरभ्यासस्यानुगागमो भवति यङ्लुकोः परतः। चंचूर्यते चंचुरीति। पंफुल्यते पंफुलीति॥ ॥
उत्परस्यातः॥ ॥चरफलोरभ्यासात्परस्यात उकारादेशो भवति यङ्लुकोः परतः। चंचूर्यते चंचुरीति। पंफुल्यते पंफुली
ति। परस्येति किं अभ्यासस्य माभूत्। अत इति किं अलोन्त्यस्य माभूत्। उदिति तपरकरणं चंचूर्त्तिः पंफुल्लीत्यत्र लघूप
धगुणनिवृत्त्यर्थं दीर्घत्वं तु सिद्धत्वाद्गुणः प्राप्नोति॥ ॥ति च॥ ॥तकारादौ च प्रत्यये परतश्चरफलोरकारस्य उ
कारादेशो भवति। चरणं चूर्त्तिः प्रसरणं प्रचूर्त्तिः प्रसृतचूर्त्तिः। प्रफुल्लताः सुमनसः। यङ्लुकोरभ्यासस्येति चानुवर्त्तमान
मपि वचनसामर्थ्यादिह नाभिसंबध्यते॥ १९॥ ॥७॥ ॥४४॥ ॥

रणात्तस्यैव प्रसंगः। अन्त्यस्य माभूदिति। आदेश परस्येत्यस्य तु प्रसंगः पंचमी निर्देशाभावात्। तपरकरणं किमिति। यद्यपि भाव्यमा
नोऽप्युकारः सवर्णान्न गृह्णातीति तथाप्यांतर्यतो मात्रिकस्य मात्रिक एव सिद्ध इति प्रश्नः। लघूपधगुणनिवृत्त्यर्थमिति। अनेन लक्षणे
न दीर्घस्य प्राप्त्यभावाल्लक्षणांतरप्राप्तोऽपि विकारस्तपरकरणसामर्थ्याद्वार्यत इति भावः। यथोक्तं हि गुणो निवर्त्तते तथा हलि चेति
दीर्घत्वमपि निवर्त्तेत। नन्वाह दीर्घत्वं हीति॥ ॥ति च॥ ॥वचनसामर्थ्यादिति यङ्लुकि पूर्वेणैव सिद्धत्वात्॥ १९॥ ॥

॥टीका॥ ॥अत्वतइतियाड्परतोयअकारवानतस्यैवग्रहणंनतूपदेशेअत्वतस्तेनपरीपृच्छ्यातइत्यत्रोसंप्रसारणेकृतेपिभवति॥ ॥
ऋग्रिको॥ ॥मर्मृज्यतइतिलुकिविधीयमानोरुग्यरि· नप्राप्नोतीतिवचनं॥ ॥अतश्च॥ ॥किरतिमितित्रिकारांतोपलक्षणमेतत्‌च
र्करीतमितियङ्लुःकः एवोचार्यसंज्ञापचतीतिलटउपलक्षणंतेनचाकर्तीत्यादीनिरूपाणि॥ किरतिंयोनयेदित्यर्थः॥ यद्वात्रयङ्लुःकिरि
तिंपचतीतियोनयेतपचतिनातुल्यरूपाणियोनयेतपचतिवदुगादिकमहत्यानयेदित्यर्थः प्राप्तिज्ञमिति रुगादीनांविषय ।विभागेन

॥रीगृदुपधस्यच॥ ॥ऋदुपधस्यांगस्ययोभ्यासस्तस्यरीगागमोभवतियङ्लुःकोः परतः ।वरीवृत्यतेवरीवृत्यतेव
रीवृतीतिवरीवृधीति।नरीनृत्यतेनरीनृतीति।रीगृत्वतइतिवक्तव्यंरुहाघियथास्यातवरीवृश्च्यतेवरीवृश्चीति॥
॥रुग्रिकौचलुकि॥ ॥यङ्लुकिऋदुपधस्यांगस्ययोभ्यासस्तस्यरुग्रिकावागमोभवतश्चकाराद्रीकानर्नर्तिनरी
नर्तिनरीनर्तिवर्वर्तिवरीवर्ति। उकारउच्चारणार्थः।मर्मृज्यतेमर्मृज्यमानामरुत्सुपसंख्यानं।मर्मृज्यतेमर्मृज्यमा
नासः॥ ॥अतश्च॥ ॥अकारांतस्यांगस्ययोभ्यासस्तस्यरुग्रिकावागमोभवतोरीकयङ्लुकि।चर्कर्तिचरिकर्ति
चरीकर्ति। जर्हर्तिजरिहर्तिजरीहर्ति तपरकरणंकिं।किरतेश्चाकर्ति।किरतिंचर्करीतंतंपचतीस्त्रयोनये
त।प्राप्तिज्ञंतमहंमन्येप्रागेवस्तेनसंग्रहः॥ ॥ तत्रेयंप्राप्तिस्तपरकरणसामर्थ्यादंगविशेषणमतइत्येतत।
तथाचाप्राप्तिःकिरतेरुगादीनामिति॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥

प्राप्राप्तिस्तांजानातीतिप्राप्तिज्ञः।प्रागेवइतिसंग्रहणंसंग्रहः साधुशब्दसंग्रहस्तेनप्रकारश्चइतियोग्यतातिप्रायोद्भावनेनापंस्तूयते
प्राप्तिज्ञमितत्रप्राप्तिमाचष्टे।तत्रेयंप्राप्तिरिति· तपरकरणसामर्थ्यादितिअभ्यासविशेषणेतुभूतपूर्वदीर्घनिवृत्त्यर्थंतपरकरण
मितिव्याख्येयंनहिमुख्येनिवर्त्यसंभवेगौणकल्पनान्याय्येतिअंगविशेषणमतइत्यार्श्रितमित्यर्थः॥ ॥७ ७॥ ॥७॥

।संन्वत्॥ ॥लघुनि चङ्परइति व्यधिकरणोऽसमासो न समानाधिकरणो चङ्परस्य लघुनोऽसंभवात् चङ्परेणोपरत इति कथं पुनर्णौ
विति लुप्यते चङ्परस्यासंभवात् ननु चाचकमत इत्यत्र मकारः संभवति अडुदुवदसुसुसुगरित्यत्र वकारः एवं तर्हि चङ्परइत्यंगस्य वि
शेषणं चङ्परे यदंगं तस्य योऽभ्यासस्तस्य सन्वत्कार्यं भवति। लघुनि धात्वक्षर इति चङ्परणोपरदंगं तस्य संबंधिपत्वाधितार्थः। सामी
प्ये तस्य ग्रहणमिति णेः समीपभूतस्यांगस्य ग्रहणमित्यर्थः। एवं तस्याव्यवधानभूतयदंगं तस्य ग्रहणमिति वा। अनग्लोप इति न।

सन्वल्लघुनि चङ्परेऽनग्लोपे॥ ॥लघुनि धात्वक्षरे परतो योऽभ्यासस्तस्य चङ्परे णौ परतः सनीव कार्यं भवति अनग्लो
पे सन्यतः इत्युक्तं चङ्परेपि तथा। अचीकरत् अपीपचत्। ओः पुयण्ज्यपरे इत्युक्तं चङ्परेपि तथा। अपीपवत् अलीलवत्
। अजीजवत्। स्रवति शृणोति द्रवति प्रवति प्लवति च्यवतीनां वेत्युक्तं चङ्परेपि तथा। असिस्रवत् असुस्रवत्। अशिश्र
वत् अशुश्रवत्। अदिद्रवत्। अपिप्रवत् अपुप्रवत्। अपिप्लवत् अपुप्लवत्। अचिच्यवत् अचुच्यवत्॥ लघुनीति
किं अततक्षत् अररक्षत्। जागरयतेर्णौ अजजागरत्। अत्र केचित् हशावल्लघुमाश्रित्य सन्वद्भावमिच्छंति सर्वत्रैव लघोरानं
तर्ये अभ्यासे न नास्तीति व्यवधानेपि वचनप्रामाण्याद्भवितव्यं तदसत् येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामा
ण्यादित्येके न व्याधानमाश्रीयते न पुनरनेकेन यद्येवं कथमचिक्षणदिति। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येवं जाती
यकानामित्वमिति। परयंतद्बाधनार्थस्यास्यादीनामत्वं विदधाति। चङ्परइति किं अहं पपच॥ २० ॥ श्रीः ॥

सिन्नग्लोपो विघत इति अनग्लोपे एतच्च चङ्परइत्यनेन समानाधिकरणं तेनायमर्थः चङ्परेण णौ को लोपे सतीति अतश्च
दित्यत्र संयोगपरत्वाद्गुरुसंज्ञया लघुसंज्ञाया बाधः अजजागरदित्यत्र आकारः॥ अत्र केचिदित्यादि न तु चगकारो जाशद्वेन व्यवहि
तो तत्राह सर्वत्रिचेति। अचीकरदित्यादावपि ककारादिना व्यवधानाल्लघोरानंतर्यं नास्ति ततश्च वचनप्रामाण्याद्व्यवधानं एव स
न्वद्भावेन भवितव्यमिति तेषामभिप्राय इत्यर्थः। दूषयति तदसदिति यदि तर्हि वर्णसंघातेन व्यवधानं नाश्रीयते व्यंजनसंघातेना
पि व्यवधानेन सिध्यतीति मन्यमानः पृच्छति कथमिति एवंजातीयकानामिति संयोगव्यवहितानामित्यर्थः॥ २० ॥ ॥

॥अचकमतेति॰ कमेरूपं णिङो निमित्तत्वेऽप्यादेशः अचकथदिति॰ कथ वाक्यप्रबन्धे चुरादावदन्तः अतोलोपः अत्राल्लोपस्य स्थानिवद्भावे सति अवधानात्सन्वद्भावो भविष्यतीति अतः प्रत्युदाहरणान्तरोपन्यासः २ अदृदृषदिति॰ दृषद् चङ्परे णौ चङ्युपधाया ह्रस्वः लोपः अत्रास्यालो लोपोनाऽवर्णकेवलस्येति नास्ति स्थानिवद्भावः एतदर्थं चानग्लोप इत्येतत्क्रियमाणं अचकथदित्यत्र सन्वद्भावं निवर्तयतीति तस्योपन्यासः। यदि च ङ्परो णौ यदङ्गं तस्य यल्लघु तत्र यदक्षरं तदभ्यासस्य सन्वद्भावो विधीयते वादितवन्तं प्रयोजितवानवीवददित्यत्रापि तर्हि न प्राप्नोति किं कारणं यश्चङ्परो णौ नैव तत्र लघुः पूर्वेण णिवाच्यवहितत्वात् लोपे कृते नास्ति व्यवधानं। अजादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानमेव॰ यद्यपि दीर्घविधौ प्रतिस्थानिवद्भावेन तु प्राप्नोति यस्मिंश्च णौ लघुर्न सोऽचङ्परः इति नीपेन णि

॥परग्रहणं किंच ह्येव केवले माभूत अचकमत अनग्लोप इति किं अचकथत् घ्वट्मात्मोतवानद्दृषत्। यादि तवन्तं प्रयोजितवानवीवददित्यत्र यो सौ णौ णौ लोपो नासाव ग्लोप इत्याश्रीयते किं कारणं चङ्परइ ति णिजाते निमित्तत्वेनाश्रयात्तेन तस्याको लोपः परिगृह्यते। मीमादीनामग्रहणात्तत्वद्भावेनाभ्यासलोपो न भवतीति त्युक्तं। किंच सन्वदितिसनाश्रयं कार्यमतिदिश्यते न च लोपः सनमेवापेक्षते किं तर्हि सभावाघद मीमपदित्यादावभ्यासलोपो न भविष्यति॥ ॥

चाव्यवहितत्वात्॰ यद्यपि दीर्घविधिं प्रतिस्थानिवद्भावः प्रतिषिध्यते सन्वद्भावे तु प्राप्नोति॰ भवतु वा स्थानिवत्वनिषेधः अग्लो पित्वात् प्राप्नोति॰ ह्रस्वीकृतायां णौ लोपः तन्नाग्लोपं भवति अग्लोपित्वाभ्युपगमे वृद्धेर्णौ लोपे कृते तत्राऽपि परिहारमाह॰ यो सौ णौ णौ लोप इत्यादि॰ तत्रोपोरूलोप इति अस्याको लोपो मन्तव्यः तात्याश्रयणो हि गोबलीवर्दन्यायेन णिजाते निमित्तत्वेन पु रिगृहीतायाः अस्याको लोपः प्रतिषेधविषयः परिगृह्येत न तु तस्याणिजातेः ततश्चास्य लोपस्याग्लोपत्वे नानाश्रयणात्तेनाग्लोपं न भवतीति भावस्तेवात्र सन्वद्भावः। मीमादीनामग्रहणादिति॰ तत्र ह्रस्वः सन्यभ्यासलोपश्चेत्येवमिति ग्रहणं विषयाव धारणार्थं॰ अत्रमुत्वे सत्येव भवति न सन्वद्भावविषय इति किंचेत्यादि॰ अनेनेदमाह न केवलं मुत्वमसन्यपि इह मात्रमत्र कारणं कि तर्हि सभावाद्यपि विषयत्वेन निर्दिश्यते इह च धातोः सन्वद्भावाभावादिसभावादिन भवति तश्चाभ्यासलोपोऽपि न भवतीति॰ यद्वा

७का·पद०४
१२४

॥दीर्घो॥ ॥अविभ्रजदिति भ्राजभासेत्यादिना पक्षे उपधाह्रस्वनिषेधः॥ ॥अ तस्म॥ ॥तपरकरणमसामर्थ्यादिति· स्थानिनोऽह्रस्व
लाद्ग्राममानत्वेन सवर्णग्रहणाभावेनानेन दीर्घस्य प्रसंगः अतो लक्षणान्तरेण प्राप्तं दीर्घत्वं तपरकरणेन माव र्त्यते॥ ॥ई चि॥ ॥

॥दीर्घो लघोः॥ ॥दीर्घो भवति लघोरभ्यासस्य लघुनि णौ चङ्परे नग्लोपे। अचीकरत्। अजीहरत्। अलीलवत्। अ
पीपचत्। लघोरिति किं। अबिभ्रजत्। लघुनीत्येव अततक्षत्। अररक्षत्। चङीत्येव अहं पपाच। अपर इत्येव अचक
मत। अनग्लोप इत्येव अचकथत्॥ अत्स्मृदृत्वरप्रथम्रदस्तृस्पशां॥ ॥स्मृदृत्वरप्रथम्रदस्तृस्पश इत्येतेषामभ्यास
स्यात् इत्ययमादेशो भवति चङ्परे णौ परतः। स्मृ। असस्मरत्। दृ। आददरत्। त्वर। अतत्वरत्। प्रथ। अपप्रथत्। म्र
दत्। स्तृ। अतस्तरत्। स्पश। अपस्पशत्। सन्वद्भावादित्वं प्राप्तमनेन बाध्यते। तपरकरणमसामर्थ्यादिति कृते दीर्घो
लघोरित्येतदपि न भवति अददरत्॥ ॥विभाषा वेष्टिचेष्ट्योः॥ ॥वेष्टिचेष्टि इत्येतयोरभ्यासस्य विभाषा अदित्ययमादेशो
भवति चङ्परे णौ परतः। अववेष्टत्। अवविवेष्टत्। अचिचेष्टत्। अभ्यासह्रस्वत्वे कृते अत्वं पक्षे भवति॥ ॥ई च ग
णः॥ ॥गणेरभ्यासस्य ईकारादेशो भवति चङ्परे णौ परतः। चकारादत्त्वं। अजीगणत्। अजगणत्॥ ॥इति वा
मनाचार्यविरचितायां काशिकायां वृत्तौ सप्तमस्याध्यायस्य चतुर्थः पादः समाप्तः॥ अध्यायश्च सप्तमः॥ २१ ॥७॥ ॥

॥श्री॥ ॥श्री॥ ॥

गणसंख्याने वुगादावदन्तः तस्मातो लोपेनानग्लोप इति प्रतिषेधाद्वचनं कृतयोर्हलादिशेषदीर्घत्वयोरीत्वं अत्वं च विधीयते· लोपः
पिवतेरित्येतदत्रैव पठितव्यं· पिबतेरालोपश्चेति चकारादीचाभ्यासस्य· सत्वं· विभाषेत्यस्यानुवृत्ति· शकयत॥ ॥इति श्रीहरदत्त
मिश्रविरचितायां पदमंजर्यां सप्तमस्याध्यायस्य तुरीयश्चरणः समाप्तश्चायमध्यायः २१

रा०
१२४

नं- ४



